अन्धपङ्ग्वादीनामिव कर्मणि, गृहाद्यासक्तस्य मननाद्यसम्भवात्साक्षात्कारो न भविष्यति। न च धर्मन्यायेन गतार्थत्वमस्य। अप्रतिज्ञानादनुपलब्धेश्च। नच जगत्कारणं परमात्मा वा प्रकृतिर्वा परमाणवो वेति सन्देहे किञ्चिदधिकरणमस्ति।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

पार्थसाधनीभूतब्रह्मसाक्षात्कारः कथं न भवतीत्याशङ्क्य दृष्टान्तप्रदर्शनमुखेन समाधत्ते—'**अन्धे**'ति। यथा अन्धपङ्ग्वादीनां संस्कारस्य सर्वत्रोक्तत्वात्कर्माधिकारस्य सिद्धत्वेन न कर्मणि (कर्मविषये) मतिमत्त्वादिकमधिकारिविशेषणं, किन्तु सहकारिविशेष एव। तथा च तदभावान्न कर्मकरणम्। तथाऽत्रापि गृहाद्यासक्तस्य श्रवणस्य यथाकथञ्चित्सत्त्वेऽपि मतिमत्त्वाऽभावेन मननादिसहकारिकारणाभावान्न साक्षात्कार इति भावः।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

इति मन्यमानं मीमांसकं कटाक्षयन्नाहुः—'**न चे**'ति। न हीत्यर्थः। अथातो धर्मजिज्ञासेत्यत्र धर्मशब्दस्य वेदार्थमात्रार्थत्वेन धर्मविचारप्रतिज्ञयैव ब्रह्मविचारस्य जायमानत्वेन भिन्नतया न वक्तव्येत्ययमर्थः। **अस्याः** वेदान्तमीमांसायाः। यद्यपि क्वचित्पुस्तके अस्येति पाठः। तथाप्यत्रैव भाष्ये नार्थोऽनया मीमांसयेत्युक्तत्वात्क्वचित्पुस्तके अस्या इति पाठस्य दृष्टत्वात् स एव पाठ इति प्रतिभाति। **अप्रतिज्ञानात्** जैमिनिना अथातो ब्रह्मजिज्ञासेति प्रतिज्ञाया अकृतत्वात्। '**अनुपलब्धेरि**'ति। ब्रह्मप्रतिपादकाधिकरणानुपलब्धेरित्यर्थः। तदेवाऽऽहुः—'**न चे**'ति। अत्र मीमांसकमते जगतः प्रवाहरूपेण नित्यत्वमतः कारणताविचार एव नास्ति। ब्रह्मज्ञानस्य तु धर्मरूपत्वात् धर्मप्रतिज्ञयैव चरितार्थत्वादित्याशयेन मीमांसकाः शङ्कन्ते—'**स्यादेतदि**'ति। **नोदकवाक्यार्थस्य**। नुद् प्रेरण इति धातुनिष्पन्नं नोदकं प्रेरकं यत् **सोमेन** यजेतेत्याकारकवेदवाक्यम्। तदर्थस्य यागानुकूलभावनारूपार्थस्य धर्मत्वमुक्त्वा चोदनालक्षणोऽर्थो धर्म इति सूत्रेण धर्मे प्रामाण्यं प्रतिपाद्येत्यर्थः। ननु वेदस्य विध्यर्थवादमन्त्रनामधेयरूपेण

कैश्रीद्विरचिता वेदान्तचन्द्रिका।

मतिमानेवाधीयेतेति यथा न नियमस्तथाऽत्राप्युक्तसाधनसम्पत्तिमतैव विचारः कर्तव्य इति न नियम इति भावः। नन्वेवं सति विरहितानामपि वेदान्तार्थनिश्चयात्साक्षात्कारापत्तिरित्यत आहुः—'**अन्धे**'ति। यथाऽऽज्यावेक्षणादिस्वरूपोपकार्यङ्गाभावात्कर्मणि तेषां न फलं, तथाऽत्रापि फलोपकारिमननाद्यङ्गाऽभावाद्गृहाद्यासक्तानां न साक्षात्कारः। श्रुतिस्तु महावाक्याद्युपदेशग्रहणसाधनपरेति न दोषः।

श्रीलालूभट्टकृता गूढार्थदीपिका।

शङ्क्य समादधते—'**अन्धपङ्ग्वादीनामिवे**'त्यादिना। यथा कर्मण्यन्धपङ्ग्वादीनामसामर्थ्यात्कर्मकरणाऽभावात्तत्साध्यफलाऽभावेऽपि न कर्मण्यनन्धत्वादिविशेषणं, तथा गृहाऽऽसक्तस्य मननाऽसामर्थ्यात्साध्यं ब्रह्मसाक्षात्काररूपं फलं न भविष्यति। नैतावता शमदमादिकं विशेषणं देयमित्यर्थः।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

शमतिमत्त्वाभावं निश्चित्यापि जडभरते पितृकारितवेदाध्ययनस्यावैधत्वेन प्रत्यवायजनकत्वं स्यादित्यर्थः। ननु शान्तो दान्त उपरतस्तितिक्षुरित्यादिरूपोऽधिकारो विचारेऽवश्यं अधिकारिविशेषणं वाच्योऽन्यथा गृहाद्यासक्तवेदान्तविचारकस्यापि ब्रह्मसाक्षात्कारः पुरुषार्थश्च सिद्ध्येदत आहु'**रन्धे**'त्यादि। तथा च यथाऽऽज्यावेक्षणविष्णुक्रमणादिरूपसहकारिकारणाङ्गाभावाद्यथा कर्मकर्तॄणां फलाभावस्तथा विचारकाणामपि शान्त्यादिसहकारिकारणानामभावाद्गृहाद्यासक्तानां ब्रह्मसाक्षात्कारपुरुषार्थाभाव इति भावः।

स्यादेतत्। अथातो धर्मजिज्ञासेति धर्मविचारं प्रतिज्ञाय नोदकवाक्यार्थस्य धर्म-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

ननु धर्मशब्दस्य वेदार्थमात्रोपलक्षकत्वेन धर्मजिज्ञासयैव ब्रह्मविचारस्यापि गतार्थता स्यादित्याशङ्क्याऽऽह–**'न च धर्मन्यायेने'**ति । तत्र हेतुमाहुः–**'अप्रतिज्ञानादि'**ति । तत्र हि धर्मजिज्ञासा प्रतिज्ञाता । न ब्रह्मजिज्ञासा । तथा चाऽप्रतिज्ञातस्य निरूपणासम्भवात्कथं गतार्थत्वम् । ननूक्तं धर्मशब्दो वेदार्थमात्रोपलक्षक इति, कथमप्रतिज्ञातत्वं ब्रह्मजिज्ञासाया इत्यत आहुः—**'अनुपलब्धेरि'**ति । **'अथाऽतो धर्मजिज्ञासे'**त्यत्र धर्मशब्दो यदि वेदार्थमात्रोपलक्षकत्वेन सूत्रकारसम्मतः स्यात्तदा ब्रह्मजिज्ञासाया अपि प्रतिज्ञातत्वेनानुपदमेव चोदनालक्षणोर्थो धर्म इत्यादिना धर्मजिज्ञासावद्ब्रह्मजिज्ञासाऽपि स्वनये तेनैव कृता स्यात् । नहि द्वादशलक्षण्यां कुत्रापि सा कृतास्ति । अनुपलब्धेः । उपलब्धिप्रकारप्रदर्शनपूर्वकमत्र तन्निषेधमाहुः—**'नचे'**ति । अत्र पूर्वपक्षी शङ्कते—**'स्यादेतदि'**ति ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ननु वेदार्थनिश्चयार्थमेव शास्त्रप्रवृत्तौ शास्त्रस्यैव वैयर्थ्यं स्यात् । पूर्वमीमांसयैव विधिमन्त्रनामधेयनिषेधाऽर्थवादात्मकस्य सर्वस्याऽपि वेदार्थस्याऽर्थनिर्णयादिति चेत् । मैवम् । वेदार्थज्ञानमात्राय नाऽयं विचारः, किन्तु वेदार्थब्रह्मज्ञानाय । तस्य च तत्राऽदर्शनात् । तदेतदुक्तं **'नच धर्मे'**त्यादिना । न्यायशब्देनाऽत्र सूत्राणि गृह्यन्ते । **अस्य** वेदान्तशास्त्रस्य । **'अप्रतिज्ञानादि'**ति । ब्रह्मविचारस्य । तस्यैवाऽनुपलम्भात् । तामेव प्रदर्शयन्ति **'नचे'**त्यादिना । पुनः प्रकारान्तरेण वैयर्थ्यमाशङ्कन्ते—**'स्यादे-**

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ननु वेदाधिकारी यः स त्रैवर्णिक एवाधिकारी तदाऽथातो धर्मजिज्ञासेति पूर्वतन्त्रप्रतिज्ञासूत्रे धर्मशब्दस्य वेदार्थमात्रोपलक्षकत्वेन धर्मजिज्ञासयैव पूर्वतन्त्रन्यायेन ब्रह्मज्ञानसिद्धेर्ब्रह्मविचारस्य गतार्थता स्यादित्याशङ्क्याऽऽहुः—**'न च धर्मन्यायेने'**त्यादि । तत्र हेतुमाह—**'अप्रतिज्ञानादि'**ति । जैमिनिना ब्रह्मविचारस्याऽप्रतिज्ञानात् । यदि सर्ववेदार्थजिज्ञासायाः प्रतिज्ञा स्यात्तदाऽथातो वेदजिज्ञासेति प्रतिज्ञातं स्यादित्यर्थः । **'अनुपलब्धेश्चे'**ति । यदि धर्मजिज्ञासायामतेद्विचारोऽपि प्रतिज्ञातः स्यात्तदा **'चोदनालक्षणोर्थो धर्म'** इत्यादिभिर्धर्मविचारवद्ब्रह्मविचारोऽप्युपलभ्येत । अतस्तस्यानुपलब्धेर्न तत्र ब्रह्मविचारप्रतिज्ञेत्यर्थः । अनुपलब्धेरित्युक्तं तस्यैव विवरणमाहुः—**'न च जगत्कारण-मित्यादिना**। उत्तरकाण्डप्रमेये ज्ञाने धर्मत्वं साधयित्वा पूर्वकाण्डमीमांसया गतार्थत्वं साधयति—

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

नन्वथातो धर्मजिज्ञासेत्यत्र धर्मशब्दस्य लक्षणया वेदार्थमात्रपरतया व्याख्यानात् धर्मनिरूपणप्रतिज्ञयैव ब्रह्मनिरूपणप्रतिज्ञायाः कृतत्वेन गतार्थत्वादथातो ब्रह्मजिज्ञासेति पृथक्प्रतिज्ञाया वैयर्थ्यमत आहुः–**नन्विति** । **अस्य** वेदान्तविचारस्य । **अप्रतिज्ञानात्** शक्त्यार्थप्रतिपादकधर्मपदघटितजैमिनिप्रतिज्ञामध्ये ब्रह्मविचारप्रतिज्ञाया अलाभादित्यर्थः । ननु लक्षणयार्थप्रतिपादकधर्मशब्दघटितप्रतिज्ञया ब्रह्मविचारस्यापि प्रतिज्ञातत्वादपार्थैव पृथग्ब्रह्मविचारप्रतिज्ञेत्यत आहुः–**अनुपलब्धेरिति** । तथा च जैमिनिना स्वसूत्रे यदि ब्रह्मजिज्ञासा प्रतिज्ञाता स्यात्तदा 'चोदनालक्षणोऽर्थे धर्म' इति धर्मजिज्ञासावत् ब्रह्मजिज्ञासाप्युपलभ्येत नत्वेवमित्यर्थः । अनुपलब्धिप्रकारमेवोपपादयन्ति–**'नच जग'**दित्यादिना । **अधिकरणमस्ति** जैमिनिमीमांसायामधिकरणमस्तीत्यर्थः ।

त्वमुक्त्वा, प्रामाण्यपुरःसरं सर्वे सन्देहा निवारिताः। तत्र ब्रह्मज्ञानस्यापि धर्मत्वम् 'आत्मे-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

यदुक्तं जगत्कारणं परमात्मा वा प्रकृतिर्वा परमाणवो वेति सन्देहपूर्वकं तन्निश्चयकारकं किञ्चिद-धिकरणं द्वादशलक्षण्यां नोपलभ्यत इति। तत्तु स्यादेव। तेन प्रकारेणाऽधिकरणकृतेरनपेक्षणात्। किन्तु धर्मजिज्ञासां प्रतिज्ञाय तद्विषयाकाङ्क्षायां **'चोदनालक्षणोर्थो धर्म'** इत्यारभ्य नोदक-वाक्यार्थस्य धर्मत्वमुक्त्वा, तस्यैव कथं धर्मत्वमर्थवादवाक्यानां तत्र सत्वात्। तत्र च चोदनाया असत्त्वात्तद्वाक्यार्थस्य धर्मत्वाऽभावे तेषामप्रामाण्यमेव स्यादि'**त्याम्नायस्य क्रियार्थत्वादानर्थ-**

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

चतुर्विधत्वम्। तन्मध्ये विधेस्तु प्रामाण्यं प्रतिपादितम्। अर्थवादादीनां निरर्थकत्वेनाऽप्रामाण्यमत आह—**'प्रामाण्यपुरःसरमि'**ति। **विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्यु-**रिति सूत्रेण। **स्वाध्यायविधिना वेदः पुरुषार्थाय नीयते। सर्वस्तेनार्थवादानां प्राय-स्तेन प्रमाणते**ति कारिकया चार्थवादानां प्राशस्त्यबोधकत्वेनार्थांशे प्रामाण्यं, मन्त्रादीनां देवता-प्रकाशनद्वारा शब्दांशे प्रामाण्यं च प्रतिपाद्य नामधेयानां नामावच्छिन्नधात्वर्थनिष्ठभावनाख्यधर्मप्रमितौ प्रामाण्यं च प्रतिपाद्य, सकलवेदाऽर्थवादानां प्ररोचकतयैव मन्त्राणामपि स्मारकतया प्रामाण्यव्य-वस्थापनपुरःसरं शब्दार्थोभयविषयकाः सन्देहा निवारिता इत्यर्थः। ब्रह्मज्ञानस्य धर्मत्वप्रतिपादक-

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

तदि'ति। एतद्वक्ष्यमाणप्रकारकं वैय्यर्थ्यम्। **'अथे'**ति। **'प्रतिज्ञाये'**ति। कर्तव्यत्वेन प्रतिज्ञाय। **'नोदके'**ति। को धर्मः कथंलक्षणक इति स्वरूपप्रमाणजिज्ञासायां यदेतेत्यादिनोद्घाटितं नोदकं वाक्यम्। तदर्थस्य यागादेश्चोदनालक्षणोऽर्थो धर्म इति सूत्रेण, चोदनालक्ष्यत्वाच्चोदनार्थत्वादर्थरूपत्वाच्च धर्मत्वमुक्त्वा वेदान्तानां तदेकदेशत्वाच्चोदनानां प्रामाण्यमाशङ्क्यौत्पत्तिकसूत्रेण तत्प्रामाण्यपुरस्सरं शब्दार्थ-

श्रीलालूभट्टकृता गूढार्थदीपिका।

स्यादेतत्। 'अथातो धर्मजिज्ञासेति धर्मविचारमि'त्यादिना। **'नोदकवाक्यार्थस्य धर्म-त्वमुक्त्वे'**ति। चोदनालक्षणोऽर्थो धर्म इत्यारभ्य नोदकवाक्यार्थस्य धर्मत्वमुक्त्वेत्यर्थः। **'प्रामाण्य-पुरःसरमि'**ति। अर्थवादवाक्येषु नोदनाया असत्त्वात्तदर्थस्य धर्मत्वाऽभावेनाऽप्रामाण्य**'माम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थाना'**मित्यादिनाऽऽशङ्क्य **'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरि'**त्यादिना स्तुत्यर्थेन नोदकवाक्यैनैकवाक्यतां सम्पाद्योपपत्तिपूर्वकमर्थवादवाक्या-नामप्रामाण्यशङ्का निवारितेत्यर्थः। ब्रह्मज्ञानस्योत्तरमीमांसाविषयस्य धर्मत्वमाह—**'तत्र ब्रह्मज्ञानस्ये-**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

पूर्वपक्षी शङ्कते **स्यादेतदिति। एतत् स्यात्** ब्रह्मज्ञानस्यापि विध्यर्थत्वेन धर्मत्वात् धर्मवि-चारप्रतिज्ञया प्रतिज्ञातत्वं स्यात्। **प्रामाण्यपुरःसरं** अर्थवादानां विध्यर्थस्तावकत्वेन प्रामाण्यव्यव-स्थापनपुरःसरम्। **सर्वे सन्देहाः** मन्त्रार्थवादानामप्रामाण्यसन्देहाः। तत्र धर्मपदार्थमध्ये। **धर्मत्वं**

१–चेति कपुस्तके नास्ति।

त्येवोपासीत' 'आत्मानं श्लोकमुपासीत' 'तद्ब्रह्मेत्युपासीत' 'आत्मा वारे द्रष्टव्य' इत्यादिनोदनावाक्यार्थत्वात् । 'अयं हि परमो धर्मो यद्योगेनात्मदर्शन' मिति स्मृतेश्च । सृष्ट्या-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

कथमतदर्थाना'मित्यादिनाऽऽशङ्क्य '**विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरि**' त्यादिना स्तुत्यर्थेन चोदकवाक्यैनैकवाक्यतां सम्पाद्योपपत्तिपूर्वकमर्थवादवाक्यानामप्रामाण्यादिशङ्का निवारिता । तथाचाऽऽ'**त्मेत्येवोपासीत**' '**आत्मानं श्लोकमुपासीत**' '**तद्ब्रह्मेत्युपासीत**' '**आत्मा वारे द्रष्टव्य**' इत्यादिनोदनावाक्यानामुत्तरकाण्डेऽपि सत्त्वात्तदर्थस्य ब्रह्मज्ञानस्याऽपि धर्मत्वम् । तल्लक्षणाऽऽक्रान्तत्वात् । '**अयं हि परमो धर्म**' इत्यादिस्मृतौ त्वात्मदर्शनस्य स्फुटमेव धर्मत्वमुक्तम् ।

ननूत्तरकाण्डेऽक्रियार्थानामपि वाक्यानां तत्त्वात्तेषां का गतिरिति चेत्तत्राऽऽहुः–'**सृष्ट्यादी**'-ति । यथा '**वायुर्वै क्षेपिष्ठे**'त्यादिवाक्यानां '**वायव्यं श्वेतमालभेते**'ति नोदकवाक्यान्तर्गतवायुदेवतास्तावकत्वेन प्रवृत्त्युपयोगितया तद्वाक्यप्रयोजनेनैव सप्रयोजनत्वात्तेषां प्रामाण्यं प्रसाधितं, तथाऽत्राऽप्युपासनाविषयेश्वरस्तावकत्वेन तेषामपि प्रामाण्यमिति भावः । ननु तत्र वायौ क्षिप्रकारित्वादिधर्माणां प्रत्यक्षसिद्धत्वेन तत्प्रतिपादनं संगच्छते । अत्र तूपासनाविषयस्य ब्रह्मणः शुद्धत्वेन धर्माऽभावात्कथमुपा-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

विधीनाह—'**आत्मे**'ति । ननु जगत्कारणप्रतिपादकवाक्यविचारो न कृत इत्यत आह—**सृष्ट्या-**

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

विषयकाः सर्वे सन्देहा निराकृताः । चोदनेतिक्रियायाः प्रवर्तकवचनम् । लक्ष्यते ज्ञायते येन तल्लक्षणम् । चोदनैव लक्षणं प्रमाणं यस्येति । लक्ष्यते बुध्यते स्वरूपं येन तल्लक्षणम् । स्वरूपबोधकं वाक्यं यस्येति चेति । अनर्थो धर्मो माभूदित्यर्थग्रहणम् । तथाच यः पुरुषं निःश्रेयसेन युनक्ति स धर्म इति । तदुभयमप्येकेनाऽनेन सूत्रेण व्याख्यातम् । एवञ्चोत्तरकाण्डे धर्मलक्षणाऽऽक्रान्तत्वाज्ज्ञानस्यापि धर्मत्वमित्याहुः—'**तत्रे**'ति । तत्र हेतुमाहुः—'**आत्मेत्येवे**'त्यादि । तत्र स्मृतिमपि प्रमाणयन्ति—'**अयं ही**'ति । सृष्ट्यादिवाक्यानां ज्ञानार्थत्वाऽभावेन तद्विचारस्य गतार्थत्वाऽभावमाशङ्क्य ज्ञानविधावेव तत्सङ्गतिं दर्शयन्ति–'**सृष्ट्यादी**'त्यादि । '**यतो वा इमानी**'त्यादिसृष्टिवाक्यानि ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

त्यारभ्य '**स्मृतेश्चे**'त्यन्तेन । ननूत्तरकाण्डे ज्ञानस्याऽस्तु धर्मत्वम् । 'आत्मेत्येवोपासीत' 'आत्मानं श्लोकमुपासीत' 'आत्मा वारे द्रष्टव्य' इत्यादिनोदकवाक्यविहितत्वात् । परन्तु 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत' इत्यादिसृष्ट्यादिवाक्यानां नोदकत्वाऽभावान्न धर्मप्रतिपादकत्वम् । ततश्चाऽप्रामाण्यमापद्येतेत्याशङ्क्य समाधत्ते–'**सृष्ट्यादिवाक्यानामि**'त्यादिना । यथा पूर्वकाण्डे 'वायुर्वै क्षेपिष्ठा

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

विध्यर्थत्वाद्धर्मत्वम् । ज्ञानस्य धर्मत्वप्रतिपादकविधिमाह–'**आत्मे**'त्यादि । **श्लोकं** स्तुत्यम् । ज्ञानस्य स्फुटतया धर्मत्वबोधिकां स्मृतिमाह–'**अयं ही**'त्यादि । ननूत्तरकाण्डे सृष्ट्यादिप्रतिपादकविधिभिन्नवाक्यानां का गतिरत आह–'**सृष्ट्यादी**'त्यादि । **अर्थवादत्वं** उपासनाविध्यर्थस्तावकतया विध्ये-

दिवाक्यानां त्वर्थवादत्वम् । आरोपापवादविषयधर्मप्रतिपादकत्वेन विधेयोपासनाविषय-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

सनाविषयत्वम् । कथं वा स्तुतिविषयत्वं तत्राऽऽह–'**आरोपे**'ति । न हि ब्रह्मणि वास्तवा धर्माः सन्ति । नित्यशुद्धबुद्धोदासीनत्वेन सर्वथैव तस्याविषयत्वात् । तथा च तत्प्रतिपत्तेरस्थूलादिश्रुतिभिर्निषेधमुखेन प्रतिपादितत्वान्निषेध्यानां तत्राऽसत्वान्निषेधार्थं तानारोपयन्ती श्रुतिस्तेषामपवादविषयत्वं सूचयतीति नोपासनायाः स्तुतेर्वाऽनुपपत्तिरित्यर्थः । ननु ना'ऽऽ**त्मेत्येवोपासीते**'त्यादौ विधिः सम्भवति । आत्मज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वेनाऽविधेयत्वात् । हेयोपादेयविषयो हि विधिः । स एव च हेय उपादेयो वा अयं पुरुषः कर्तुमन्यथाकर्तुं च शक्नोति । तत्रैव च समर्थः कर्ता नियोज्यो भवति । न चैवं-भूतान्यात्मोपासनदर्शनादीनीति न तेषां विधिविषयत्वम् । तथाच कथं धर्मजिज्ञासया गतार्थत्वं

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

दी'ति । अस्माकं मते जगतो नित्यत्वात्कर्तुरभावेन तत्प्रतिपादकानां, **यतो वा इमानि भूतानि जायन्त** इत्यादिवाक्यानामर्थवादत्वमित्यर्थः । ननु कथमस्याऽर्थवादत्वमित्यत आह—'**आरोपे**'ति । '**धर्मे**'ति । कर्तृत्वाकर्तृत्वरूपधर्मप्रतिपादकत्वेन विधेयस्तावकत्वात्प्रामाण्यमित्यर्थः ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

आदिना '**सत्यं ज्ञानमनन्त**'मित्यादिस्वरूपपराणां संग्रहः । ईदृशानि वाक्यानि तद्विधावेवार्थवाद-विधयाऽन्वीयुरिति भावः । तत्रोपपत्तिमाहुः—'**आरोपे**'ति । तयोर्विषयीभूतो धर्मः कर्तृत्वादिः । '**विधेये**'ति । उपासीतेत्यादिविधिविषयीभूता योपासना तद्विषय आत्मा । तत्स्तावकत्वात् ।

श्रीलाल्लुभट्टकृता गूढार्थदीपिका ।

देवतेत्यादिवाक्यानां' 'वायव्यं श्वेतमालभेते'ति नोदकवाक्यान्तर्गतवायुदेवतास्तावकत्वेन प्रवृत्त्युपयोगि-तया नोदकवाक्यप्रयोजनेनैव सप्रयोजनत्वात्तेषां प्रामाण्यं निरणायि । तथाऽत्राप्युपासनाविषयपरमे-श्वरस्तावकत्वेन सृष्ट्यादिवाक्यानामुपयोगात्तेषामपि प्रामाण्यमिति हार्दम् । ननु वायौ क्षिप्रकारित्वादि-धर्माणां प्रत्यक्षत्वात्तत्प्रतिपादनं युक्तं, प्रकृते तूपास्यस्य ब्रह्मणो निर्द्धर्मकत्वान्नोपासनाविषयत्वं न वा स्तुतिविषयत्वमित्याशङ्क्याऽऽह–'**आरोपापवादे**'त्यादि । अस्थूलमनण्वह्रस्वमदीर्घमित्यादिश्रुतिभिर्ध-र्माणां निषेधान्निषेध्यानां तत्राऽसत्वान्निषेधस्य प्राप्तिपूर्वकत्वनियमान्निषेधार्थं जगत्कर्तृत्वाद्यारोपयति श्रुतिरित्यारोपापवादयोर्विषया ये धर्माः सृष्ट्याद्य ईश्वरीयास्तत्प्रतिपादकत्वाज्जगज्जननादिनिरूपिकाणां श्रुतीनां प्रामाण्यमक्षुण्णम् । विधेयोपासनाविषयपरमेश्वरस्तावकत्वादित्यर्थः । ननु ना'ऽऽत्मेत्येवोपासीते' त्यादौ विधिः । आत्मज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वेनाऽविधेयत्वात् । विधिर्हेयोपादेयविषयः । यस्तु पुरुषेण कर्तुं शक्यतेऽन्यथाकर्तुं च शक्यते स हेय उपादेयः । तस्मिन् समर्थः कर्ता नियोज्यो वि-धिना । प्रकृते त्वात्मोपासनदर्शनादीनि नैतादृशानीति न तेषां विधिविषयत्वमतः कथं ब्रह्मजिज्ञासाया

भगवदीयश्रीमदिच्छाराममप्रणीतः प्रदीपः ।

कवाक्यतया प्रामाण्यमित्यर्थः । तदेव चोपपादयति–**आरोपे**त्यादिना । **आरोपः** 'ऐतदात्म्यमिदं सर्वं' 'यतो वा इमानि' इत्यादिवाक्यार्थः । **अपवादः** 'अथात आदेशो नेति नेती'तिरूपः । **तद्विषयाः**, मिथ्याभूताः सर्व एव धर्माः । **तत्प्रतिपादकत्वेन** सृष्टिब्रह्माभेदप्रतिपादकवाक्यानां तत्प्रतिपादक-त्वेन । **विधेयोपासना** प्रपञ्चकर्तृत्वसर्वाभिन्नत्वादिना विहिता या प्रतीकोपासना । **तद्विषये**त्यादिना

स्तावकत्वात् । नच ज्ञानादीनामविधेयत्वं प्रमाणवस्तुपरतन्त्रत्वेनाकृतिसाध्यत्वादिति वाच्यम् । नहि सर्वात्मनाऽसाध्यम् । प्रकारभेदस्त्वप्रयोजकः सर्वस्यापि कारणेषु पुरुषव्यापृतिः

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

ब्रह्मजिज्ञासाया इत्याशङ्क्य पूर्वपक्षी परिहरति–'**न च ज्ञानादीनामि**'ति । तत्रोपपत्तिमाहुः–'**नही**'ति । यद्यपि ज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वं सर्ववादिसिद्धं, तथापि न सर्वात्मनाऽसाध्यत्वम् । तर्हि कस्मिन्नंशे साध्यं तदित्यत आह–'**प्रकारभेदस्त्वि**'ति । यथा ज्योतिष्टोमादिकं स्वरूपोपकारिभिः फलोपकारिभिश्चाङ्गैस्तेन तेन क्रमेण स्वकृतिसाध्यं, न तथात्रास्ति । ज्ञानस्य स्वरूपतोऽसाध्यत्वात् । ननु तर्हि सर्वात्मनैव तदसाध्यं स्यादिति चेत् । न । स्वरूपतोऽसाध्यत्वेऽपि तत्कारणानां श्रवणादीनां साध्यत्वात् ।

ननु साधनानां साध्यत्वे कथं तत्फलस्य साध्यत्वमित्यत आहुः–'**सर्वस्यापी**'ति । यथा '**स्वर्गकामो**

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ननु कृतिसाध्यत्वस्यैव विध्यर्थत्वात्सामान्यतो ज्ञाने यत्नापेक्षाया अभावाद्ब्रह्मज्ञाने विध्यर्थत्वरूपधर्मत्वाभाव इत्याशयेनाऽऽशङ्कते—'**नचे**'ति । '**प्रमाणे**'ति । प्रमाणं चक्षुरादिः । वस्तु घटादिः । परतन्त्रत्वेन उभयाधीनत्वेन । न हि केवलं ज्ञाने प्रमाणवस्त्वपेक्षा, किन्तु प्रत्यक्षादिज्ञाने चक्षुःसन्निकर्षापेक्षाप्यस्तीति यत्नं विना चक्षुःसन्निकर्षो न जायत इति कृत्वा परम्परया कृतिसाध्यत्वं ज्ञानेऽप्यस्तीत्याशयेनाऽऽहुः—'**सर्वात्मना**' सर्वप्रकारेण । '**असाध्यमि**'ति । ज्ञानमिति शेषः ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ननु व्यर्थोऽयं सर्वोऽपि प्रयासो ज्ञानादीनां विधेयत्वाऽसम्भवेन विद्ध्यर्थवादकल्पनानैरर्थक्यादित्यत आहुः–'**नचे**'ति । '**प्रमाणे**'ति । प्रमाणं चक्षुरादि । वस्तु विषयः । तदधीनत्वेन तदसाध्यत्वात् । समादधते–'**न ही**'ति । स्वरूपसाधनांशेनाऽसाध्यं नेत्यर्थः । ननु पुरुषव्यापारतन्त्रत्वाऽभावात्कथं साध्यता । तदेव हि साध्यं यत्पुरुषव्यापारतन्त्रम् । यथाग्निहोत्रादि । ज्ञानञ्च प्रमाणवस्तुपरतन्त्रत्वान्न तथेत्यत आहुः—'**प्रकारे**'ति । उक्तो यः प्रकारभेदः स तु नाऽविधेयताप्रयोजकः । यतः स्वरूपतोऽसाध्यत्वेनाऽपि न साधनांशेनाऽसाध्यं तत् । ननु ज्ञानसाधनानां साध्यत्वे कथं तस्य साध्यत्वं स्यादित्यतो ब्रुवते–'**सर्वस्ये**'ति । स्वर्गस्याऽपूर्वस्य वा । **साधने** योगादौ । पुरुषस्य व्यावृत्तिर्व्या-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

धर्मजिज्ञासया गतार्थत्वमित्याशङ्क्याऽऽह–'**न च ज्ञानादीनामि**'त्यादि । '**न हि सर्वात्मनाऽसाध्यमि**'ति । सन्निकर्षादिजनककृत्यपेक्षाया ज्ञानेऽपि सत्वान्न सर्वप्रकारेणाऽसाध्यत्वमित्यर्थः । ननु कर्मवत्साक्षात्कृतिसाध्यत्वाऽभावान्न विधेयता ज्ञानादीनामित्याशङ्क्याऽऽह–'**प्रकारभेदस्त्वप्रयोजक**' इति । प्रकारभेदस्त्वविधेयत्वसाधको न भवति । यतो धर्मेऽपि साक्षात्कृतिसाध्यत्वं नाऽस्तीति प्रदर्शयति–'**सर्वस्यापि कारणे पुरुषव्यापृतिरि**'ति । धर्मस्याऽपूर्वरूपत्वात्तस्याऽपि कारणभूते

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

तादृशोपासनाविषयजगत्कर्तृत्वसर्वाभेदादि**स्तावकत्वात्** तादृशधर्मसम्बन्धबोधनेनोपास्यस्तुतिपरत्वादित्यर्थः । ननु उपासनायाः ज्ञानरूपत्वात्तस्याः ज्ञानगोचरेच्छायाश्च कृत्यसाध्यत्वात्कृतिसाध्यस्यैव च विधिविषयत्वात् ज्ञानविध्येकवाक्यतया सृष्टिप्रतिपादकार्थवादानां प्रामाण्यमुक्तमसम्भवि ज्ञानविधेरेवासम्भवादिति दूषणं परिहर्तुं वादी शङ्कते–'**नचे**'त्यादि । '**ज्ञानादी**'त्यादिपदेनेच्छा ग्राह्या । **अवि-**

१–अत्रैवाऽऽहुरिति कपुस्तके । २ क्वचिदाहुः क्वचिचाहेति खपुस्तके लभ्यते ।

तदत्र वृत्तिसम्पादने प्रमाणसम्पादने वा पुरुषकृतिसाध्यत्वं, अन्यथा सिद्धान्तेऽपि मन-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

यजेते'त्यादौ स्वर्गशब्दवाच्यस्य देवयानमार्गेण ब्रह्मप्राप्तिरूपस्याऽऽत्मसुखस्य वा, लोकस्य वा, फलस्य स्वत एव सिद्धत्वेनाऽसाध्यत्वात्तदभिव्यक्तिसाधनस्य ज्योतिष्टोमादेः साध्यत्वेन, तेषामपि साध्यत्वव्यपदेशस्तथा श्रवणादीनां कृतिसाध्यत्वेन ज्ञानस्यापि तद्व्यपदेश इत्यर्थः । ननु प्रमाणवस्तुपरतन्त्रस्य तस्य कथं श्रवणादिसाध्यत्वमित्यत आह–'**तदत्रे**'ति । यस्मात्कारण एव सर्वस्य व्यापृतिर्लोके दृष्टा । **तत्** तस्मात् । **अत्र** ज्ञाने । **वृत्ते**रन्तःकरणपरिणामविशेषस्य **सम्पादने** पुरुषकृतिसाध्यत्वमङ्गीकर्तव्यमित्यर्थः । ननु वृत्तेरेव ज्ञानरूपत्वेन कथं तत्कृतिसाध्यत्वमित्याशङ्क्य पक्षान्तरमाह–'**प्रमाणस्ये**'ति ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ननु यागस्य साक्षात्कृतिसाध्यत्वमस्तीति तस्यैव धर्मत्वमित्यत आहुः–'**प्रकारे**'ति । प्रकारो विशेषणं तस्य भेदः । यागे साक्षात् यत्कृतिसाध्यत्वं विशेषणं तदेव धर्मत्वे प्रयोजकम् । परम्परया यत्कृतिसाध्यत्वं विशेषणं तद्धर्मत्वे प्रयोजकं न भवतीत्येवंरूपो भेद इत्यर्थः । '**अप्रयोजक**' इति । धर्मत्वे प्रयोजको न भवतीत्यर्थः । साक्षाद्वा परम्परया वा केवलं कृतिसाध्यत्वमेव धर्मत्वे प्रयोजकमिति स्वीकर्तव्यमिति भावः । नन्विदं किमर्थं स्वीकर्तव्यमित्यत आह–'**सर्वस्यापी**'ति । यागरूपधर्मस्य यागजन्मापूर्वरूपधर्मस्याऽपीत्यर्थः । **कारणेषु**, यागे कारणीभूताः क्रियाकलापाः, अपूर्वे कारणीभूताः प्रधानप्रयाजादयः, तेषु सर्वेषु, पुरुषस्य व्यापृतिः यत्नरूपो व्यापारोऽस्तीत्यर्थः । प्रकृते ज्ञान उपसंहरति–'**तदि**'ति । तत्तस्मात्कारणात् । अत्र ब्रह्मज्ञाने । वृत्तिसम्पादने, वृत्तेः सम्पादनं वृत्तिसम्पादनम् । वृत्तेः ब्रह्माकारवृत्तेर्बुद्ध्यवस्थाविशेषरूपाया इति यावत्, सम्पादने उत्पादने । प्रमाणसम्पादने प्रमाणस्य चक्षुरादेर्मनसश्च,

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

पारो दृश्यते, नतु यागादिफले स्वर्गादौ, तथापि तस्मिन् साध्यत्वव्यवहारः । तथा ज्ञानेऽपीत्याहुः–'**तदि**'ति । **तत्तस्मादत्र** ज्ञाने बुद्धिजन्यायाः पदार्थान्तररूपाया वा वृत्तेः सम्पादने । वृत्तेरेव ज्ञानरूपत्वपक्षमाशङ्क्याहुः–'**प्रमाणे**'ति । मनसेन्द्रियैः संयोजनम् । चक्षुष आवृत्तिसम्पादनं वा । **आवृत्तचक्षुरि**ति श्रुतेः । मनसो निर्विषयत्वसम्पादनं वा । **अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुभिरि**ति श्रुतेस्तज्ज्ञेयम् । विपक्षे बाधकमाहुः–'**अन्यथे**'ति । श्रौते सिद्धान्ते **मन्तव्यो निदिध्यासितव्यः, साक्षात्कर्तव्य** इत्यादि वाक्यवैफल्यं स्यात् ।

श्रीलल्लूभट्टकृता गूढार्थदीपिका ।

क्रियासमूह एव पुरुषव्यापारो यत्नात्मा दृश्यते । न तु साक्षाद्धर्मे कृतिजन्यत्वमित्यर्थः । प्रकृते तथात्वमाह–'**तदत्र वृत्ती**'त्यादि । **अत्र** ज्ञाने बुद्ध्यवस्थाविशेषरूपाया वृत्तेः सम्पादने पुरुषकृतिसाध्यता, प्रमाणासाधने वा पुरुषकृतिसाध्यतेत्युभयोस्तौल्यमित्यर्थः । प्रमाणानां चक्षुरादीनां साधने

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

धेयत्वं यागादीनामिव कृतिसाध्यत्वाभावेनाविधेयत्वम् । '**प्रमाणे**'त्यादि । श्रवणमनननिदिध्यासनादिस्वकारणसामग्र्यधीनत्वेनेत्यर्थः । वादी समाधत्ते–'**नही**'त्यादि । '**सर्वात्मने**'त्यादि । तथा च ज्ञानोत्पादकसन्निकर्षादिसामग्रीसम्पादनार्थं कृतेरपेक्षणात् न सर्वात्मना कृत्यसाध्यं ज्ञानम् । परम्परया ज्ञाने कृतिप्रयोज्यतायाः सत्त्वादित्यर्थः । ननु तथापि यागादेरिव साक्षात्कृतिसाध्यत्वाभावान्न कृतिसाध्यं ज्ञानमित्यत आह–'**प्रकारभेद**' इत्यादि । **प्रकारभेदः** साक्षात्कृतिसाध्यत्वरूपप्रकारभेदः । '**अप्रयो-**

नादिशास्त्रवैफल्यापत्तेः साधनप्रतिपादकश्रुतिविरोधश्च येनाऽपि सर्वक्रियाफलत्वं निराकार्यं

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

प्रमाणस्य इन्द्रियस्य वा । **सम्पादने** मनसा सह संयोजने । पुरुषकृतिसाध्यत्वात्सामग्रीसम्पादनद्वारैव श्रवणादीनां तत्साधनत्वमिति भावः । विपक्षे बाधकमाहुः–'**अन्यथे**'ति । यदि सामग्रीसम्पादनद्वारापि न श्रवणादीनां तत्साधनत्वं तदा '**मन्तव्यो निदिध्यासितव्य**' इत्यादिशास्त्रस्य वैफल्यमेव भवेत् । मननादीनां परम्परयापि फलासाधकत्वादित्यर्थः । नन्वेवमेवाऽस्तु किं तेनेत्यत आहुः–'**साधने**'ति । यदि सर्वप्रमाणमूर्द्धन्यो वेदः पण्डसाधनप्रतिपादकः स्यात्तदा मूर्द्धन्यत्ववेदत्वयोः सहाऽनवस्थानलक्षणो विरोधः स्यात् । '**येनाऽपी**'ति । आस्तां तावच्छ्रवणादीनामसाधकत्वं, तथापि '**समित्पाणिः**

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

आवृत्तचक्षुरमृतत्वमिच्छन्निति श्रुत्या चक्षुषि व्यावृतत्वसम्पादने । **अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणे**ति श्रुत्या मनसो निर्विषयत्वसम्पादने, पुरुषप्रयत्नसाध्यत्वमित्यर्थः । ननु वृत्तिसम्पादनादिषु किमर्थं यत्नापेक्षेत्यत आह–'**अन्यथे**'ति । अन्यथा, वृत्तिसम्पादने सर्वथा कृतिसाध्यत्वाऽस्वीकारे । सिद्धान्तेऽपि वेदान्तिमतेऽपि । '**मननादी**'ति । **मन्तव्य** इति विधिवैफल्यापत्तेरित्यर्थः । वृत्त्यादिसम्पादनस्य मननोपकारकत्वात्तत्र कृतिजन्यत्वाऽस्वीकारे तव्यप्रत्ययार्थस्य कृतिसाध्यत्वस्य, तत्राऽभावाद्वैयर्थ्यमिति भावः । सर्वथा ज्ञाने यत्नाऽनादरे दूषणान्तरमाह–'**साधने**'ति । श्रुति-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ननु श्रुतार्थेऽनुपपत्त्यादिपरिहारार्थत्वान्न तद्वैफल्यमित्यत आहुः—'**साधने**'ति । तास्तु, **तपसा ब्रह्म विजिज्ञासस्व, वयसापराणि पञ्चवर्षाणि, शान्तो दान्तः, तमेतं वेदानुवचनेने**त्यादयोऽनुसन्धेयाः । एवमसाध्यतां निरस्य साध्यत्वं दर्शयन्ति–'**येनाऽपी**'ति । उपसं-

श्रीलालुभट्टकृता गूढार्थदीपिका ।

'आवृत्तचक्षुरमृतत्वमिच्छन्नि'ति श्रुतेरावृत्तत्वसम्पादने पुरुषकृतिसाध्यतेति ज्ञानादीनां नाऽविधेयतेत्याकलितव्यम् । ज्ञानादीनामविधेयतास्वीकृतौ दूषणमाह–'**अन्यथे**'त्यादि । यदि ज्ञानादयः सर्वथैवाऽविधेयाः स्युस्तदा 'मन्तव्यो निदिध्यासितव्य' इत्यादिशास्त्राणां वृथात्वं स्यात् । मननादिभिः सिसाधयिषितस्य ज्ञानस्याऽसाध्यत्वात् । असाध्यत्वे दूषणमाह–'**साधनप्रतिपादकश्रुतिविरोधश्चे**'ति । '**तपसा ब्रह्म विजिज्ञासस्वे**'त्यादिश्रुतीनां विरोधो, यदि ज्ञानस्य साध्यत्वं नाङ्गीक्रियत इत्यर्थः । '**येनापी**'त्यादि । येनाप्युत्तरमीमांसावादिना ज्ञाने सर्वक्रियाफलत्वं निराकार्यं तेनाऽपि ज्ञानार्थे

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

जक'इति 'न ममे'त्याकारकेच्छाविशेषस्यैव यागत्वेन यागेऽपि क्रियाकलापजनककृतेः साध्यत्वं परम्परयैव वाच्यम् । तादृशं च सन्निकर्षादिजनककृतिसापेक्षत्वं ज्ञानेऽपीति साक्षात्कृतिजन्यत्वरूपः प्रकारभेदोऽप्रयोजक इत्यर्थः । तदेवोपपादयन्ति–'**सर्वस्ये**'त्यादि । **सर्वस्य** ज्ञानयागादेः । **कारणे** सन्निकर्षादिक्रियाकलापादौ । **पुरुषप्रवृत्तिः** पुरुषकृतिसाध्यत्वं । **अन्यथा** ज्ञानस्य परम्परया कृत्यधीनत्वानङ्गीकारे । **सिद्धान्ते** ज्ञानस्याविधेयत्वाङ्गीकारिमते । **वैफल्यापत्तेः**, तेन शास्त्रेण परम्परया कृत्यधीनत्वं बोध्यते ज्ञानस्य तस्य च भवन्मतेऽनङ्गीकाराद्वैफल्यमित्यर्थः । **साधने**त्यादि । तथा च

२ चेदित्यधिकः पाठः कपुस्तके ।

तेनापि गुरूपसत्त्यादिना यतितव्यमेव ज्ञानार्थे । तस्माद्यत्रापि विध्यश्रवणं तत्रापि विधिं परिकल्प्य तत्रत्यानां तच्छेषत्वं कल्प्यमिति नार्थोऽनया मीमांसया अन्यथा विरोधोऽपि ।

गोस्वामिश्रीमन्मुरलीधरविरचिता अणुभाष्यव्याख्या ।

श्रोत्रियमि'त्यादौ गुरूपसत्त्यादेः सर्वथैवाऽपेक्षितत्वेन सर्वथैव क्रियाफलत्वस्याङ्गीकर्तव्यत्वात् । नहि गुरूपसत्त्यादिकं विना स्वत एव ज्ञानोत्पत्तेस्तदधिकारस्य वा सम्भवोऽस्ति । ननूत्तरकाण्ड **'आत्मेत्येवोपासीते'**त्यादौ विधिश्रवणेऽपि न **'ब्रह्मविदाप्नोती'**त्यादौ विधिश्रवणमस्ति । तथा च तत्रत्याना-मन्येषां वाक्यानां का गतिरिति चेत्तत्राऽऽहुः—**'तस्माद्यत्राऽपी'**ति । यस्मा**'द्वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमि'**त्यादौ तदश्रवणेऽपि द्रव्यदेवतयोः श्रवणेन तदन्यथाऽनुपपत्त्या तत्कल्पनं पूर्वतन्त्रसिद्धम् । तथात्रापि **'ब्रह्मविदाप्नोती'**त्यादौ विधिं परिकल्प्य तत्रत्यानां **'सत्यं ज्ञान'**मित्यादीनां

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

विरोधः, **तपसा ब्रह्म विजिज्ञासस्वे**ति श्रुतिविरोधः । तपःपदस्य यत्ने पर्यवसानमेव । **तप इन्द्रियनिग्रह** इति वाक्यादन्ततो निग्रहे यत्नापेक्षायाः सत्वादिति भावः । कर्मवादी साधारण-रीतिमाश्रित्य वदति—**'येनापी'**ति । **'तेनापी'**ति । येन पुरुषेण साक्षात् परम्परया वा सर्वकृति-फलत्वं लोके पाकादौ, वेदे च यागादौ, स्वीक्रियते । ज्ञाने तु निराक्रियते । तेन पुरुषेणापीत्यर्थः । गुरूपसत्त्यादिना, **समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमि**ति श्रुत्या कृतिजन्यगुरुसमीपगमनरूप-क्रियाजन्यत्वं ज्ञानेऽवश्यं स्वीकर्त्तव्यमित्यर्थः । स्वमतमुपसंहरति—**'तस्मादि'**ति । यत्र वेदान्तवाक्ये तत्रत्यानां वाक्यानां पदानामित्यादिः । तच्छेषत्वं तादृशविध्यङ्गत्वम् । **'अन्यथे'**ति । विध्यकल्पने । **'विरोधोऽपी'**ति । वाक्यभेदेन पूर्वकाण्डेऽन्यप्रतिपादनमुत्तरकाण्डे चाऽन्यप्रतिपादनमित्येवंरूपो

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

हरन्ति—**'तस्मादि'**ति । उक्तरीत्या गतार्थत्वात् । **'यत्राऽपी'**ति । **'ब्रह्मविदाप्नोति परमि'**-त्यादिवाक्ये ससाधनफलमात्रश्रवणं, विधिश्च न । तस्मिन्नपि वाक्ये **वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमि**त्यादिवाक्यवत्परप्राप्तिकामो ब्रह्म विद्यादित्यादिविधिं कल्पयित्वा तत्प्रकरणस्थानां **सत्यं**

श्रीलालूभट्टकृता गूढार्थदीपिका ।

गुरूपसत्त्यादि विधेयमेवेति ज्ञाने गुरूपसत्त्यादिक्रियासाध्यत्वमित्यर्थः । ननु 'आत्मेत्येवोपासीते'त्यादौ विधिश्रवणेऽपि 'ब्रह्मविदाप्नोति परमि'त्यादौ विध्यश्रवणात्तेषां वाक्यानां का गतिरित्याशङ्क्य समाधत्ते—**'तस्माद्यत्रापी'**त्यादिना । यथा 'वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिनमि'त्यादौ विध्यश्रवणे-ऽपि द्रव्यदेवताश्रवणेन तदन्यथानुपपत्त्या विधिकल्पनं पूर्वत्र सिद्धं तथाऽत्रापि 'ब्रह्मविदाप्नोती'त्यादौ विधिं परिकल्प्य तत्रत्यानां 'सत्यं ज्ञानमनन्तमि'त्यादीनां विधिशेषत्वं कल्पयितव्यमिति सर्वत्रैवं निर्वाहे

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

सर्वथा ज्ञानस्य कृत्यसाध्यत्वे 'तपसा ब्रह्म विजिज्ञासस्वे'त्यादिसाधनबोधकश्रुतिविरोध इति भावः । **सर्वक्रिये**त्यादि । साक्षात्परम्पराकृतिसामान्यफलत्वं निराकार्यमित्यर्थः । **यत्रापि** उत्तरकाण्डे 'ब्रह्म-विदाप्नोति पर'मित्यादिवाक्येषु । **विध्यश्रवणं** ब्रह्मविदाप्नुयादित्याकारकविध्यश्रवणम् । **विधिं परिकल्प्य** आप्नोतीत्यस्य पञ्चमलकारत्वं परिकल्प्येत्यर्थः । **तत्रत्यानां** 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्या-दिवाक्यानाम् । **तच्छेषत्वं** तद्विध्येकवाक्यतया प्रामाण्यमुरीकार्यमित्यर्थः । **इतीति** हेतौ । पूर्वोक्त-

स्यादेतत् । ब्रह्मविचार एवारम्भणीयो न धर्मविचारः । सर्ववेदव्यासकर्त्रा वेदव्यासेनाऽकृ-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

तच्छेषत्वं कल्प्यमिति पूर्वयैव[1] गतार्थत्वान्नाऽनयोत्तरया मीमांसयाऽर्थः प्रयोजनं सेत्स्यतीत्यस्या अकरणमेवापतति । नहि प्रयोजनमनुद्दिश्य कस्यापि प्रवृत्तिर्दृष्टा । ननु नात्र ब्रह्मविदाप्नोतीत्यादौ विधिकल्पनम् । वाक्यार्थमात्रप्रतिपादकत्वेनैव वाक्यानां निराकाङ्क्षत्वादित्याशङ्क्य परिहरन्ति–'**अन्यथे**'ति । **अन्यथा** विध्यकल्पने । तत्रत्यानां विधिशेषत्वाभावेन सिद्धार्थप्रतिपादकत्वात् । आम्नायस्य सर्वस्यापि क्रियार्थत्वमिति पूर्वतन्त्रसिद्धान्तस्य विरोधोऽपि भवेदित्यर्थः ।

अत्र सिद्धान्तैकदेशी प्रत्यवतिष्ठते । '**स्यादेतदि**'ति । यदुक्तं निष्प्रयोजनं नाऽऽरम्भणीयमिति तत्तु स्यादेव । तर्हि किमनुपपन्नमिति चेत्तत्राऽऽहुः–'**ब्रह्मे**'ति । ब्रह्मजिज्ञासैवाऽऽरम्भणीया, न धर्मजिज्ञासेति वैपरीत्यस्यैव वक्तुमुचितत्वात् । धर्मजिज्ञासाया निष्प्रयोजनत्वात् । कथं तदित्याकाङ्क्षायामुपपत्तिमाह—'**सर्ववेदे**'ति । व्यासो हि सर्वज्ञो भगवद्रूपः सर्वस्यैव वेदस्य विस्तारं कृतवान् । नहि ब्रह्मस्व-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

विरोध इत्यर्थः । अपिपदेन सर्वस्य वेदस्य धर्मप्रतिपादकाऽभावे, **वेदोऽखिलो धर्ममूलमिति** स्मृतिविरोधोऽपि संगृह्यते । वितण्डावादी प्रत्यवतिष्ठते–'**स्यादेतदि**'ति । वेदव्यासकर्त्रा वेदविभागकर्त्रा । सर्वज्ञेनेति यावत् । तुच्छफलत्वात् पुनरावृत्त्या स्वर्गस्य तुच्छफलत्वात् ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ज्ञानमनन्तं ब्रह्मेत्यादिवाक्यानां तद्विधिशेषत्वं कल्पनीयमिति न प्रयोजनमनयोत्तरमीमांसया । '**अन्यथे**'ति । उक्तविधोत्तरकाण्डविचारानङ्गीकार आम्नायस्य क्रियार्थत्वरूपपूर्वतन्त्रसिद्धान्तविरोधः । अपिना, **वेदोऽखिलो धर्ममूलमि**ति स्मृतिविरोधः संगृहीतः ।

अत्र सिद्धान्तैकदेशी प्रत्यवतिष्ठते–'**स्यादेतदि**'ति । **एतद्व**क्ष्यमाणं पूर्वमीमांसाया एव वैयर्थ्यम् । '**ब्रह्मे**'ति । सप्रयोजनत्वाद्ब्रह्मविचारस्तथा । निष्प्रयोजनत्वं दर्शयन्ति–'**सर्ववेदे**'ति ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

पूर्वमीमांसयैवोत्तरमीमांसाया गतार्थत्वमित्यर्थः । '**अन्यथा विरोधोऽपी**'ति । विधिक-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

रकाण्डद्वयार्थस्यापि पूर्वमीमांसयैव गतार्थत्वात् हेतोः । '**नार्थोऽनये**'त्यादि । **अनया** उत्तरमीमांसया । **नार्थः** न प्रयोजनम् । इत्थं तथा च 'प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तत' इतिन्यायादुत्तरमीमांसायां प्रवृत्तिरेव न सम्भवतीत्यर्थः । **अन्यथा** 'ब्रह्मविदाप्नोति परमि'त्यत्र विधिं परिकल्प्य तत्रत्यवाक्यानां तदेकवाक्यतया प्रामाण्यमित्यस्य पक्षस्यानङ्गीकारे । **विरोधोपि** उत्तरकाण्डस्य सर्वस्य सिद्धार्थमात्रबोधकतया गतार्थत्वाङ्गीकारे **विरोधः** । 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थाना'मिति स्मृतिबलादुत्तरकाण्डस्यानर्थक्यापत्तिरूपो विरोध इति भावः ।

सिद्धान्तैकदेशी पूर्ववादिसिद्धान्तं दूषयितुं प्रत्यवतिष्ठते–'**स्यादेतदि**'ति । **एतत्** वक्ष्यमाणं पूर्वमीमांसाया अपि निःप्रयोजनत्वम् । तदेवोपपादयति–**ब्रह्मे**त्यादिना । **सर्ववेदव्यासकर्त्रा** सर्व-

१ पूर्वरूपैवेति कपुस्तकम् ।

तत्वात्तुच्छफलत्वाच्च । कल्पोक्तप्रकारेण निःसन्दिग्धं करणसम्भवाच्च । आचारपरम्परयापि करणसम्भवाच्च । एतर्ह्यपि सन्देहे सूत्रभाष्ययाज्ञिकानामेवानुवृत्तिः क्रियते । न मीमांस-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

रूपं तदतिरिक्तेन ज्ञातुं शक्यम् । '**न हि ते भगवन् व्यक्तिमि**'तिवाक्यात् । तथा च यदि धर्मजिज्ञासया किञ्चित्प्रयोजनं सिद्ध्येज्जीवानां तदा तदुपयोगित्वेन तेनैव सा कृता स्यात् । न चैवम् । तदेतदुक्तं 'सर्ववेदव्यासकर्त्रा वेदव्यासेनाकृतत्वादि'ति ।

किञ्च । धर्मजिज्ञासा हि तदनुष्ठानफला । नहि तदनुष्ठानं पुरुषार्थपर्यवसायि । '**तद्यथेह कर्मजितो लोकः क्षीयत**' इति श्रुतेः । ननु धर्मानुष्ठानस्यापि निष्कामस्य चित्तशुद्धिद्वारा पुरुषार्थपर्यवसायित्वं सर्वत्र श्रूयते । तथा च कथमकर्तव्यत्याशङ्क्याऽऽह—'**कल्पोक्तप्रकारेणे**'ति । निष्कामस्य तस्य पुरुषार्थपर्यवसायित्वेऽपि कल्पसूत्रोक्तप्रकारेणैव तदुपपत्तौ जिज्ञासाया निष्प्रयोजनत्वमेव । ननु कल्पसूत्ररहस्याऽनवबोधे, जिज्ञासैव शरणमिति चेत्तत्राऽऽहुः—'**आचारे**'ति । '**श्रुतिः स्मृतिः**

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ननु पूर्वमीमांसाभावे केवलं स्वर्गकामनावता पुरुषेण कथं यागः कर्तव्य इत्यत आह— '**कल्पोक्ते**'ति । तत्रापि संशये सत्याह—'**आचारे**'ति । इदानीं स्वर्गकामनार्थं यागः कर्तव्य इति

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

अनेकधा वेदविभागकर्त्रा । निष्प्रयोजनत्वेनैव तथात्वात् । तथाच सर्ववेदव्यासकर्तुः सर्वज्ञस्य तत्करणे कः प्रयासःस्यादतोऽकरणान्निष्प्रयोजनत्वमेव तस्य दर्शितं भगवद्व्यासचरणैरितिभावः । ननु धर्मज्ञानफलत्वात्कथं वैयर्थ्यमित्यत आहुः—'**तुच्छे**'ति । **तद्यथेह कर्मजितो लोकः क्षीयत** इतिश्रुतेः क्षयिष्णुत्वात् । ननु धर्मानुष्ठानफलकस्य तस्य कथं वैयर्थ्यम् । निष्कामस्य तस्य चित्तशुद्धिद्वारा ज्ञानफलत्वाद्ब्रह्मज्ञानार्थं तद्विचार आवश्यक इत्याहुः—'**कल्पोक्ते**'ति । ननु कल्पसूत्रैः कर्तव्यताप्रकारः प्रदर्श्यते, ननु कर्तव्यतासन्देहो निरस्यत इति तदर्थं तदावश्यकतेत्यत आहुः— '**एतर्ही**'ति । आचारपरम्परासन्देहे । '**सूत्रे**'ति । कल्पसूत्रम् । भाष्यम् । **याज्ञिकाः** कृतकारित-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ल्पन ऐकार्थ्याभावेन वाक्यभेदापत्तावैकशास्त्र्यविरोध इत्यर्थः । '**कल्पोक्तप्रकारेणे**'त्यादि । कल्प-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

वेदार्थतत्त्ववेत्रा इत्यर्थः । **तुच्छफलत्वात्** । 'तद्यथेह कर्मजितो लोकः क्षीयत' इतिश्रुत्युक्तसान्तफलप्रतिपादकत्वेन तुच्छफलत्वादित्यर्थः । ननु निष्कामकृतकर्मणामपि पुरुषार्थपर्यवसायित्वात्तादृशधर्मानुष्ठानार्थं पूर्वमीमांसा सप्रयोजना भविष्यतीत्यतः **कल्पोक्तेत्यादि** । कल्पसूत्रोक्तेतिकर्तव्यतामादाय निःसन्दिग्धं करणसम्भवादित्यर्थः । ननु यस्य सूत्रार्थनिर्णयो न जातस्तस्य धर्मानुष्ठानार्थं धर्ममीमांसावश्यकतैवेत्यत आहुः । '**आचारे**'त्यादि । तथा 'श्रुतिः स्मृतिः सदाचार' इत्यत्र सदाचारस्यापि धर्महेतुत्वेन निरूपणात्परम्पराचारदर्शनादेव धर्मानुष्ठानसम्भवादप्रयोजिकैव धर्ममीमांसेत्यर्थः । नन्वाचारेपि मूलान्वेषणेच्छायां आचारस्यानुष्ठापकत्वासम्भवान्मीमांसावश्यकतेत्यत आहुः—'**एतर्ह्यपी**'त्यादि । आचारस्य समूलकतासन्देहेपि । **सन्देहे** अनुष्ठानप्रकारसन्देहे । **सूत्रभाष्यं** कल्पसूत्रभाष्यं **याज्ञिकानां** निरन्तरयज्ञानुष्ठानशीलानाम् । **करणसम्भवात्** यज्ञादिकरणसंभवादित्यर्थः । धर्ममीमांसायाः

कस्य। तस्मात्साङ्गवेदाध्येतुर्निःसन्देहकरणसम्भवान्न पूर्वयापि कृत्यम्। किञ्च परमकृपालुर्वेदः संसारिणः संसारान्मोचयितुं कर्माणि चित्तशुद्ध्यर्थं बोधितवानिति कूपेऽन्धपातनवदप्रामाणिकत्वभियाऽवसीयते। विपरीतबोधिका तु पूर्वमीमांसा। तस्मादपि न कर्तव्येति।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

'सदाचार' इत्यादौ सदाचारस्यापि धर्महेतुत्वश्रवणात्तेनैव तत्सम्भवे जिज्ञासा निरर्थिकेति भावः। ननु सदाचारेऽप्युपपत्त्यपेक्षायां किं कर्तव्यमिति चेत्तत्राऽऽहुः **'एतद्व्यपी'**ति। परम्पराप्राप्ताचारदर्शनानन्तरमपि सन्देहे कल्पसूत्रभाष्यं द्रष्टव्यम्। तेनैव सन्देहनिवृत्तेः सम्भवादित्यर्थः। ननु तत्राप्यशक्तौ किं विधेयमित्यत आहुः—**'याज्ञिकानामि'**ति। ये हि याज्ञिकास्ते सूत्रतद्भाष्यद्रष्टारस्तथा च तदनुवृत्तौ सर्वमेव सेत्स्यतीति न धर्मज्ञानार्थं मीमांसकस्य कस्याप्यनुवृत्तिः कर्तव्या। मीमांसको हि धर्मजिज्ञासाद्वारैव तद्बोधकः। तथा च याज्ञिकेनैव तद्बोधे सिद्धे न तदनुवृत्तिः कर्तव्येति भावः। उपसंहरन्ति **'तस्मादि'**ति। यस्मात्स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिः साङ्गमेव स्वाध्यायमध्ययनविषयत्वेनाऽऽकाङ्क्षते। तच्चोपनयनादिसापेक्षम्। तच्च श्रोत्रियसापेक्षमिति स्थितिः। तस्मात्साङ्गाध्ययनकर्तुः पूर्वोक्तकल्पादिकारणकलापैस्तदर्थानुष्ठानस्य निःसन्दिग्धं करणसम्भवान्न पूर्वयाऽपि धर्ममीमांसया कृत्यं कर्तव्यमस्तीत्यस्या अपि निष्प्रयोजनत्वादकर्तव्येयमिति भावः। धर्ममीमांसारम्भे दूषणान्तरमाहुः—**'किञ्चे'**ति। **'स वै नैव रेमे तस्मादेकाकी न रमत'** इति श्रुतावेकाकिनो

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

श्रुत्यभिप्रायो नास्तीति वदति **'किञ्चे'**ति। वेदः स्वस्मिन्न प्रामाणिकत्वभिया संसाराख्यान्धकूपपतितान् चित्तशुद्धिद्वारोद्धर्तुं कर्माणि बोधितवानित्यवसीयत इत्यर्थः। कामनां तु प्रवृत्त्यर्थं बोधितवा-

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

यागाः। सूत्रेतिपदे द्वन्द्वः। उपसंहरति—**'तस्मादि'**ति। अपि हि। पूर्वपक्षगर्हायाम्। धर्ममीमांसारम्भे दूषणान्तरमाहुः—**'किञ्चे'**त्यादिना। **'विपरीते'**ति। स्वर्गाद्यभिलाषिणोऽधिकारित्वनिरूपणेन संसा-

श्रीलालूभट्टकृता गूढार्थदीपिका।

सूत्रोक्तप्रकारेणैव निःसन्दिग्धकर्मकरणसम्भवात्पूर्वमीमांसा न कर्तव्येत्यर्थः। **'आचारपरम्परये'**त्यादि। 'श्रुतिः स्मृतिः सदाचार' इति वाक्येन सदाचारेणैव निःसन्दिग्धप्रवृत्तेः पूर्वमीमांसा निरर्थिकैवेत्यर्थः। **'एतद्व्यपि सन्देह'** इत्यादि। परम्पराप्राप्तसदाचारदर्शनानन्तरमपि सन्देहे कल्पसूत्रभाष्यं द्रष्टव्यम्। तत्राप्यसामर्थ्ये याज्ञिकानुवृत्तिः कर्तव्या। न तु पूर्वमीमांसायाः प्रयोगकत्वमित्यर्थः। **'परमकृपालुरि'**त्यादि। **'कूपेऽन्धपातनवदप्रामाणिकत्वभिये'**त्यवसीयत इत्यन्वयः। तथाच यथा कूपेऽन्धस्य पातनमप्रामाणिककार्यं तद्वद्वेदोऽपि संसाराऽऽसक्तत्वेनान्धान्पारमार्थिकदृष्टिरहितान्पशुपुत्रादिफलेषु योजयंश्चेद्भवेत्तदा ह्यप्रामाणिकः स्यादेवं वेदेष्वप्रामाणिकत्वभिया वेदश्चित्तशुद्ध्यर्थं

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

प्रकारान्तरेणाप्रयोजकत्वं सिद्धान्तैकदेशी साधयति—**'किञ्चे'**ति। **संसारिणः** सांसारिकभोगात् परमपुरुषार्थत्वेन मन्यमानान्। **संसारात्** सांसारिकभोगेभ्यः। **चित्तशुद्ध्यर्थं** चित्तशुद्धिद्वारा मोक्षप्राप्त्यर्थं। इतीत्यवसीयत इत्यत्रान्वेति। **'कूपे'**त्यादि। इत्थं च चित्तशुद्धिद्वारा मोक्षार्थं कर्मकृतिबोधकः परमकृपालुर्वेदात्मको भगवान् संसारमध्यपातिक्षयिष्णुस्वर्गादिफलार्थं जीवान्

मैवम् । किं विचारमात्रं न कर्तव्यं, पूर्वकाण्डविचारो वा ?। नाद्यः । तुल्यत्वात् । सम-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

वैचित्र्यं विना रमणासम्भवादनेकभूतभौतिकदेवतिर्यङ्मनुष्यानेकलोकाद्भुतरचनायुक्तब्रह्माण्डकोटिरूप-प्रपञ्चरूपेणाऽऽविर्भावोक्तेः । तत्राऽऽसक्तानां तु सूक्ष्मपरिमाणानां तदासक्तिजन्यानेकविधदुःखोपप्लुतत्वदर्शनेन निरुपधिपरदुःखप्रहाणेच्छया तदुपायमन्विष्यमाणः स्वयं वेदरूपेणाऽऽविर्बभूव । तत्र चाग्निहोत्रादीनि कर्माणि तदुपायत्वेन बोधितवानिति गम्यते । ननु तत्र स्वर्गकामादिपदानां सत्त्वात्कथं तेषां तदुपायत्वं वक्तुं शक्यमिति चेत् । उच्यते । वेदो हि सर्वानेव संसारिणस्तत्तापतप्तास्ततो मोचयितुमेव स्वात्मानं प्रकटीचकार । अन्यथा वेदस्याप्यत्यन्ताऽऽसक्तिजनकत्वेन प्रतारकत्वादप्रामाणिकत्वप्रसङ्गात् । तथा च स्वर्गकामादिपदानां प्रथमतः प्ररोचनार्थत्वेन सांसारिकानेकविधकर्मभ्यस्तद्विमुखीकरणमेव प्रयोजनमित्यर्थापत्त्या गम्यते । तथा च चित्तशुद्ध्यर्थकान्येव कर्माणीति निश्चीयते । पूर्वमीमांसा तु तद्विपरीतस्य कामितफलजनकत्वस्य बोधिकेतोऽपि स्वेष्टसाधनतत्परैः कर्तव्येत्यर्थः । तदेवं सिद्धान्तैकदेशिनि प्रत्यवस्थिते पुनः पूर्वपक्षी समाधत्ते–'**मैव**'मिति । एवं

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

निति भावः । अप्रामाणिकांशे दृष्टान्तमाह–'**कूपे**'ति । अयमेव मार्ग इति केनचित्प्रतारकेण कूपेऽन्धस्य पातनं यथा क्रियते तद्वदित्यर्थः । '**अपी**'ति । परा न कर्तव्या चेदस्तु नाम परन्तु पूर्वा त्वयापि न कर्तव्येत्ययमर्थोऽपिशब्देन ध्वन्यते । एतेनाऽस्य वैतण्डिकत्वं बोध्यम्, इदं च वैतण्डिकत्वं तवैव शोभते न ममेत्यभिमानेन स्वमतस्थापनं कर्तुं मीमांसकः समाधत्ते–'**मैवमि**'ति । '**तुल्यत्वादि**'ति । परमते यद्दूषणं तदेव स्वमते चेन्नोद्भाव्यमिति भावः । ननु मयापि स्वीक्रियतेऽयं दोष इत्यत आह–

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

राऽऽसक्तिजनिका । उत्तरकाण्डविचारस्य पूर्वमस्माभिर्दूषितत्वात्पूर्वकाण्डविचारस्याऽपि त्वन्मनोविचारेण दुष्टत्वाद्विचारमात्रं न कर्तव्यमुत पूर्वकाण्डविचारो वेति विकल्प्य दूषयन्ति '**किमि**'त्या-

श्रीलाल्लुभट्टकृता गूढार्थदीपिका ।

कर्माणि बोधितवानित्याशयो निगमानामवसीयते । पूर्वमीमांसा तु नैवं वदतीत्यतोऽपि पूर्वमीमांसा न कर्त्तव्येत्यर्थः ।

ननु 'फलार्थको धर्म' इत्येव जैमिनिसूत्रभाष्ये दृश्यते नत्वाम्नायाभिप्रेतचित्तशुद्ध्यर्थकत्वमतो वेद-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

कूपतुल्यकर्मगहनेऽन्धतुल्यान् प्रक्षिपन् प्रतारकोऽप्रामाणिकश्च भवेत् तत्त्वभिया मोक्षार्थं कर्माणि बोधितवानिति । **अवसीयते** फलितोऽर्थः । ननु तथापि क्षयिष्णुफलार्थं कर्मगहने पातयतः प्रतारकत्वं कथं वारितमिति चेत्—इत्थम् । नरकहेतुसांसारिककर्मभ्यस्तेषां जीवानां निवृत्त्यर्थं प्ररोचनार्थं वैदिके कर्मणि तादृशी फलश्रुतिः कृता । तथा सति पापाभावेन सत्संगेनेव कदाचित् चित्तशुद्ध्या कामाभावे सति मोक्षोऽपि भवेत् । इत्यत्र वेदतात्पर्यादिति न प्रतारकत्वगन्धोपीत्यवसेयम्। **विपरीतबोधिका** वेदातात्पर्यविषयक्षयिष्णुसांसारिकफले वेदतात्पर्यनिर्द्धारिका ।

इतः परं सिद्धान्तैकदेशिदूषणं समाधातुं पूर्वपक्षी प्रतिवदति—'**मैव**'मिति । पूर्वपक्षी पृच्छति '**किमि**'त्यादिना । विचारमात्रं मया न कर्तव्यं पूर्वकाण्डविचारो वेति ? नाद्यः । विचारमात्रं त्वया न

र्थितत्वाच्च। द्वितीये सामान्यन्यायेन सन्देहे निवार्ये लक्षणवत्तदुपयोगः। अनिष्टतया निरू-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

पूर्वकाण्डविचारो न कर्तव्य इति न वक्तव्यम्। यत उत्तरकाण्डविचारस्यास्माभिर्निराकृतेन किं विचारमात्रं न कर्तव्यमुत पूर्वकाण्डविचार एव न कर्तव्य इति विकल्प्य दूषयति–'**नाद्य**'इति। तत्र हेतुमाहुः'**तुल्यत्वादि**'ति। यथाह्यस्माकं धर्मविचार एवेष्टो न ब्रह्मविचारः। तस्य पूर्वेणैव गतार्थ-त्वात्तथा विचारमात्रस्याकर्तव्यत्वे धर्मविचारवद्ब्रह्मविचारस्यापि तुल्ययोगक्षेमत्वे नोभयोरपि पक्षयोः, समीहितसिद्धभावस्य तुल्यत्वात्, हेत्वन्तरमाहुः–'**समर्थितत्वाच्चे**'ति। न हि विचारमात्रं न कर्तव्य-मित्यत्र विनिगमकमस्ति। विचारमात्रस्य सर्वत्र फलवत्वस्य दृष्टत्वात्। तस्य च निषेधे मानाभावात्। द्वितीयं पक्षं दूषयति–'**द्वितीयमि**'ति। तथा सति विरुद्धशास्त्रसंभेदजन्यबुद्धिदोषोद्भूतसन्देह-वारकत्वेन ब्रह्मविचार एव कर्तव्यो न धर्मविचार इति सिद्धं भवति, तस्य कल्पसूत्रादिसाधनैरन्यथा सिद्धत्वात्। न चैवं शास्यतेऽनेनेति व्युत्पत्त्या शास्त्रमात्रस्य सन्देहवारकत्वेन धर्मजिज्ञासाया अपि

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

'**समर्थितत्वादि**'ति। त्वया तु अप्रतिज्ञानादित्यादिना विचारः प्रतिपादित एवेत्यर्थः। '**सन्देह**' इति। **तं हैतमेके पशुबन्ध एवोत्तरवेद्यां चिन्वत** इतिश्रुत्या पशुबन्धे, नाचिकेताङ्गत्वेन **अक्ताः शर्करा उपदधाती**ति विधिना शर्करोपधाने विहितं तत्र घृताक्ता वा तैलाक्ता वा इति सन्देहे **तेजो वै घृत**मितिवाक्यशेषात् घृताक्ता एव शर्करा ग्राह्येति पूर्वमीमांसाया उपयोग इत्यर्थः। '**लक्षणवदि**'ति। प्रातिशाख्यवदित्यर्थः। इदं चोक्तं प्राक्। ननु पुनरावृत्तिरनिष्टा। स्वर्गे च पुनरावृत्तिश्रवणादनिष्टजनकयागादिप्रतिपादकत्वात्पूर्वमीमांसायां दोष इत्यत आह–'**अनि-ष्टतये**'ति। वेदे तु कामनाश्रवणं प्रवृत्त्यर्थम्। सूत्रस्य वेदतात्पर्यावगाहित्वान्नायं मीमांसादोष

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

दिना। '**तुल्यत्वादि**'ति। आवयोस्तुल्यत्वात्। '**समर्थित्वादि**'ति। भवतैवेति शेषः। '**सामा-न्ये**'ति। **वेदमधीत्य स्नायादि**तिवाक्यादधीते वेदे गुरुकुलात्समावर्तितव्यमुत, **दृष्टो हि त-स्यार्थः कर्मावबोधनं नामे**ति वेदवाक्यानि विचारयितव्यानीति सामान्यन्यायेन प्राप्ते सन्देहे निवार्ये लक्षणवत्कल्पसूत्रवन्मीमांसोपयोगः। ननूक्तं विपरीतबोधिका हि सेति। तत्रोच्यते–'**अनि-ष्टतये**'ति। विचारकर्तृदोषो विचारे न सिद्ध्यतीति भावः। तस्य स्वरूपतो दोषराहित्यात्।

श्रीलालूभट्टकृता गूढार्थदीपिका।

विपरीताऽर्थज्ञापकत्वान्मीमांसाया अप्रामाण्यमेवेत्याशङ्क्य परिहरति—'**अनिष्टतये**'ति। अनिष्टवेदेनाऽ

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

कर्तव्यमिति नेत्यर्थः। **तुल्यत्वात्** उत्तरमीमांसाविचारकर्त्रा त्वया ममापि तुल्यत्वात्। यथोत्तरमी-मांसाविचारस्तवेष्टस्तथा पूर्वमीमांसाविचारो ममापीति तुल्यता। दूषणान्तरमाह–'**समर्थितत्वाच्चे**'-ति। त्वयोत्तरमीमांसाविचारो विधेयो मया च पूर्वमीमांसाविचारो न विधेय इत्यत्र विनिगमकाभावेन समर्थितत्वादित्यर्थः। **द्वितीये** पूर्वकाण्डविचारो न कर्तव्य इतिपक्षे। तथा चोत्तरमीमांसाविचार एव कर्तव्यो महाफलत्वात्। न तु पूर्वमीमांसाविचारोऽपि। कल्पसूत्रसदाचारादिनाऽन्यथासिद्धत्वादिति

१—उपसंहरतीति खपुस्तकम्।

पणं न मीमांसादोषः । किन्तु विचारकाणाम् । स्वभावभेदात् । किञ्च, आवश्यकत्वादपि ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

सन्देहवारकत्वस्य दुर्निवारत्वेन कल्पसूत्रादिवत्तदुपयोगस्यापि सम्भवान्नाकर्तव्यत्वम् । तत्र दृष्टान्तमाह–'**लक्षणे**'ति । कल्पादीनां सत्वेऽपि प्रातिशाख्ये लक्षणानां करणं कल्पादिसाधनाऽसाध्यसन्देहवारकं तथायमपीति भावः ।

ननूक्तं सर्वत्र जैमिनीयसूत्रभाष्ये फलोद्देशेनैव धर्मनिरूपणस्योपलभ्यमानत्वान्मीमांसाया आम्नायाभिप्रेतचित्तशुद्ध्यर्थकत्वविपरीतबोधकत्वेनाप्रामाण्यं स्यादित्य आह–'**अनिष्टतये**'ति । न हि सूत्रार्थविचारकर्तृभिस्तथा निरूपणे सूत्रकारः पर्यनुयोगार्हो भवति । ननु तेऽपि महान्तः कथमेवमुक्तवन्तस्तत्राऽऽह–'**स्वभावभेदादि**'ति । वेदो हि विशिष्टार्थप्रतिपादकस्तज्ज्ञानं च न लौकिकैः साधनैर्भवितुमर्हति । किन्त्वलौकिकैस्तपःप्रभृतिभिः । अत एव भृगोर्वरुणान्तिके पुनःपुनर्गमनं योग्यतासम्पत्त्यनन्तरं च तद्बोधे पुनर्गमनाऽभावश्च । तथा च विचारकाणामलौकिकसाधनाभावात्स्वस्वभावानुसारेण निर्णये तथोक्तवन्त इत्यर्थः । धर्मविचारस्य कर्तव्यत्वे साधकान्तरमाह–किञ्च । आवश्यकत्वादपीति । यागादिज्ञानार्थं हि धर्ममीमांसा । तज्ज्ञानं हि न सकामानामेवेष्टं येन

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

इत्यर्थः । ननु केषांचित् मीमांसाविचारकाणां ग्रन्थे 'स्वर्गार्थं सोमेन यक्ष्य' इत्यादिसङ्कल्पो दृश्यत इति चेत्तेषामेव दोष इत्याह–'**विचारकाणामि**'ति । ननु सदा मीमांसया विचारं कुर्वन्ति तेषामयं दोषः कथमित्यत आह–'**स्वभावभेदादि**'ति । **तेषां प्रकृतिवैचित्र्यादि**त्येकादशस्कन्धोक्तत्वादित्यर्थः । ननु स्वर्गादिकामना तु प्रवृत्त्यर्था । अन्यत्किञ्चित्फलं तु न दृश्यत इति तवैवास्या आवश्यकत्वमस्त्वित्यत आह–'**किञ्चे**'ति । '**अपी**'ति । त्वयापि पूर्वमीमांसाकर्त्रेतिशेषः । आवश्यकत्व-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

कर्तृदोषे हेतुमाहुः—'**स्वभावे**'ति । **तेषां प्रकृतिवैचित्र्यादि**त्येकादशीयवाक्योक्तरीतिकात् उपयोगे हेत्वन्तरमाहुः—'**किञ्चे**'त्यादिना । '**आवश्यकत्वादि**'ति । अत्र कर्तव्य इति शेषः ।

श्रीलालुभट्टकृता गूढार्थदीपिका ।

भिप्रायविषयीकृतो योर्थस्तत्परत्वेन यत्सूत्रभाष्ये निरूपणं तन्न सूत्रकृतो दोषः, किन्तु भाष्यकारस्य । अतः सूत्ररूपस्य मीमांसाशास्त्रस्य निर्दुष्टत्वमेवेत्यर्थः । '**आवश्यकत्वादपी**'ति । फलकाङ्क्षातो

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

सिद्धान्तैकदेश्यभिप्रायः । पूर्वपक्षी समाधत्ते—'**सामान्ये**'त्यादिना । **सामान्यन्यायेन** कर्मानुष्ठाने येन केनचित्सन्देहे निवार्य इत्यर्थः । **लक्षणवत्** कल्पसूत्राणां सन्देहवारकाणां सत्त्वेऽप्यसाधारणसन्देहवारणार्थं यथा प्रातिशाख्यलक्षणानां करणं तथा तद्विलक्षणसन्देहवारणार्थं धर्मविचारस्याप्युपयोग इति भावार्थः । ननु चित्तशुद्धिद्वारा कर्मणां मोक्ष उपयोगो वेदतात्पर्यविषयस्तद्विपरीतं सकामाधिकारकं विनाशिफलं वेदतात्पर्यविषय इति निरूपणं पूर्वमीमांसायाः दोष इत्यत आह–'**अनिष्टतये**'त्यादि । तथा च सूत्रेषु न क्वापि विनाशिफलसाधकत्वं कर्मणां वेदतात्पर्यविषय इत्युक्तमिति न मीमांसादोष इत्यर्थः । **विचारकाणां** सूत्रभाष्यकाराणाम् । **स्वभावभेदात्** कर्मैव ब्रह्मेति ज्ञानप्रयोजकस्वभाववत्वादित्यर्थः । **आवश्यकत्वात्** कर्मविचारस्यावश्यकत्वादपि कर्तव्यतेत्यर्थः । आवश्यकतामेवोपपाद-

निवृत्तानामपि यागादिज्ञानस्य[1] आवश्यकत्वम् । चित्तशुद्ध्यर्थत्वात् । परमाश्रमभेदेन प्रकारभेदः । कायिकादिभेदात् । तत्राद्यस्य वाचिको द्वितीयतृतीययोः कायिकश्चतुर्थस्य मानसिक इत्याश्रमिणाम् । तस्मादेकेनैव चरितार्थत्वात्किं द्वितीयेनेति प्राप्ते—

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

मीमांसाया विपरीतबाधकत्वमेव निश्चिनुमः । किन्तु निवृत्तानामपि फलानुसन्धाने रहितानामपि यागादिज्ञानस्यावश्यकत्वम् । चित्तशुद्धिजनकत्वेन तेषामपि कर्मकरणापेक्षायाः सत्वात् । तच्च ज्ञानसापेक्षं ज्ञानं च मीमांसासापेक्षमिति विपरीतबोधकत्वाभावात्सर्वथैव कर्तव्येति भावः । ननु निवृत्तानामुपकरणाभावेन तत्करणासम्भवान्न मीमांसापेक्षेत्याशङ्क्य प्रकारभेदेन तत्करणं दृढीकरोति । '**परमाश्रमभेदेने**'ति । वस्तुतस्त्वेक एव यज्ञः परं शाखाभेदादिव कायिकादिभेदात्प्रकारभेदः । कायिकादिभेदमेव विवृणोति—'**तत्रे**'ति । आद्यस्य ब्रह्मचारिणः । वाचिकः स्वाध्याययज्ञः । द्वितीयतृतीययोर्गृहस्थ-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

मेवाऽऽह—'**निवृत्तानामपी**'ति । '**प्रकारभेद**' इति । कायिकवाचिकमानसिकभेदात्प्रकारभेद इत्यर्थः । आद्यस्य ब्रह्मचारिणः । तस्य वेदपाठे एवाऽधिकारत्वात् । एवमग्रेऽपि बोध्यम् । उपसंहरति—

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

तदेवाहुः—'**निवृत्तानामि**'ति । '**चित्ते**'ति । यागस्येति शेषः । ननु वित्तानामुपकरणाऽभावे तत्करणाऽसम्भवान्न तदपेक्षेत्यत आहुः—'**परमि**'ति । **आद्यस्य** ब्रह्मचारिणः । '**द्वितीये**'ति । गृहस्थवानप्रस्थयोश्चतुर्थः परिव्राड् '**आश्रमिणामि**'ति । तदुपयोग इति शेषः । '**तस्मादि**'ति । आवश्यकत्वात् । एकेन पूर्वविचारेण पुरुषार्थसिद्धेः । द्वितीयेनोत्तरकाण्डविचारेण । एतन्मत उक्तप्रकारेण

श्रीलालूभट्टकृता गूढार्थदीपिका ।

निवृत्तानामपि चित्तशुद्ध्यर्थं यागकरणस्याऽऽवश्यकत्वात् यागकरणस्य योगादिज्ञानाऽधीनत्वाद्यागादिज्ञानस्य मीमांसाधीनत्वान्मीमांसाया आवश्यकत्वादपि लक्षणावत्तदुपयोग इति पूर्वेणान्वयः । तथा च यागस्य आश्रमभेदेन प्रकारभेदात्सर्वैरेवं यागः कर्तव्य इति शास्त्रार्थात्सर्वेषां कर्ममीमांसाया अपेक्षेति मीमांसाया आवश्यकत्वम् । '**तत्राऽऽद्यस्ये**'ति । आद्यस्य ब्रह्मचारिणो वाचिको यागः स्वाध्यायाध्ययनात्मकः । '**द्वितीयतृतीययोः**' कायिक इति । गृहस्थवानप्रस्थयोः कायिको याग इत्यर्थः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

यति—'**निवृत्ताना**'मित्यादिना । **निवृत्तानां** निष्कामानां मुमुक्षूणामित्यर्थः । '**यागादी**'त्यादि । तथा च यागादिज्ञानार्थं पूर्वमीमांसायाः आवश्यकत्वमित्यर्थः । ननु निवृत्तानां ब्रह्मचारिपरमहंसादीनां यज्ञसामग्र्या असम्भवेन करणासम्भवान्न पूर्वमीमांसावश्यकतेत्यत आह—'**पर**'मित्यादि । **आद्यस्य** ब्रह्मचारिणः । **वाचिकः** ब्रह्मयज्ञः । **द्वितीयतृतीययोः** गृहिवानप्रस्थयोः । **कायिकः** अग्निहोत्रादिरूपः । **चतुर्थस्य** प्रव्रजिनः । **मानसिकः** मानसिकमूर्तिपूजनादिरूपः । **तस्मात्** '**स्यादेतत् अथात**' इत्यारभ्य एतावत्पर्यन्तनिरूपणात् । **एकेनैव** धर्मविचारेणैव । **चरितार्थत्वात्** मोक्षाप्तिपर्यन्तफलस्य सम्भवात् । **द्वितीयेन** ब्रह्मविचारेण । **इति प्राप्ते** पूर्वमीमांसयोत्तरमीमांसायाः गतार्थत्वरूपे पूर्वपक्षे प्राप्ते ।

---

१ यागादिकज्ञानस्येत्यपि पाठः ।

उच्यते । उपासनाया धर्मत्वेऽपि न ब्रह्मणो धर्मत्वम् । ज्ञानरूपत्वात् । धर्मस्य च क्रियारू-

गोस्वामिश्रीमन्मुरलीधरविरचिता अणुभाष्यव्याख्या ।

वानप्रस्थयोः । चतुर्थस्य यतेः । आश्रमिणामिति प्रकारभेद इति पूर्वेणैवान्वयः । उपसंहरति **'तस्मादि'**ति । स्यादेतदित्यारभ्याऽऽश्रमिणामित्यन्तग्रन्थोक्तात्कारणकलापादेकेनैव धर्मविचारेण ब्रह्मविचारस्याऽपि चरितार्थत्वात्पार्थक्येन ब्रह्मविचारेण किं फलं भविष्यति न किमपीत्येवं प्राप्ते । अत्र सिद्धान्ती समाधत्ते—**'उच्यत'** इति । यदुक्तं **'आत्मेत्येवोपासीते'**त्यादि नोदनावाक्यानां श्रवणाद्ब्रह्मज्ञानस्य धर्मत्वेन, तज्जिज्ञासयैव गतार्थत्वान्न पार्थक्येन जिज्ञासा कर्तव्येति तत्रोत्तरमाह—**'उपासनाया'** इति । यथा **'ज्योतिष्टोमेन यजेते'**त्यादौ ज्योतिष्टोमादेर्देवतोद्देशेन द्रव्यत्यागात्मकभावनारूपत्वेन धर्मत्वं, न तथा **'आत्मेत्येवोपासीते'**त्यादौ क्रियामात्रमस्ति । उपासनाया मानसक्रियारूपत्वेन धर्मत्वेऽपि तद्विषयीभूतस्य ब्रह्मणोऽक्रियात्वान्न धर्मत्वम् । **'सत्यं ज्ञानमनन्तमि'**त्यादौ ब्रह्मणश्चिद्रूपत्वोक्तेः । धर्मस्य तु **'चोदनालक्षणोऽर्थो धर्म'** इत्यत्र क्रियारूपत्वोक्तेश्च । यदुक्त-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

'तस्मादि'ति । त्रैवर्णिकाधिकारपक्षस्वीकारात् । समाधानमाहुः—**'उच्यत'** इति । आत्मेत्येवोपासीतेति विधिवाक्यमुपासनाविधायकम् । तस्यास्तु ब्रह्मज्ञानसाधनत्वान्न मुख्यत्वमित्याशयेनाऽऽह—**'उपासने'**ति । तथा च सर्वोपनिषद्वाक्यानां ब्रह्मणि तात्पर्यान्मुख्यत्वेन ब्रह्मप्रतिपादकत्वमेव, न तु धर्मप्रतिपादकत्वमिति भावः । **'ज्ञानरूपत्वादि'**ति । ब्रह्मण इत्यनुषज्यते । अर्थवादवाक्यानां ब्रह्म-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

चित्तशुद्धौ षडङ्गाध्येतुः स्वत एव ज्ञानोदयादिति रहस्यम् । समादधते—**'उच्यत'** इत्यादिना । यदुक्तं धर्मलक्षणाक्रान्तत्वाज्ज्ञानस्यापि धर्मत्वं, धर्मविचारश्च पूर्वविचारेणैव सिद्ध इत्यनुपयुक्तत्वाद्ब्रह्ममीमांसावैय्यर्थ्यं, तत्र स्याद्वैय्यर्थ्यं यदि तथात्वेन । तद्रूपोपासनैव ब्रह्ममीमांसाविषयः स्यात् । तदेव तु न । किन्तु ब्रह्मविषयेयम् । तच्च ज्ञानरूपम् । धर्मश्च क्रियारूपः । अर्थत्वे सति चोदनालक्षणत्वात् । नचेदं ब्रह्म तथा । तस्मान्नेयं तथेति । तदेतदुक्त**'मुपासनाया'** इत्यादिना । यच्चोक्त **'मारोपे'**त्यादिना सृष्ट्यादिवाक्यानामुपासनाविषयस्तावकतयाऽर्थवादत्वेनोपासनाविधावेवाऽन्वय, इति तन्निराकुर्वन्ति—

श्रीलालूभट्टकृता गूढार्थदीपिका ।

'चतुर्थस्ये'ति । यतेर्मानसिको याग इत्यर्थः । **'इत्याश्रमिणामि'**ति । **इति** एवंप्रकारेणाऽऽश्रमिणां प्रकारभेद इति पूर्वेणैवाऽन्वयः । **'उपासनाया धर्मत्वेऽपी'**त्यादि । अयमर्थः । उपासनाया यद्यपि मानसिकक्रियारूपत्वेन धर्मत्वं तथापि नोपासनाप्रतिपादकत्वमुत्तरकाण्डस्य किन्तु ब्रह्मणः । ब्रह्म तु न क्रियारूपम् । 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुतेश्चिद्रूपत्वात् अतो न धर्मत्वं ब्रह्मणः । तथाच ब्रह्मजिज्ञासाया न धर्मजिज्ञासया गतार्थत्वम् ।

ननु सृष्ट्यादिवाक्यानामर्थवादतैव वाच्या विधिमन्त्रादिरूपत्वाऽभावात् । ततश्च ब्रह्मस्ताव-

भगवदीयश्रीमदिच्छाराममप्रणीतः प्रदीपः ।

उच्यते सिद्धान्तिभिः समाधानमुच्यते इत्यर्थः । **धर्मत्वेऽपि** मानसक्रियारूपतया धर्मत्वेपीत्यर्थः । **न धर्मत्वं** ज्योतिष्टोमादेरिव क्रियारूपत्वाभावेन न धर्मत्वमित्यर्थः । **ज्ञानरूपत्वात्** 'सत्यं ज्ञान'मित्यादिना ज्ञानरूपत्वोक्त्या कृत्यसाध्यत्वादित्यर्थः । सृष्टिवाक्यानां उपासनाविधिशेषतया

पत्वात् । न चार्थवादानां धर्म इव ब्रह्मण्युपयोगः कर्तुं शक्यः । उत्पत्तिप्रकारफलभेदानाम-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

मारोपापवादविषयधर्मप्रतिपादकत्वेन विधेयोपासनाविषयस्तावकत्वात्सृष्ट्यादिवाक्यानामर्थवादत्वं, तन्निराकुर्वन्ति-'**न चार्थवादानामि**'ति । यथा '**वायुर्वै क्षेपिष्ठे**'त्याद्यर्थवादानां '**वायव्यं श्वेतमालभेते**'त्यादिविषये धर्मे उपयोगस्तथा न सृष्ट्यादिवाक्याना'**मात्मेत्येवोपासीते**'त्यादिषूपयोगः सम्भवति । कथं तदसम्भव इत्याशङ्क्य तत्र हेतुमाहुः-'**उत्पत्ती**'ति । अर्थवादा ह्युत्पत्त्यधिकारप्रयोगविनियोगभेदेन चतूरूपाणां विधीनां यथासम्भवमुपकारिणो भवन्ति । उत्पत्तिविधिर्ह्यज्ञातकर्मस्वरूपबोधनपरः । यथाऽ**ग्निहोत्रं जुहुयादि**ति । अधिकारः फलसम्बन्धबोधनम् । यथा

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ण्युपयोगं खण्डयन्ति-'**नचे**'ति । न हीत्यर्थः । '**उत्पत्ती**'ति । कर्मणि विद्यमानानामुत्पत्त्यादित्रयाणां ब्रह्मण्यभावादर्थवादवाक्यं तत्र न प्रवर्तत इत्यर्थः ।

ननु कथमुत्पत्त्यादित्रयेऽर्थवादानां प्रवृत्तिरितिचेत् । इत्थम् । तथाहि—उत्पत्तावर्थवादवाक्यं यथा-**असावादित्यो न व्यरोचत तं देवाः प्रायश्चित्तमैच्छन्नि**त्यादि । प्रकारे यथा-**अयं वै सोमेनेजानादि**त्यादि । फले यथा-**वायुर्वै क्षेपिष्ठा देवते**त्यादि । ननु ब्रह्मण्युत्पत्त्यादित्रयाणामभावः किमर्थं स्वीकर्तव्य इति चेत् । न । नित्यत्वात्सर्वदैकरसत्वात्फलरूपत्वाच्चेति भावः ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

'**न चार्थवादानामि**'ति । तत्र हेतुः—'**उत्पत्ती**'ति । अत्र **द्वन्द्वान्त** इति न्यायेन भेदशब्दस्योत्पत्त्यादित्रिष्वप्यन्वयः । तथाच यत्रोत्पत्त्यादिभेदास्तत्रैवाऽर्थवादानामुपयोगः । ब्रह्मणि तु तदभावान्न तदुपयोग इत्यर्थः । उत्पत्तिभेदस्तावत्-सोमेन यजेत । अग्निहोत्रं जुहुयात् । दर्शपूर्णमासाभ्यां यजेतेत्यादिः । प्रकार इतिकर्तव्यता । तद्भेदो 'यथा पर्यग्निकृतं पत्नीवन्तमुत्सृजति', समिधो यजतीत्यादिः । फलभेदो यथा-आज्येन आयुःकामस्य । खादिरं वीर्यकामस्य । दध्नेन्द्रियकामस्येत्यादिः ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

कत्वात्तेषां न स्वार्थे प्रामाण्यमतस्तद्विचाररूपायाः ब्रह्मजिज्ञासायाः कुत्रोपयोग इत्याशङ्क्य समादधते—'**न चार्थवादानां धर्म इवे**'त्यादिना । सृष्ट्याद्यर्थवादा यदि ब्रह्मण्युपयुज्येरंस्तदा पूर्वकाण्डीयाऽर्थवादविचारेणैव गतार्थत्वं स्यात् । इह तु न तदीयार्थवादानामुपयोगो ब्रह्मणि सम्भवतीत्यर्थः । कथं नोपयोग इत्याकाङ्क्षायां उपयोगत्रयं निवारयन्ति—'**उत्पत्तिप्रकारफलभेदानामभावादि**'ति ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

प्रामाण्यमिति वाद्युक्तं तद्दूषयितुमाहुः । '**नचे**'त्यादि । ब्रह्मण्यर्थवादानामुपयोगाभावमुपपादयन्ति । **उत्पत्ती**त्यादि । तथाचोत्पत्तिविधौ प्रकारबोधकविधौ फलबोधकविधौ वाऽर्थवादानामुपयोगः ब्रह्मोपासनाविधिस्तु नैतेषां एकतर इति न तत्रार्थवादानामुपयोग इति भावः । तत्रोत्पत्तिविधिः 'सोमेन यजेते'त्यादिरूपः । प्रकारभेदः 'समिधो यजती'त्यादिरूपः । फलभेदः 'खादिरो यूपो भवति खादिरं वीर्यकामस्ये'त्यादिरूपः । तत्र 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम' इत्युत्पत्तावर्थवादः । 'वर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजानुयाजा इज्यन्ते' इति प्रकारभेदेऽर्थवादः । 'यदाङ्क्ते चक्षुरेव

भावात् । प्रकृते तु माहात्म्यज्ञानार्थं तदुपयोगः । अस्य च ज्ञानोपयोगो यथा तथा वक्ष्यते

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

'स्वर्गकाम' इति प्रयोगानुष्ठापनम् । यथा **'वैश्वानरं द्वादशकपालं निर्वपेत्' 'व्रीहीन्प्रोक्षति' 'व्रीहीनवहन्ती'**त्यादीनि । विनियोगः क्रियायाः फलशेषत्वज्ञापनम् । यथा 'सोमेन यजेते'त्यादि । यद्यपि सर्वेऽपि भेदाः सर्वत्र सन्ति तथापि **'मुख्ये कार्यसंप्रत्यय'** इति न्यायेन यस्यैव मुख्यत्वं तस्यैव व्यपदेश इति । तथा चात्राऽऽत्मेत्येवोपासीतेत्याद्युपासनाविधिपरत्वं वेदान्तानामभ्युपगच्छता नित्यशुद्धबुद्धत्वादिरूपब्रह्मता जीवस्योपासनाविषयस्य विधेः फलं कल्प्यं, तच्च न सम्भवति । नित्यत्वेनाऽकार्यत्वात्तस्याः । नाप्यनाद्यविद्यापिधानाऽपनयः । तस्य स्वविरोधिविद्योदयादेव भावात् । नापि विद्योदयः । तस्यापि श्रवणमननपूर्वकोपासनजनितसंस्कारसचिवादेव चेतसः

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ननु **यतो वा इमानि भूतानी**त्यादिवाक्यानां कुत्रोपयोग इत्यत आह—**'प्रकृत'** इति । तस्य माहात्म्यज्ञानस्य । चतुर्थे चतुर्थाध्याये **'आदित्यादिमतय'** इत्यस्मिन्सूत्रे । तस्य भक्तिद्वारा

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम इत्याद्युत्पत्तावर्थवादः । **वर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजानुयाजा इज्यन्त** इति प्रकारे । **यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते** इति फले । तथाच कर्मण्युत्पत्त्यादित्रयस्याऽपि सत्त्वात्तत्रैवार्थवादा उपयुज्येरन् । ब्रह्मणि तूत्पत्त्यादीनामभावान्न त उपयुज्यन्त इत्यर्थः ।

अथवा यदुक्त**'मारोपे'**त्यादिना सृष्ट्यादिवाक्यानामर्थवादत्वं, तन्निराक्रियते—**'न चार्थे'**-त्यादिना । यथा **वायुर्वै क्षेपिष्ठे**त्याद्यर्थवादानां, **वायव्यं श्वेतमालभेते**त्यादिविध्युपयोगस्तथा न सृष्ट्यादिवाक्याना**मात्मेत्येवोपासीते**त्यादिविधिप्रयोगसम्भवः । तत्रोपपत्तिं ब्रुवते—**'उत्पत्ती'**त्यादि । अर्थवादा ह्युत्पत्त्यधिकारविनियोगप्रयोगभेदेन चतूरूपाणामपि विधीनां यथासम्भवमुपकारिणो भवन्ति । तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः । यथाग्निहोत्रं जुहोति सोमेन यजेतेत्यादिः । फल²स्वाम्यबोधको विधिरधिकारविधिः । स्वाम्यञ्च कर्मजन्यफलभोक्तृत्वम् । स

श्रीलालूभट्टकृता गूढार्थदीपिका ।

अयमर्थः । अर्थवादानां त्रेधोपयोगः कर्मणि । **असावादित्यो न व्यरोचत**त्यादीनां सौर्याद्युत्पत्तौ । यथाचाऽयं वै सोमेनाजानादित्यत्राष्टाक्षरा **गायत्री**त्यस्याग्नेयपुरोडाशीयेऽष्टाकपालत्वरूपे प्रकारे । यथाच **वायुर्वै क्षेपिष्ठे**त्यादीनां भूत्यादिरूपे फल उपयोगः । ब्रह्मणि तु तथा नोपयोगः । नित्यत्वेनोत्पत्तेरभावात् । सदैकरसत्वेन प्रकारविशेषस्याऽभावात् । स्वयं फलरूपत्वेन फलाऽभावाच्च । ब्रह्मणि सृष्ट्याद्यर्थवादानां माहात्म्यज्ञानार्थमुपयोगः । माहात्म्यं च सदेव ज्ञातं फलाय, नत्वारोपितम् । एवं सति ब्रह्मणि जागरूकस्य जगज्जन्मादिकारणस्य निरूपकाणां सृष्ट्याद्यर्थवादानां प्रामाण्यमक्षुण्णमेवेति

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

भ्रातृव्यस्य वृङ्क्ते' इति फलेऽर्थवादः । इत्थं चात्मेत्येवोपासीतेत्यादिविधौ नोक्तार्थवादोपयोग इति फलितम् । ननु तर्हि सृष्ट्यादिप्रतिपादकानामुपयोगाभावाद्वैयर्थ्यमित्यत आहुः । **'प्रकृते'**त्यादि । **प्रकृते**

१. तस्येति वेदान्तचन्द्रिकापाठः । २. फलसम्बन्धबोधक इति श्रीपुरुषोत्तमाः ।

चतुर्थे । उपासनादर्शनादिपदानां मनोव्यापारत्वमेव । विचारस्याऽपि यथा ज्ञानोपयोगित्वं

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

सम्भवात् । तस्माद्वेदान्तार्थोपासनायां जीवब्रह्मभावफलकत्वाभावान्नोपासीतेत्यादिभिर्विधिसरूपैस्तत्कामस्तत्कार्यमवबोद्धुमर्हति । न च ब्रह्मभूयादन्यत्किञ्चिदार्थवादिकमुपासनायाः फलं भवितुमर्हति येन तत्काम उपासनायामधिक्रियेत । तस्माद्ब्रह्मभूयस्याऽविद्यापिधानाऽपनयमात्रेणाऽऽविर्भावात्तस्य च वेदान्तार्थविज्ञानादवगतिपर्यन्तादेव सम्भवा**'त्मेत्येवोपासीते'**त्यादयो विधयोऽपि तु तत्स्वरूपा एव । तथा चोत्पत्तिरुत्पत्तिविधिः, प्रकारः, प्रयोगविधिः, फलमधिकारविधिस्त एव ये भेदास्तेषां सर्वेषामेवोपासीतेत्यादावभावान्नार्थवादानामिव सृष्ट्यादिवाक्यानामुपयोगः सम्भवतीत्यर्थः ।

नन्वेवं सति सृष्ट्यादिवाक्यानां कुत्रोपयोगः । स्वरूपप्रतिपत्तेः **'सत्यं ज्ञानमि'**त्यादिभिः सम्भवादित्यत आह–**'प्रकृते त्वि'**ति । अन्यत्र पूर्वकाण्डेऽर्थवादानां प्रवर्तनापरत्वेऽपि प्रकृते ब्रह्मकाण्डे सृष्ट्यादिवाक्यानां माहात्म्यज्ञान उपयोग इति न तेषां वैयर्थ्यमिति । ननु स्वरूपप्रतिपत्तौ माहात्म्यज्ञानं कथमुपयुज्यते । लोके देवदत्तादिस्वरूपज्ञाने तदनुपयोगस्य दृष्टत्वादित्यत आह–**'तस्य चे'**ति । ननूत्पत्त्यधिकारप्रयोगभेदानामभावेऽपि विनियोगभेद एव कस्मान्न भवतीत्यत आह–**'चतुर्थ'** इति ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

भगवत्प्राप्तिरूपसाक्षात्कारे उपयोग इति वक्ष्यते । ननूपासनारूपधर्मस्य कथं क्रियारूपत्वमत आह–**'उपासने'**ति । **आत्मेत्येवोपासीत, आत्मा वा अरे द्रष्टव्य** इत्यादिविधीनामित्यर्थः ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

च यजेत स्वर्गकाम इत्येवंरूपः । अङ्गसम्बन्धबोधको विधिर्विनियोगविधिः स च दध्ना जुहोतीत्यादिरूपः प्रयोगप्राशुभावबोधको विधिः । स हि साङ्गप्रधानमनुष्ठापयन् विलम्बे प्रमाणाऽभावादविलम्बापरपर्यायं प्रयोगं प्राशुभावं विधत्ते । स च पौर्णमास्यां पौर्णमास्यां यजेतेति । अयमेव प्रधानविधिः । इतरे तु त्रय एतच्छेषभूताः । तथाचोत्पत्तिरुत्पत्तिविधिः । प्रकारः प्रयोगविधिः । फलं फलविधिः । तत्र द्रव्यदेवताभावान्नोत्पत्तिविधित्वम् । देशकालाद्यभावान्न प्रयोगविधिः । फलत्वाऽभावान्न फलविधिः । न च जीवस्य ब्रह्मभावरूपमेवोपासनाफलमिति शङ्क्यम् ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

न पूर्वमीमांसया गतार्थत्वम् । माहात्म्यज्ञानस्योपयोगमाहुः–**'तस्य चे'**ति । तस्य माहात्म्यज्ञानस्य ज्ञानोपयोगः । साक्षात्कारात्मकाऽपरोक्षानुभवात्मकज्ञान उपयोगः । स चतुर्थे फलाध्याये वक्ष्यते । सिद्धमाहुः—**'उपासनादर्शनादिपदानामि'**त्यादि । यदुक्तं **उपासीत द्रष्टव्य** इत्यादिविधिभिर्ज्ञा-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

उत्तरकाण्डे । **तदुपयोगः** सृष्ट्यादिवाक्यानामुपयोगः । **तस्य** माहात्म्यज्ञानस्य । **ज्ञानोपयोगः** तरतमतया भजनीयताज्ञाने । **वक्ष्यते** अग्रे वक्ष्यत इत्यर्थः । **'चतुर्थे'**त्यादि । तथा च पूर्वोक्त उत्पत्त्यधिकारप्रयोगे विधित्रयस्यासम्भवेऽपि विनियोगविधिबोधितधर्मस्योत्तरकाण्डेऽपि सम्भवाद्धर्मविचारेणैव गतार्थत्वान्नोपयोग उत्तरमीमांसाया इत्याशङ्क्य समादधु **'श्चतुर्थ'** इत्यादिना । **चतुर्थे** सम्भवत्यपि चतुर्थे विनियोगविधावित्यर्थः । **'उपासने'**त्यादि । 'आत्मेत्येवोपासीत' 'आत्मा वा अरे द्रष्टव्य' इत्याद्युपास-

१—तथा चास्य त्रिरुत्पत्तिविधिरित्यादि कपुस्तकपाठः ।

गोस्वामिश्रीमन्मुरलीधरविरचिता अणुभाष्यव्याख्या ।

नाचतुर्थे विनियोगविधौ सम्भव'त्युपासीत द्रष्टव्य' इत्यादिपदानां मनोव्यापारपरत्वमेव कल्पनीयमिति नाऽत्रानुपपत्तिः काचिदिति भावः । ननु सृष्ट्यादिवाक्यानां माहात्म्यप्रतिपादनमुखेन ज्ञानोपयोगित्वेऽपि विचारस्य कथं तदुपयोगित्वमित्यत आह—**विचारस्यापी**ति । एवं ब्रह्मविचारस्य धर्मविचारेणैव गतार्थत्वेनाऽकर्तव्यत्वाऽऽशङ्का निरस्ता । इदानीं सर्वोऽपि वेदराशिर्धर्मे उपयुक्त इति

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

मनोव्यापारत्वमेव मानसिकक्रियाबोधकत्वमेव । तथा चैतादृशव्यापारविषयत्वात् ब्रह्मणो मुख्यत्वेन प्रतिपादनम् । क्वचिन्माहात्म्यप्रतिपादकानां च सर्वेषां वाक्यानां ब्रह्मण्येव तात्पर्यमिति मुख्यतया ब्रह्मप्रतिपादकत्वमेव धर्मप्रतिपादकत्वम् । एवं चैतादृशवाक्यविचारेण कृत्वा मनोव्यापारस्तेन च ब्रह्मसाक्षात्कारोऽग्रे च भगवत्प्राप्तिरित्येवंरीत्योत्तरमीमांसाया अत्यावश्यकत्वमिति न पूर्वया गतार्थत्वमित्या-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

तस्य **सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चने**ति, **तत्त्वमसी**त्यादिश्रुतिवाक्येभ्य एव सिद्धेः । तस्मान्नोपासीतेत्यादयो विधयः । अपि तु विधिसरूपाण्येवेमानि वाक्यानीति ज्ञेयम् । एतेन **श्रोतव्यो मन्तव्य** इत्यादीन्यपि वाक्यानि व्याख्यातानि । नन्वेवं सति सृष्ट्यादिवाक्यानां कुत्रोपयोगः । स्वरूपप्रतिपत्तेः **सत्यं ज्ञानमनन्त**मित्यादिवाक्यैरेव सिद्धेरित्यत आहुः—'**प्रकृते-त्वि**'ति । ब्रह्मकाण्डे सृष्ट्यादिवाक्यानां माहात्म्यज्ञानायोपयोगः । '**तस्य चे**'ति । तस्य माहात्म्यज्ञानस्य । ज्ञानं साक्षात्कारः । **यथा** येन प्रकारेण **तथा** स प्रकारः । **चतुर्थे आदित्यादिमतय** इति सूत्रे । '**उपासने**'ति । '**व्यापारत्वमेवे**'ति । व्यापारार्थत्वमित्यर्थः । तेन तेषां मनोव्यापारत्वेन सविषयतया विषयाऽधीनत्वान्न तद्विषयस्य ब्रह्मणो गौणत्वप्रसक्तिरिति सिद्धम् । अन्यथो**पासीते**त्यादिवाक्यानां विधित्वे तच्छेषभूतार्थवादनिरूप्यमाणस्य ब्रह्मणोऽपि तच्छेषत्वं प्रसज्येत । अतोऽपि न ब्रह्ममीमांसाया गौणत्वम् । **सत्यं ज्ञानमनन्तं ब्रह्म, तस्माद्वा एतस्मादात्मन** इत्यादिवाक्यैः स्वरूपमाहात्म्यज्ञानयोः सम्भवादित्यत आहुः—'**विचारस्यापी**'ति । '**वक्ष्यत**' इति । तृतीयाध्यायस्य द्वितीये पादे उभयव्यपदेशाद्यधिकरणे । ननु यथा पूर्वमीमांसायाः प्रवृत्तिपराणां चि-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

नस्य विधेयत्वेन धर्मत्वात्पूर्वमीमांसया गतार्थत्वम् । तन्न । उपासनादर्शनादिपदाना**मुपासीत द्रष्टव्य** इत्यादीनां मनोव्यापारत्वमेव वाच्यमिति शेषः । तथाच तादृग्मनोव्यापारस्य धर्मत्वोपनतज्ञानस्य धर्मत्वं न ब्रह्मणो धर्मत्वम् । अतो ब्रह्ममीमांसा पृथगेव करणीयेति न पूर्वया गतार्थत्वमुत्तरस्या इत्यर्थः । अतःपरं केवलं कर्मण्येव निरतस्यापि ब्रह्मज्ञानाऽऽवश्यकत्वात् ब्रह्मज्ञानस्य तु ब्रह्ममीमांसाधीनत्वेनोत्तर-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

दर्शनादिपदानामित्यर्थः । **मनोव्यापारत्वमेव** मनोव्यापारबोधकत्वमेव । एवकारेण करणीभूतक्रियारूपधर्मबोधकत्वव्यवच्छेदः । इत्थं च न पूर्वयोत्तरस्यागतार्थत्वशङ्कापीति भावः । ननु सृष्ट्यादिवाक्यानां सार्थक्यस्योपपादनेऽपि व्यासविचारस्य कथं ज्ञानोपयोग इत्यत आहुः । '**विचारस्ये**'त्यादि । **यथा**

१—अस्याष्टीकाया एकमेव पुस्तकं लब्धम् । तच्चैतद्भूयःस्थलेष्वशुद्धम् । तथाचैकेनैव शोधनं विहितमिति सम्भाव्यन्तेऽशुद्धाः पाठाः परं किं विधेयमन्यदस्मिन्नतिदुर्लभपुस्तके समये ।

तथा वक्ष्यते। किञ्च औपनिषदज्ञानस्याऽपि कर्मोपयोगित्वम् 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवती'ति। अत एव ब्रह्मविदामेव जनकादीनां कर्मणि सर्वदेवसान्निध्यम्। अन्यथाऽऽभासत्वमेव। नच ब्रह्मरूपाऽऽत्मविज्ञाने देहाद्यध्यासा-

---

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

धर्मस्यैव मुख्यत्वेन तद्विरुद्धब्रह्मप्रतिपत्तिफलकतद्विचारस्यात्रानुपयुक्तत्वादकर्तव्यमित्याशङ्कां निराकुर्वन्ति—**'किञ्चे'**ति। औपनिषदस्यौपनिषत्प्रतिपादितस्याऽऽत्मनो ज्ञानस्यापि **'यदेव विद्यया करोती'**त्यादिश्रुतिभिस्तत्पूर्वकस्य कर्मणो वीर्यवत्तरत्वस्य निरूप्यमाणत्वात्कर्मोपयोगित्वम्। वस्तुतस्तु तज्ज्ञानस्य कर्मोपयोगित्वाभावेऽपि नास्माकं क्षतिः। सर्वतोधिकब्रह्मप्राप्तिफलकत्वस्य **'ब्रह्मविदाप्नोती'**त्यादिभिर्निरूप्यमाणत्वात्। **'अधिकं तत्रानुप्रविष्टं न तु तद्धानि'**रिति न्यायेन धर्मोपयोगोपन्यास इति ज्ञेयम्। तत्पूर्वकस्यैव कर्मणो वीर्यवत्तरत्वे ज्ञापकमाहुः—**'अत एवे'**ति। यतो विद्यादिपूर्वकस्य कर्मणो वीर्यवत्तरत्वमत एव जनकादीनां कर्मणि यावन्तो देवास्तेत्राऽधिकृतास्तेषां सान्निध्यं श्रूयते। कर्मणो वीर्यवत्तरत्वेन देवतासन्निधापने सामर्थ्यात्। तदभावेऽस्मदादिकृतानां कर्मणामाभासत्वमेव।

नन्वेवं ब्रह्मस्वरूपात्मविज्ञानस्य कर्मकरणात्पूर्वमपेक्षितत्वे देहाद्यध्यासमारोपितकर्तृत्वाभिमानेन हि कर्मकृतेः सर्वत्र दृष्टत्वान्नतु देहादेर्निरध्यस्तत्वात्कथं तत्सम्भव इत्याशङ्क्य परिहरन्ति—**'नचे'**ति।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

खण्डलार्थः। इदं च सर्वं साधनप्रकरणे तृतीयाध्याये द्वितीये पाद उभयव्यपदेशाधिकरणे विस्तरेण वक्ष्यन्ति श्रीमदाचार्यचरणाः। इदानीमुत्तरमीमांसयैव पूर्वमीमांसायाश्चारितार्थ्यमन्यथा नेति विपरीतं दूषणमुद्भावयन्ति—**'किञ्चे'**ति। **अन्यथा** औपनिषदज्ञानाभावे। **आभासत्वमेव** कर्माभासत्वमेव।

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

तच्छुद्ध्यर्थतया निवृत्तिपराणां चोपयोगस्तथा नोत्तरमीमांसाया अतः पूर्वयैव फलसिद्धौ किमेतयेत्यत आहुः—**'किञ्चे'**त्यादि। औपनिषदस्योपनिषत्प्रतिपाद्यस्य ब्रह्मणो ज्ञानमपि, पूर्वकाण्डप्रतिपाद्यं कर्म ज्ञानं समुच्चिनोति। तत्र हेतुः **'यदेवे'**ति। विद्याशब्देनाऽत्र ब्रह्मसाक्षात्कारः। उपनिषच्छब्देन च शाब्दं ज्ञानम्। तथाच यदेव वैदिकं कर्ममात्रं ब्रह्मज्ञानपूर्वकं करोति तदेव वीर्यवत्तरं भवति फलोत्पादनसमर्थम्। फलं च भगवदानन्दरूपम्। षोढाविहितस्याऽभिव्यक्तत्वात्। एतादृशाधिकारस्य

श्रीलालूभट्टकृता गूढार्थदीपिका।

मीमांसायाः सर्वथा कर्तव्यतामाहुः—**'किञ्च औपनिषदज्ञानस्यापी'**त्यारभ्य **'ब्रह्म जिज्ञास्य-**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

मोहकशास्त्रसम्पादितविरुद्धबुद्धिनिराकरणप्रकारेण। **वक्ष्यते** जन्माद्यधिकरणमारभ्य सर्वत्र वक्ष्यत इत्यर्थः। अत्र ब्रह्मसाक्षात्कारोपयोग्युपासनाद्यर्थमेव ब्रह्मविचारकरणमिति न किन्तु ब्रह्मसाक्षात्कारोपयोगिकर्मसाफल्यायापि ब्रह्मविचारकरणमावश्यकमिति न पूर्वयोत्तरस्या गतार्थत्वानुपयोगावित्याहुः। **'किञ्चौपनिषदि'**त्यादि। **औपनिषदज्ञानस्य** व्यासविचारनिष्पन्नस्येत्यर्थः। **कर्मोपयोगित्वं** कर्मणा फलसम्पादनेऽसाधारणसहकारिकारणत्वम्। **विद्यया** करणीभूतब्रह्मज्ञानेन। **श्रद्धया** फलावश्यं-

---

१ फलकस्येति कपुस्तकम्।

भावेन कर्तृत्वाऽभावात्कर्माऽनधिकार इति वाच्यम् । निरध्यस्तैरेव देहादिभिः कर्मकरण-सम्भवात् । अत एव जीवन्मुक्तानां सर्वे व्यापाराः । तथा च स्मृतिः—

नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ॥

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

तत्र हेतुमाह—'**निरध्यस्तैरेवे**'ति । देहाद्यध्यासाभावेन फलानुसन्धानराहित्यमात्रं जायते न तु कर्मकृत्यभावः । अत्र ज्ञापकमाहुः—'**अत एवे**'ति । कर्मणो वैदिकस्य का वार्ता । अन्ये लौकिका अपि सर्वे व्यापारास्तत्र दृश्यन्ते । नहि तेषां फलाऽनुसन्धानपूर्वकं तत्कृतिः सम्भवति । तथा सत्य-स्मदादिसादृश्ये जीवन्मुक्तत्वहानिप्रसङ्गः । तस्माद्व्यापारसत्वेऽपि तदनुसन्धानराहित्यं तेषु वर्तत इति न लौकिकैस्तैस्तेषां लौकिकत्वम् । तथा च यत्र लौकिकव्यापाराणामपि सम्भवस्तत्राऽलौकि-कानां वैदिकानां सम्भवे किं वक्तव्यमिति भावः । लौकिकव्यापारसत्वे स्मृतिं प्रमाणयन्ति—'**तथा च स्मृति**'रिति । जीवन्मुक्तानां वैदिककर्मकृतेरावश्यकत्वं दर्शयन्ति-'**अत**' इति । यतो

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

कर्म इव आभासते स कर्माभासस्तस्य भावस्तत्त्वम् । अनुमित्यजनकहेत्वाभासवदित्यर्थः । अन्यत्सुगमम् ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

दुर्लभत्वेन क्वाचित्कत्वादाह-'**श्रद्धये**'ति । वाशब्दोऽनादरे । एवञ्च केवलश्रद्धापूर्वकं कृतं कर्म स्वर्गलोकप्राप्तिक्षमम् । श्रद्धोपनिषद्भ्यां सहितं कर्माऽऽत्मसुखं जनयति । एतद्द्वयमपि गौणम् । पूर्वोक्तं मुख्यम् । एतत्त्रितयाऽन्यतरस्याऽपि सत्व एव यथाधिकारं फलम् । अन्यथा तु कर्माऽऽभास-त्वान्न ततः फलमित्यर्थः । तत्र निदर्शनमाहुः—'**अत एवे**'ति । यतो विद्यापूर्वककर्मकरणेन कर्मणो वीर्यवत्तरत्वम् । अतस्तत्कर्मणि सर्वदेवसान्निध्यम् । '**अन्यथे**'ति । उक्तप्रकारेण सर्वदेवसा-न्निध्याऽभावे । ब्रह्मविदोऽनधिकारित्वमाशङ्क्य दूषयन्ति-'**नचे**'ति । तत्र हेतुः-'**निरध्यस्तैरि**'ति । अत्र ब्रह्मविद इत्यादि । तत्र निदर्शनमाहुः-'**अत एवे**'ति । '**सर्वे**' इति । लौकिकाऽलौकिकाः । तत्सत्वे प्रमाणमाहुः-'**तथा चे**'त्यादिना । अत्र पश्यन्नित्यारभ्य धारयन्नित्यन्तेन लौकिका उक्ताः ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

मेवे'त्यन्तेन । एवं गतार्थत्वं परिहृत्य, कर्मण्युपयोगं च, न ब्रह्मजिज्ञास्यं किन्तु पूर्वकाण्डोक्तेऽपि कर्मणि मुख्यफलाप्तयेऽवश्यं ब्रह्म जिज्ञास्यमिति नास्या मीमांसाया गतार्थत्वं, न वाऽनुपयोग इत्यर्थः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

भावनिश्चयेन । **उपनिषदा** प्रत्येकोपनिषदर्थज्ञानेन । **वीर्यवत्तरं** फलायोगरहितम् । **अत एव** पूर्वो-क्तकारणकलापवता कृतकर्मणां वीर्यवत्तरत्वनियमादेव । **सर्वदेवे**ति वक्ष्यमाणद्रव्यभागिदेवसान्निध्यमि-त्यर्थः । **अन्यथा** कर्मण्युक्तदेवसान्निध्याभावे । **आभासत्वं** प्रतिष्ठादिलौकिकफलसमर्पकत्वम् । एवका-रेण मुख्यफलव्यवच्छेदः । **कर्मानधिकारः** ब्रह्मविद्यावतः कर्मण्यनधिकारः । **निरध्यस्तैः** अविद्या-पर्वाविषयीभूतैः । तादृशानां कर्मकरणसम्भवे सम्मतिमाहुः । '**अत एवे**'त्यादि । **व्यापाराः** श्रूयन्ते

१—अत्रेति खपाठः ।

प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ इति ।

अतो ब्रह्मविदामेव कृतं कर्म शुभफलं भवति । अतो धर्मविचारकाणामपि ब्रह्म जिज्ञास्यमेव । तस्मान्न गतार्थत्वानुपयोगौ ।

ननु फलप्रेप्सुरधिकारी । फलञ्च विचारस्य शाब्दं ज्ञानम् । तस्य मननादिद्वारा अनु-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

विद्यापूर्वकस्यैव कर्मणो वीर्यवत्तरत्वं तत एव तेषामेव तच्छुभफलं शुभफलजनकं क्रममोक्षजनकं भवति । अत एवोक्तं श्रीभागवततत्त्वदीपे—**'ज्ञानिनस्तदभिव्यक्तौ कर्तुर्मोक्षः क्रमाद्भवे-दि'**ति । तस्माद्धर्मानुष्ठानसिद्ध्यर्थं धर्मविचारस्येव ब्रह्मज्ञानपूर्वकतत्करणार्थं ब्रह्मजिज्ञासाया अपि सर्वथैव कर्तव्यत्वमित्याह—**'अत'** इति । फलितमाह—**'तस्मादि'**ति । धर्मजिज्ञासया गतार्थत्वमनुपयोगश्च ब्रह्मजिज्ञासाया न वक्तुं शक्याविति भावः । अधिकारी तु त्रैवर्णिक एवेति पूर्व-मुक्तं तदेव दृढीकर्तुं शङ्कते—**'नन्वि'**ति ।

अथ शब्दस्याधिकारार्थत्वे को वाऽत्राधिकारी यमुद्दिश्येयं जिज्ञासाऽऽरभ्यत इति शङ्कायां त्रैव-र्णिक एवाधिकारीत्युक्तम् । तत्र पूर्वपक्षी शङ्कते—**'नन्वि'**ति । नहि फलकामनाऽभावे कस्यापि

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

वैराग्याऽऽनन्तर्यवादी सिंहावलोकनन्यायेन पुनराशङ्कते—**'नन्वि'**ति । **'फलं चे'**ति । अस्य चाऽऽ-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ब्रह्मणीत्यारभ्य करोतीति वैदिकाः । अग्रे च लिप्यत इत्यनेन तत्फलाभावश्चोक्तः । तथा चाऽत्राऽभि-मानाऽभावेन फलाऽभावमात्रोक्तिर्न पुनः कर्मकृत्यभावः—**'अत'** इति । वीर्यवत्तरत्वादेव । शुभफलं क्रममुक्तिफलमित्यर्थः । उपसंहरन्ति—**'अत'** इति । कर्मफलसाधकत्वात् । फलितमाहुः—**'तस्मा-दि'**ति । आवश्यकत्वादेव । यदुक्तं त्रैवर्णिक एवाऽधिकारीति, तत्र शङ्कते—**'नन्वि'**ति । **न हि प्रयो-**

श्रीलालूभट्टकृता गूढार्थदीपिका ।

नन्वथशब्दस्यानन्तर्यार्थे शमदमाद्यानन्तर्यकथनाच्छमादिवानधिकारी लभ्यते । अधिकारार्थत्वे को वा-धिकारी यमुद्दिश्य जिज्ञासाशास्त्रमारब्धमित्याकाङ्क्षायां त्रैवर्णिक एवाऽत्राऽधिकारीति पूर्वमुक्तं तत्र पूर्वपक्षी शङ्कते—**'ननु फलप्रेप्सुरि'**त्यादिना । फलकामनाऽभावे प्रवृत्तेरसम्भवात्फलप्रेप्सुरधिकारी । तथाच ब्रह्मजिज्ञासायाः शाब्दमेव ज्ञानं फलम् । शब्दशेषत्वात् । शाब्दज्ञानस्य फलं मननादिद्वारा ह्य-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

इत्यर्थः । **युक्तः** पूर्वोक्तज्ञानशाली न तु युक्तस्य सर्वदा ज्ञानमित्येवंरूपः । तादृशयुक्तस्य शुकवाम-देवादेस्तादृशकर्मकरणासम्भवादिति भावः । उपसंहरन्ति **'तस्मादि'**त्यादि । **'गतार्थत्वे'**त्यादि पूर्व-मीमांसायाः गतार्थत्वानुपयोगौ नेत्यर्थः ।

१. पूर्वकं तदित्यादि कपुस्तकम् ।

भवः । तस्य चाऽनर्थनिवृत्तिपूर्वकपरमानन्दावाप्तिः । तथा च विरक्तोऽनर्थजिहासुः परप्रेप्सुश्चाधिकारी कस्मान्न भवति ? । 'शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि । श्रमस्तस्य फलं मन्ये ह्यधेनुमिव रक्षत' इति भगवद्वचनात्केवलस्य निन्दाश्रवणादिति चेत् । न ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

कुत्रापि प्रवृत्तेः सम्भवोऽतः फलप्रेप्सुरधिकारी । तथा च ब्रह्मजिज्ञासायाः शाब्दमेव ज्ञानं फलम् । तस्य शब्दशेषत्वात्, तस्य मननादिद्वाराऽपरोक्षानुभवस्तस्य चानर्थरूपाऽविद्यातत्कार्यनिवृत्तिपूर्वकं परमानन्दस्य पुरुषोत्तमस्यावाप्तिः सायुज्यम् । तथा चानर्थजिहासुः परस्य पुरुषोत्तमस्य प्रेप्सुश्चाधिकारी कस्मान्न भवति । ननु शाब्दमेव ज्ञानं विचारकस्य फलमस्तु, किं पुरुषोत्तमप्राप्तिपर्यन्तं धावनेनेत्यत आह– '**शब्दे**'ति । केवलस्य शाब्दज्ञानमात्रपर्यवसितस्य । तथा च फलप्रेप्सुरधिकारी न त्रैवर्णिकमात्रमिति स्थिते निषेधन्ति–'**ने**'ति । कुत इत्याकाङ्क्षायां हेतुमाहुः–'**फलकामनाया**' इति । यस्तु वेदाधिकारी

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

नन्दावाप्तिरित्यनेनान्वयः । तथा च फलप्रेप्सोरधिकारित्वे च । एवं च **साङ्गो वेदोऽध्येयो ज्ञेयश्चे**ति विधिना सार्थवेदाध्ययनं विहितम् । तथा च वेदार्थज्ञानवान् त्रैवर्णिको विरक्तः सन्नेव फलप्रेप्सुर्भविष्यतीति वैराग्याऽऽनन्तर्यमावश्यकमिति भावः ।

ननु वेदार्थज्ञानस्य साक्षात् विचार एव फलं, न तु परप्राप्तिः । एवं च न तत्र वैराग्यापेक्षेत्यत आह–'**शब्दे**'ति । भगवद्वचनात् भागवते निन्दार्थवादरूपभगवद्वचनादित्यर्थः । अत्र समाधानमाहुः–'**ने**'ति । '**अनुपयोगादि**'ति । फलकामनावानधिकारी तदा वक्तव्यो यदा स्वर्गकामो

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

जनमनुद्दिश्येति न्यायात्त्रैवर्णिके फलप्रेप्सुत्वं विशेषणीयम् । नतु तावन्मात्रम् । अत्राधिकारिफलञ्च जिज्ञासापदसूचितसंशयनिवृत्तिद्वारा शाब्दं ब्रह्मज्ञानम् । '**तस्ये**'ति शाब्दज्ञानस्यानुभवः साक्षात्कारः । '**तस्य चे**'ति । साक्षात्कारस्य । सकार्याऽविद्याऽनर्थः । जीवभावप्रापकतिरोहिताऽऽ-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

परोक्षानुभवः । तस्याऽपरोक्षानुभवस्याऽपि विद्यारूपाऽनर्थनिवृत्तिपूर्वकं परमानन्दरूपपुरुषोत्तमप्राप्तिः फलम् । तथाचाऽनर्थनिवृत्तिकामः परप्रेप्सुरत्राऽधिकारीति पूर्वपक्षिण आशयः । तदाह—'**तथाच विरक्तोऽनर्थजिहासुः परप्रेप्सुश्चाधिकारी कस्मान्न भवती**'ति । तत्रोत्तरमाहुः–'**फलकामनाया अनुपयोगादि**'ति । **ब्रह्मविदाप्नोति परमि**ति श्रुतेः परप्रेप्सुरधिकारी स्यादिति यदुक्तं तत्तु तदा स्याद्यदि प्रतिज्ञासूत्रे ब्रह्मजिज्ञासापदात्प्राप्येत । तच्च नैव । शब्दार्थस्याऽनन्यलभ्यत्वात् । अतस्त्रैवर्णिकोऽर्थजिज्ञासुरेव ब्रह्मजिज्ञासायामधिकारीत्यर्थः । परप्राप्तिरूपफलकामना तु **ब्रह्मविदाप्नोति परमि**तिवाक्यार्थज्ञानोत्तरभाविनीति न ब्रह्मजिज्ञासाधिकारकोटौ प्रविशतीत्याहुः—

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

वेदान्तविचारे त्रैवर्णिकोऽधिकारीति पूर्वं निर्णीते आनन्तर्यार्थकाथशब्दवादी शङ्कते '**ननु फले**'त्यादि । **फलप्रेप्सुः** फलकामनावान् । **तस्य** शाब्दज्ञानस्य । **अनुभवः** निदिध्यासनरूपः । **तस्य** निदिध्यासनस्य । **अनर्थः** संसाररूपः । **अवाप्तिः** साक्षात्कारः । **निष्णातः** औपनिषदज्ञानवान् ।

फलकामनाया अनुपयोगात् अन्येनैव तत्समर्पणात्। नित्यत्वादप्यर्थज्ञानस्य न फलप्रेप्सुरधिकारी। निन्दार्थवादस्तु मननादिविधिविशेष इति मन्तव्यम्।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

स एव तच्छेषभूते विचारेऽपीत्यधिकारे फलकामनाया अनुपयोगः। तत्र हेतुमाहुः—'**अन्येने**'ति। अन्येन त्रैवर्णिकत्वमात्रेणैव तस्याधिकारस्य समर्पणात्। फलप्रेप्सोरधिकारित्वबाधकान्तरमप्याह—'**नित्यत्वा**'दिति। फलप्रेप्सुरर्थज्ञानस्याधिकारी न भवति। कुतः। नित्यत्वात्फलस्येति शेषः। तथा

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

यजेतेति वाक्यवत्फलकामनावता पुरुषेण विचारः कर्तव्यः इत्याकारकबोधजनकं प्रतिज्ञावाक्यं चेत्। तदेव नास्ति। कुतः। अथातो ब्रह्मजिज्ञासेत्यस्माद्वाक्यात्कामनाया अप्रतीतेः। अतस्त्रैवर्णिक एवाधिकारीति भावः। ननु तर्हि परप्राप्तिरूपं फलं मुख्यं तदेव केनचिद्वाक्येन न बोधितं चेत्कस्यापि शास्त्रे प्रवृत्तिरेव न स्यादित्यत आहुः—'**अन्येनैवे**'ति। **ब्रह्मविदाप्नोति परमि**त्यनेन वाक्येनैव तत्समर्पणात् परप्राप्तिरूपफलबोधनात्। तथा च वेदाध्ययनानन्तरं ब्रह्ममीमांसापूर्वकवेदार्थज्ञाने जाते ब्रह्मविदाप्नोति परमित्यस्य वाक्यार्थज्ञानानन्तरं फलकामनोत्पद्यते। ततः पूर्वं कामनाया अभावा-

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

नन्दस्याऽऽवाप्तिराविर्भावः। पुरुषोत्तमप्राप्तिस्तु भक्त्यैव नान्यथा। उपसंहरन्ति—'**तथा चे**'ति। बाधकाऽभावाद्भवत्येवेत्यर्थः। ननु जिज्ञासापदात्संशयनिवृत्तिपूर्वकवेदार्थब्रह्मणः शाब्दमेव ज्ञानं फलत्वेन वक्तुरिष्टमिति नोक्तविशेषणसार्थक्यमित्यत आहुः—'**शब्दे**'ति। तदधिकारित्वविशेषणं सार्थकमेवेति भावः। समादधते—'**ने**'त्यादिना। '**अनुपयोगादि**'ति। सन्देहनिवृत्तिद्वारकज्ञानैकफलकविचारशास्त्रेऽधिकारिणः प्रवृत्तौ फलकामनाया अन्यथासिद्धत्वेनाऽकारणत्वात्। ज्ञेयश्चेति विधिना ज्ञानमात्रस्यैव विधानात्तत्फलस्य तु ज्ञानविध्यतिरिक्तब्रह्मविदाप्नोति परमित्यादिवाक्येन बोधनादि-

श्रीलालूभट्टकृता गूढार्थदीपिका।

'**अन्येनैव तत्समर्पणादि**'ति। '**नित्यत्वादप्यर्थज्ञानस्ये**'ति। **स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थमिति** निन्दाश्रुतेरर्थज्ञानस्य नित्यत्वम्। अकरणे प्रत्यवायत्वात्। अकरणे प्रत्यवायजनकस्य नित्यत्वाभ्युपगमात्। तथा चार्थज्ञानस्य प्रत्यवायपरिहारायाऽवश्यसम्पाद्यत्वं सिद्धमिति न फलप्रेप्सुरधिकारी कल्पनीयः। तत्कल्पने काम्यत्वापत्तेर्नित्यत्वं भज्येत। अतो यस्त्रैवर्णिको वेदवेदान्तेष्वधिकारी स एव वेदान्तसूत्ररूपमीमांसायामधिकारीति निष्कर्षः। नन्वेवं **शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि। श्रमस्तस्य फलं मन्ये** इति

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

'**न निष्णायादि**'त्यादि। परब्रह्मविषयकसाक्षात्कारवान्न भवेद्यदीत्यर्थः। **केवलस्य** फलशून्यार्थज्ञानरूपसाधनवतः।

इत्थं चाधिकारिविशेषणीभूतवैराग्यादीनां विचारात्पूर्वमावश्यकत्वात्, तेषामानन्तर्यमेवाथशब्दशक्यार्थो भवेन्न तु आनन्तर्यनिरूपकस्यालाभेनाधिकाररूपोप्यथशब्दस्यार्थः स्यादिति वाद्यभिप्रायः सिद्धः। तद्दूषयन्ति—'**ने**'त्यादि। **अनुपयोगात्** अधिकारिविशेषणार्थं अनुपयोगात्। **अन्येनैव** 'ब्रह्मविदाप्नोति परमि'ति वेदेनैव। **तत्समर्पणात्** परप्राप्तिकामनावतो ब्रह्मविदोधिकारिणो बोधनात्। **नित्य-**

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

च फलस्य नित्यत्वेनाऽर्थज्ञानमनर्थकमेव स्यादिति भावः । नन्वेवं **'शब्दब्रह्मणि निष्णातो'** **'स्थाणुरय'**मित्यादिनिन्दार्थवादानां कुत्रोपयोग इत्याशङ्क्याऽऽहुः—**'निन्दार्थवादस्त्वि'**ति । ब्रह्मजिज्ञासापदं व्याख्यातुं शङ्कन्ते–**'ननु ब्रह्मण'** इति । यत्प्रतिज्ञातं तदेव निरूप्यमिति शास्त्रकृतां मर्यादा । तथा च समन्वयस्य प्रथमाध्यायार्थस्य प्रतिज्ञातत्वेऽपि विरोधनिराकरणसाधनप्रयोजनानां द्वितीयातृतीयाचतुर्थीयाऽर्थानामप्रतिज्ञातत्वेन जिज्ञासयाऽवरोद्धुमशक्यत्वात् । ननु तेषामप्रतिज्ञातार्थत्वे न

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

दर्थजिज्ञासुस्त्रैवर्णिक एवाऽधिकारी, न तु फलप्रेप्सुरिति भावः । ननु तर्ह्यर्थज्ञानमेव फलमस्तु, तावतैव फलप्रेप्सुरधिकारी भवतीत्यत आह–**'नित्यत्वादि'**ति । सन्ध्यावन्दनादिवत् ज्ञेयश्चेति विधिबोधितत्वेन नित्यत्वात् । नित्ये कामनाया अभावादित्यर्थः । ननु यद्यर्थजिज्ञासुरेवाधिकारी तर्हि तस्य परनिष्णातत्वाऽभावात् **शब्दब्रह्मणी**त्यादिनिन्दार्थवादस्य का गतिरित्यत आहुः–**'निन्दार्थवादे'**ति । **आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य** इत्यत्र श्रवणोत्तरं मननं

केश्चिद्विरचिता वेदान्तचन्द्रिका ।

त्याहुः—**'अन्येने'**ति । अथवा ज्ञानविधिना ज्ञानशब्देन साक्षात्कारोऽप्युक्त एवेत्याशङ्क्याहुः— **'अन्येनैवे'**ति । **साक्षात्कर्तव्य** इत्यनेनैव साक्षात्काररूपफलकामनाया ज्ञापनाद्**ब्रह्मविदाप्नोति परमि**त्यनेन चेति । फलकामनाया अधिकारिविशेषणत्वे दूषणमाहुः—**'नित्यत्वादि'**ति । **साङ्गोऽध्येयो ज्ञेयश्च, ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावज**मित्यादिश्रुतिस्मृतिभ्यो नित्यार्थज्ञानं फलं, कामयमानं नाधिकारिणमपेक्षते । **यस्तं नवेदेति, स्थाणुरयं भार हार** इति, **गीती शीघ्री**त्यादिनिन्दाश्रवणादपि नित्यमेवार्थज्ञानमित्यतोऽपि तथा । शब्दब्रह्मणीत्यादिनिन्दार्थवादस्य व्यवस्थामाहुः—**'निन्दे'**ति । ब्रह्मजिज्ञासापदं विवरिषवः सर्वस्याऽपि समन्वयादिरूपस्य शास्त्रार्थस्य

श्रीलालूभट्टकृता गूढार्थदीपिका ।

निन्दार्थवादात्परनिष्णातत्वस्य नित्यत्वेन तस्य च वेदान्तमीमांसाधीनत्वेन वेदान्तमीमांसाधिकारे परप्रेप्सोः कुतो न निवेश इत्याशङ्क्याऽऽहुः–**'निन्दार्थवादस्त्वि'**ति । **शब्दब्रह्मणि निष्णात** इति निन्दार्थवाद इत्यर्थः । **'मननादिविधिशेष'** इति । **आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्य** इति श्रुतावात्मशब्दवाच्यस्य परब्रह्मणो मननादि विधीयते । तत्र सहायभूतोऽयमर्थवादः सर्वथा परनिष्णातत्वं सम्पादनीयमिति बोधयन् परनिष्णातत्वस्य मननाधीनत्वान्मननमावश्यकमिति दृढयत्यतो मननादिशेषत्वाद्वेदान्तमीमांसाधिकारे परप्रेप्सुं निवेशयितुं न समर्थ इति बोध्यम् ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

त्वादिति । तथा च सन्ध्यावन्दनवद्वेदान्तविचारसम्पाद्यब्रह्मज्ञानस्य नित्यत्वेन फलत्वेन फलकामनावतोऽधिकारकल्पने कामनाशून्येन तादृशज्ञानासम्पादने प्रत्यवायो न भवेदिति भावः । **निन्दार्थवादः** 'अधेनुमिवे'त्यादिनिन्दार्थवादः । **मनसे**त्यादि । तथा च मनननिदिध्यासनाकरणे श्रमफलबोधक इत्यर्थः ।

१—शास्त्रकृताऽर्थमर्यादेति कपुस्तकम् । २—द्वितीयार्थतृतीयार्थचतुर्थायेत्यादि पाठः कदाचित्स्यात् ।

ननु ब्रह्मणो विचारे प्रतिज्ञाते, विरोधनिराकरणादीनामप्रतिज्ञातार्थत्वम् । नचावक्तव्यत्वम् । निर्विचिकित्सज्ञानानुदयप्रसङ्गादिति चेत् । न । ब्रह्मण इति न कर्मणि षष्ठी,

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

तानि कर्तव्यानीत्याशङ्क्य परिहरन्ति—'**नचे**'ति । तत्र हेतुमाहुः—'**निर्विचिकित्से**'ति । विरोधनिराकरणादीनामनिरूपणे वाक्यानां परस्परविरुद्धत्वेन भासमानत्वात्कुतोऽपि समन्वयो न निःसन्देहं हृदयमारोढुमर्हति । तथा च कृतोऽप्यकृत एव भवेदिति तस्याऽऽवश्यकत्वम् । तथा सत्यप्रतिज्ञातार्थनिरूपणमित्युभयतःपाशा रज्जुरिति चेन्नेत्याहुः—'**ने**'ति । तत्र हेतुः—'**ब्रह्मण**' इति । '**न कर्मणी**'ति । ब्रह्मजिज्ञासा इत्यत्र ब्रह्मण इति न कर्तृकर्मणोः कृतीति कर्मणि षष्ठी । किन्तु कर्मादीनामपि सम्बन्ध-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

विहितम् । निन्दार्थवादवाक्येऽपि शब्दे निष्णातः परे यद्यनिष्णातस्तस्य निन्दा श्रूयते । तेन च कृत्वा मननविधेरर्थवादोऽयमिति ज्ञायते । एवं च मननविध्येकवाक्यतया प्रामाण्यं मन्तव्यमिति भावः । एतावता प्रबन्धेनाऽधिकारी, परप्राप्तिरूपं प्रयोजनं चोक्तम् । शङ्कामुखेन विषयं निर्वक्तुमाहुः—'**नन्वि**'ति । '**विरोधे**'ति । द्वितीयाद्यध्यायोक्तानामिति शेषः । विरोधनिराकरणादीनामनावश्यकत्वादस्त्वप्रतिज्ञातार्थत्वमित्याशयेन शङ्कते—'**नचे**'ति । न हीत्यर्थः । अवक्तव्यत्वं द्वितीयाद्यध्यायार्थस्याऽनिरूपणीयत्वं स्वीक्रियत इति न हीत्यर्थः । तथा सति दूषणमाहुः—'**निर्विचिकित्से**'ति । परमतनिराकरणपूर्वकस्वमतव्यवस्थापनं हि निरूपणम् । एवं चैतादृशनिरूपणाऽभावात्साङ्ख्यादीनां निराकरणाभावे जगत्कर्तृ ब्रह्म वा प्रधानं वेति सन्देहे निःसन्दिग्धं ब्रह्मविषयकं शाब्दबोधात्मकं ज्ञानं न स्यादिति भावः । समाधान-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

प्रतिज्ञाविषयत्वप्रदर्शनार्थमप्रतिज्ञातत्वमाशङ्क्य निराकुर्वन्ति—'**नन्वि**'त्यादिना । '**ब्रह्मण**' इति । तद्विचारस्य वेदान्तवाक्यैः करिष्यमाणत्वेन वेदान्तवाक्यसमन्वयरूपस्य प्रथमाऽध्यायाऽर्थस्य प्रतिज्ञातत्वेऽपि विरोधनिराकरणसाधनफलरूपाणामन्येषामध्यायार्थानामप्रतिज्ञातत्वं सिद्ध्यति । नन्वप्रतिज्ञातत्वान्मास्तु तन्निरूपणमित्यत आहुः—'**नचे**'ति । तत्र हेतुः—'**निर्विचिकित्से**'ति । '**ब्रह्मण इती**'ति । इयमाशङ्का तदा स्याद्यदि कर्मषष्ठीयम् । नच **कर्तृकर्मणोः कृतीति** विशेषविधानाज्जिज्ञास्यमात्रापेक्षत्वाच्च जिज्ञासायाः कर्मषष्ठ्येव कुतो न स्यादिति वाच्यम् । पूर्वोक्तदोषतादव-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ननु शेषषष्ठ्यङ्गीकारे ब्रह्मसंबन्धिपदार्थजिज्ञासायां प्रतिज्ञातायां ब्रह्मणो गौणत्वापत्तिरजिज्ञा-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

ब्रह्मणो विचारे सर्ववेदान्तवाक्यानां ब्रह्मणि समन्वयरूपे विचारे । '**विरोधे**'त्यादि । तथाचाविरोधसाधनफलानामध्यायत्रितयनिरूप्याणामप्रतिज्ञातनिरूपणमधिकं निग्रहस्थानमित्यर्थः । **नचावक्तव्यत्वं** समन्वयभिन्नस्य अविरोधादित्रयस्यानिरूपणीयत्वं मीमांसायामित्यर्थः । '**निर्विचिकित्से**'त्यादि । सिद्धान्तविरोधिप्रकारनिरसनपूर्वकब्रह्मज्ञानानुदयप्रसङ्गादित्यर्थः । **इति चेत्** ब्रह्ममात्रनिरूपणे निर्विचिकित्सब्रह्मज्ञानानुदयः निर्विचिकित्सब्रह्मज्ञानसम्पादकाविरोधादित्रयनिरूपणे चाप्रतिज्ञातनिरूपणदोष इत्युभयतःपाशा रज्जुरिति चेत् ।

नेत्यर्थः । तत्र हेतुरूपं समाधानमुपवर्णयन्ति । '**ब्रह्मण**' इत्यादिना । **न कर्मणि,** 'न कर्तृ-

किन्तु शेषषष्ठी । तथा च ब्रह्मसम्बन्धि तज्ज्ञानोपयोगि सर्वमेव प्रतिज्ञातं वेदितव्यम् । नच

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

मात्रविवक्षायां षष्ठ्येवेति सम्बन्धमात्रषष्ठीति ब्रह्मसम्बन्धितज्ज्ञानोपयोगिसर्ववस्तुविषयो विचार इत्युक्तं भवति । तथा च ब्रह्मलक्षणप्रमाणयुक्तिसाधनप्रयोजनविचाराः सर्वेऽपि जिज्ञासयाऽवरुद्धा भवन्ति । साक्षात्पारम्पर्येण ब्रह्मसम्बन्धादिति नाऽप्रतिज्ञातार्थनिरूपणमिति भावः । कर्मषष्ठीपरिग्रहे ब्रह्ममात्रमेव जिज्ञास्यं स्यान्न त्वितराणि । ब्रह्मण इति षष्ठीसमासप्रदर्शनेन 'ब्रह्मणे जिज्ञासेति' चतुर्थीसमासो वृत्तिकृदभिमतः परास्तो वेदितव्यः । पाणिनिः किल '**चतुर्थी तदर्थार्थबलिहितसुखरक्षितैरि**'ति तादर्थ्यसमासं सस्मार । चतुर्थ्यन्तः शब्दस्तदर्थवचनादिभिः शब्दैः समस्यते । चतुर्थ्यन्तशब्दार्थस्तच्छब्देन परामृश्यते । तस्मा इदं तदर्थम् । यथा कुण्डलाय हिरण्यमित्यत्र कुण्डलं चतुर्थ्यन्तशब्दार्थः । तच्छेषो हिरण्यम् । तत्र कुण्डलशब्दश्चतुर्थ्यन्तः कुण्डलशेषवाचिना हिरण्यशब्देन समस्यते कुण्डलहिरण्यमिति । तथार्थशब्दादिनापि । ब्राह्मणार्थं पय इत्यादि द्रष्टव्यम् । कात्यायनेन त्वयं समासः प्रकृतिविकृत्योर्नियमितः । तादर्थ्यसमासे प्रकृतिविकृतिग्रहणं कर्तव्यमिति । तथा च यूपदार्वादिष्वेव प्रकृतिविकारभूतेषु चतुर्थीसमासो नाऽप्रकृतिविकारभूत इति । नन्वेवमश्वघासादिशब्देष्वप्रकृतिविकारभूतेषु कथं तादर्थ्यसमास इति चेत् । उच्यते । '**अश्वघासादयः षष्ठीसमासा भविष्यन्ती**'ति कात्यायनेनैव तत्र षष्ठीसमासप्रतिविधानादित्यलं प्रसक्तानुप्रसक्त्या ।

प्रकृतमनुसरामः । नन्वत्र कर्मषष्ठ्येवोच्यतां जिज्ञास्यमात्रापेक्षत्वाज्जिज्ञासाया इति चेत्तर्हि विरोधनिराकरणादीनामनिरूपणीयत्वमेव स्याज्जिज्ञासया कर्मत्वेन ब्रह्मण एवाऽवरुद्धत्वादिति चेत् । न । प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति तान्यर्थाक्षिप्तान्येवेति न पृथक्सूत्रयितव्यानि । यथा 'राजासौ गच्छती' त्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति, तथेति

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

माहुः—'**ने**'त्यादि । '**न कर्मणि षष्ठी किन्तु शेषषष्ठी**'ति । कर्मषष्ठ्यां स्वीकृतायां केवलब्रह्मकर्मकज्ञानोपयोगिविचार एव प्रतिज्ञातः स्यात् । तथा च द्वितीयाद्यध्यायार्थस्याऽप्रतिज्ञातत्वेनाकस्मिकत्वापत्तिरूपदोषः स्यात् । शेषषष्ठ्यां स्वीकृतायां तु तस्याश्च सम्बन्धवाचकत्वात्सम्बन्धस्य च द्विनिष्ठत्वेन

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

स्थ्यात् । न च विरोधनिराकरणादीनामाक्षेपलभ्यत्वान्न दोष इति वाच्यम् । आक्षेपस्वरूपासिद्धेः । न हि शाब्देऽर्थे तदुपलक्षिताऽनुपपत्तिप्रतिसन्धानमन्तराऽऽक्षेपसम्भवः । न च विरोधनिराकरणाद्यन्तरेण गोत्वादिवजिज्ञासाया जिज्ञास्यलाभेनैवाऽऽकाङ्क्षोपशमाद्विचारस्य वा स्वरूपानुपपत्तिरस्ति । तद्विनापि ब्रह्मकर्मिका जिज्ञासा कर्तव्येति वाक्यार्थसिद्धेः । नाऽप्युक्तराजदृष्टान्तेन विरोधनिराकरणादीनामार्थिकी प्राप्तिः सम्भवति । एकाकिनोऽपि राज्ञो गमनदर्शनाद्दृष्टान्तस्यैवाऽसिद्धेः । अपि च विरोधनिराकरणस्य **कर्तृकर्मणोः कृती**ति विशेषविधानेऽपि विवक्षाऽधीनत्वाद्विभक्तीनां, ब्रह्मणः कर्मत्वे

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

कर्मणोः कृति'इतिसूत्रविहिता षष्ठीत्यर्थः । तथा च तादृशषष्ठ्यङ्गीकारे 'हरिं भजते' इत्यत्र हरिभिन्नभजनाबोधवत् ब्रह्मभिन्नविचारालाभोऽपि भवेदिति भावः । **शेषषष्ठी** विशेषरहितं सामान्यं शेष इति सम्बन्धसामन्ये षष्ठीति फलितमित्यर्थः । **तज्ज्ञानोपयोगि** ब्रह्मज्ञानोपयोगि । **सर्वमेव** वेदान्ते

१—सम्बन्धमात्रे इति कपुस्तकम् ।

गौणतापत्तिरजिज्ञास्यत्वं च स्यादिति वाच्यम् । ब्रह्ममात्रे सन्देहाभावात् । सन्दिग्धस्यैव

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

चेत् । उच्यते । कर्मषष्ठ्याः सम्बन्धविशेषवाचकत्वात् । न हि 'हरिं भजे' त्युक्ते तत्सम्बन्धिनोऽन्यस्य भजनमापतति । विशेषो हि सामान्यरहितः, सामान्यं तु न निर्विशेषमिति, कर्मषष्ठ्या सम्बन्धसामान्यग्रहणे कर्मादीनामपि सम्बन्धमात्रविवक्षायां **'षष्ठ्या वे'**त्यस्य निर्विषयत्वापत्तिरेव भवेत् । न**'न्वधीहि भगवो ब्रह्मे'**ति भृगुप्रश्ने **'यतो वा इमानि भूतानी'**त्यारभ्य **'तद्विजिज्ञासस्व तद्ब्रह्मे'**त्यनेन सन्दर्भेण प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं प्रतीयते, तद्वदत्राऽपि भविष्यतीति चेत् । न । तत्र युक्तं ब्रह्मणः कर्मत्वम् । तन्मात्रस्यैव प्रश्नविषयत्वात् । अत्र तु विरोधनिराकरणादीनामपि सत्वेन ब्रह्मसम्बन्धितज्ज्ञानोपयोगि सर्वमेव जिज्ञासाविषयत्वेनाङ्गीकर्तव्यम् । तच्च **शेषषष्ठीपरिग्रह एव सम्भवतीति न कर्मषष्ठी** परिग्रहीतुं शक्येत्यर्थः । नन्वेवं सति ब्रह्मणो जिज्ञासां प्रति गौणतापत्तिरजिज्ञास्यत्वं च स्याद्विरोधनिराकरणादीनामिवेत्याशङ्क्य परिहरन्ति— **'नचे'**ति । अजिज्ञास्यत्वं यदुक्तं तत्रोत्तरमाहुः—**'ब्रह्ममात्र'** इति । ब्रह्मणो हि स्वरूपतोऽजिज्ञास्यत्वमेव । यद्धि सन्दिग्धं तदेव जिज्ञास्यम् । नाऽसन्दिग्धम् । न हि ब्रह्मणि कस्यापि सन्देहोऽस्ति ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ब्रह्मसम्बन्धि यद्विरोधनिराकरणादि ब्रह्म च एतदुभयज्ञानोपयोगि सर्वमेव प्रतिज्ञातं वेदितव्यमिति भावः । ननु विवक्षाधीनशेषषष्ठ्यां स्वीकृतायां तु दोष एव नास्ति, परन्तु न कर्मणि षष्ठीति भाष्यं न संगच्छते, कुतः, प्रतिपदविधाना षष्ठी न समस्यते इति वार्तिकात् समासनिषेधेन कर्मषष्ठ्यां समासप्राप्त्यभावादिति चेत् । न । कृद्योगा च षष्ठी समस्यत इति प्रतिप्रसवात्समासो भविष्यतीति

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ऽविवक्षते सम्बन्धमात्रविवक्षायां शेषषष्ठी भवत्येवेति न कर्मणि षष्ठी । पाणिनीयसूत्रविरोधाभावाच्च । तत्फलमाहुः–**'तथाचे'**ति । शेषषष्ठ्येव । ब्रह्मसम्बन्धिनो ब्रह्मज्ञानोपयोगिनः सर्वस्यापि विरोधनिराकरणादेः प्रतिज्ञानान्न कस्याप्याकस्मिकत्वाऽऽपत्तिरित्यर्थः ।

नन्वेवं ब्रह्मसम्बन्धिनो विचारे प्रतिज्ञाते ब्रह्मणो गौणत्वादजिज्ञास्यत्वाऽऽपत्तिः स्यादित्यत आहुः–**'नचे'**ति । **'ब्रह्ममात्र'**इति । आस्तिकानां ब्रह्मसत्तायां सन्देह एव नास्ति । किन्तु निर्धर्मकत्वं

श्रीलालूभट्टकृता गूढार्थदीपिका ।

स्यत्वं च स्यादित्याशङ्क्य समादधते । **'न च गौणतापत्ति'**रित्यादिना । **'ब्रह्ममात्रे सन्देहाभावा'**दिति । ब्रह्मणः समस्ताऽऽस्तिकतन्त्रसिद्धत्वेन सन्देहाऽभावान्न जिज्ञास्यत्वं किन्तु ब्रह्मधर्मादीनामेव सन्दिग्धत्वाजिज्ञास्यत्वमतो धर्मरूपादेर्ब्रह्मसम्बन्धिनो जिज्ञासैव ब्रह्मजिज्ञासेत्यर्थः । ननु

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

निरूप्यं सर्वमेवत्यर्थः । **'नच गौणते'**त्यादि । तथा च जिज्ञास्यकोटिप्रविष्टाविरोधादितुल्यतया ब्रह्मणो गौणतापत्तिरित्यर्थः । अत एवाविरोधादितुल्यतयाऽजिज्ञास्यत्वमपि स्यादित्यर्थः । **ब्रह्ममात्रे** ब्रह्मस्वरूपसत्तायां । **जिज्ञास्यता** निश्चयार्थं विचार्यता । नन्वेवं ब्रह्मणोऽजिज्ञास्यत्वे प्रतिज्ञासूत्रविरोध

१ संबन्धीत्येव खपुस्तकम् ।

जिज्ञास्यता । गौणत्वं तु शब्दत एव, नत्वर्थतः । वेदप्रामाण्यं तु प्रतितन्त्रसिद्धत्वात् न विचार्यते । तस्मात् ब्रह्म जिज्ञासितव्यमिति सिद्धम् ।

॥ इति प्रथमाध्याये प्रथमे पादे जिज्ञासाधिकरणम् ॥

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

सर्वोऽप्यहमिति प्रत्येति । नाहमनहं चेति । नन्वेवं ब्रह्मणोऽजिज्ञास्यत्वे प्रतिज्ञासूत्रमसङ्गतमेव स्यादिति चेत् । न । शास्त्रशब्दव्युत्पत्त्या शास्त्रस्य सन्देहवारकत्वेन ब्रह्मनिष्ठक्रियाशक्तिज्ञानशक्त्योः सन्दिग्धत्वात्तन्निराकरणार्थमेव शास्त्रारम्भ इति नासङ्गतत्वं शास्त्रस्य । कैव कथा प्रतिज्ञासूत्रस्येति भावः । गौणतापत्तेरुत्तरमाहुः—**गौणत्वमिति** । प्रतिवादिनाऽपि षष्ठीसमासाभ्युपगमे ब्रह्मणो जिज्ञासाव्यावर्त्तकत्वेन गौणत्वापत्तेः षष्ठीसमासपरिग्रहेऽपि ब्रह्मणो वास्तवप्राधान्योपपत्तेरित्यनेन शब्दतो गौणत्वेऽप्यर्थतः प्राधान्योपपत्त्या परिहृतत्वात् । यथा ब्रह्मविदाप्नोतीत्यादौ ब्रह्मणो ज्ञानविषयत्वेन शब्दतो गौणत्वेऽप्यर्थतः प्राधान्येन न किञ्चिदनुपपन्नं तथात्रापीत्यर्थः । ननु प्रतिज्ञासूत्रे ब्रह्मजिज्ञासा प्रतिज्ञाता । सा च वेदान्तवाक्यान्तर्गतशब्दशेषभूता । तथा सति सिद्धे वेदान्तवाक्यप्रामाण्ये महता प्रयासेन सा कर्तुमुचिता । तदेव तु जिज्ञासायाः पूर्वं विचारणीयमित्याशङ्कायामाहुः—'**वेदप्रामाण्यमि**'ति । कैव कथा वेदान्तवाक्यानाम् । सर्वस्याऽपि वेदस्य प्रामाण्यं तु । **प्रति** प्रतिकूलानि तन्त्राणि । सिद्धान्ताः कणादन्यायमायावादादिरूपाः । तेषु सिद्धत्वान्न विचारस्यावकाशः । सन्देहे हि विचाराः । वेदाऽप्रामाण्यं तु न सर्वत्राऽपि सिद्धमिति द्वितीयकोट्युपस्थित्यभावात्सन्देहाभावस्ततो विचाराऽभाव इत्यर्थः । उपसंहरन्ति—'**तस्मादि**'ति ।

इति जीज्ञासाधिकरणम् ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

कर्मषष्ठ्येव स्वीकार्येति प्राप्ते **न कर्मणि षष्ठी**ति भाष्यं संगतमिति भावः । अत्र शेषषष्ठ्याः ज्ञो विदर्थस्य करणे इत्यादि जगत्कर्तृत्वादीनां विधानाभावात् प्रतिपदेति वार्तिकस्याऽप्रवृत्त्या समासो भविष्यतीत्यलमप्रकृतविचारेण ।

ननु तर्हि प्रथमाध्यायोक्तानां भगवद्गुणानां द्वितीयाध्यायोक्तानामविरोधादीनां ब्रह्मसम्बन्धिनां जिज्ञास्यत्वेन प्रतिज्ञातार्थत्वे धर्मांशे ब्रह्मणो गुणभूतत्वाद्गौणत्वापत्तिः । एवं यदंशे प्रतिज्ञातं तदंशे एव जिज्ञासा प्रवर्तत इति ब्रह्मणोऽजिज्ञास्यत्वं च स्यादित्याशयेन शङ्कते—'**नन्वे**'ति । सर्वं ज्ञानं धर्मिण्यंशेऽभ्रान्तं प्रकारेतु विपर्यय इत्यनेन धर्म्यंशे भ्रान्तिरेव नास्ति । यथा दूराद्दृष्टे पुरुष उच्चैस्त्वविशिष्टे

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

सधर्मकत्वं वेति सन्देह इति, धर्मा एव सन्दिग्धा इति धर्मिणोऽपि सन्दिग्धस्य जिज्ञास्यता । '**गौणत्वन्त्वि**'ति । शब्दतो गौणत्वेऽपि न स्वरूपतो गौणत्वं भवति । पित्रा सहाऽऽगतः पुत्र इत्यादौ

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ब्रह्मणो जिज्ञासेति षष्ठीतत्पुरुषे षष्ठ्यन्तपदवाच्यस्य विशेषणत्वाद्ब्रह्मणो गौणत्वापत्तिरित्याशङ्क्य समादधते '**गौणत्वं तु शब्दत एव नत्वर्थत**' इति । यथा राज्ञः सेवक इत्यादौ षष्ठ्यन्तपदवाच्यस्य

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

इति चेन्न । परे ब्रह्मणि ज्ञानक्रियाशक्त्योः सन्दिग्धत्वेन तन्निर्णयार्थमेव व्यासशास्त्रप्रवृत्तेः धर्मिनिर्णयं विना च तन्निर्णयासम्भवात् ब्रह्मणोपि जिज्ञास्यतोपपत्तेरिति । '**गौणत्व**'मित्यादि । तथा च 'ब्रह्मवि-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

सूत्रान्तरमवतारयितुं शङ्कते—'**नदि**'ति । मुमुक्षुणा ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्य इति प्रतिज्ञायां शेषषष्ठीपरिग्रहेण ब्रह्मस्वरूपविचारवत्प्रमाणयुक्तिसाधनफलविचाराणामपि प्रतिज्ञातत्वेन कथं प्रथमं ब्रह्मैव विचार्यत इति चेत् । उच्यते । अत्र यद्यपि प्रमाणादीनि सर्वाण्यपि प्रतिज्ञातानि तथापि स्वरूपस्य प्राधान्यात्प्रथमं तदेवाऽऽक्षिप्य समर्थ्यते । तत्राऽनेकार्थत्वाद्ब्रह्मशब्दस्य भवति संशयः । कस्य ब्रह्मणो जिज्ञासेति । अस्ति च ब्रह्मशब्दो विप्रत्वजातौ यथा—'**जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेदि**'त्यादौ । अस्ति च वेदे । यथा—**शब्दब्रह्मणि निष्णातो न निष्णायात्परे**

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

पुरोवर्तिनि सन्देह एव नास्ति स्थाणुत्वपुरुषत्वांश एव सन्देह इति तत्रैव जिज्ञासा । तथा पठनकाल एव **सत्यं ज्ञानमनन्तं ब्रह्मे**त्यस्य वाक्यार्थे ज्ञाते केवलं ब्रह्मांशे तु सन्देह एव नास्ति । परन्तु एतादृशं ब्रह्म जगत्कारणं वा न वा, द्युभ्वादीनां विधारकं वा नवेति, सन्देहो जायते । कुतः साङ्ख्यैः साङ्ख्यादिस्मृत्युक्तप्रधान एवैतादृशगुणवत्त्वस्वीकारात् । एवं च यदंशे संशयस्तदंश एव जिज्ञासेति भगवद्गुणानां जिज्ञास्यत्वे सिद्ध एतादृशगुणवत्त्वेन ब्रह्मण एव जिज्ञासासिद्धेर्नोजिज्ञास्यत्वं न वा गौणत्वमित्याशयेन समाधानमाहुः—'**ब्रह्ममात्रे**'ति । ब्रह्मांशे निश्चये सति, ब्रह्म एतादृशं वा नवा, ब्रह्म एतादृशमेव कुतो नेत्याकारकः संशयो वा विचारो वा प्रवर्तत इत्येतदर्थं मात्रपदम् । '**सन्दिग्धस्यैवे**'ति । सन्देहविषयीभूतस्य जगत्कर्तृत्वादिधर्मस्येत्यर्थः । जिज्ञास्यता विचार्यता । राज्ञा सहागतोऽमात्य इत्यत्र शब्दतो राज्ञः गौणत्वेऽपि तद्गौणत्वं मुख्यत्वविघातकं न भवतीत्याशयेनाऽऽहुः—'**गौणत्वं त्वि**'ति । इष्टापत्त्यर्थे तुशब्दः । निराधारगुणवर्णनासम्भवाद्भगवत्सम्बन्धिगुणवर्णने भगवद्वर्णनमेवेत्याशयेनाऽऽहुः—'**न त्वर्थत**' इति । ननु वेदप्रामाण्यांशे संशये सति वेदार्थविचारस्याऽजागलस्तनायमानत्वान्नैव कर्तव्य इत्यत आहुः—'**वेदप्रामाण्यमि**'ति । न्यायादितन्त्रसिद्धत्वान्न विचार्यत इत्यर्थः । आस्तिकानां वेदप्रामाण्यांशे सन्देह एव नास्तीति तदर्थं न विचार इति

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

तथा दर्शनात् । ननु वेदान्तवाक्यैरेवाग्रे विचारस्य करिष्यमाणत्वात्पूर्वं वेदप्रामाण्यं कुतो न विचारितमित्यत आहुः—'**वेदप्रामाण्यमि**'ति । प्रतितन्त्राणि विरुद्धशास्त्राणि काणादाक्षपादीयमायावादिप्रभृतीनि । तेष्वपि सिद्धत्वान्न विचार्यते । सिद्धमाहुः—'**तस्मादि**'ति । उक्तरीत्या लौकिकानां सन्दिग्ध-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

विशेषणत्वाच्छब्दतो राज्ञो गौणत्वेऽप्यर्थे विचार्यमाणे सेवकस्यैव गौणत्वं न तु राज्ञस्तथेहापि ब्रह्मण इति षष्ठ्यन्तपदवाच्यस्य ब्रह्मणः शब्दतो गौणत्वेऽप्यर्थे विचार्यमाणे सर्वैः प्रकारैर्ब्रह्मण एवाऽस्मिन् शास्त्रे मुख्यतेति भावः । ननु वेदार्थब्रह्मणो वेदानुकूल एव विचार इति पूर्वमुक्तत्वात्पूर्वं वेदनिरूपणमावश्यकं तस्य च वेदस्य प्रामाण्यं प्रथमतो विचारणीयमतो वेदान्तसूत्रकृता भगवता बादरायणेन

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

दाप्नोति पर'मित्यत्र ब्रह्मणो ज्ञानविशेषणतया शब्दमर्यादया गौणत्वेप्यर्थतो यथा प्राधान्यं, तथा ब्रह्मणो जिज्ञासेत्यत्र षष्ठ्यर्थसम्बन्धविशेषणतया शब्दतो ब्रह्मणो गौणत्वेप्यर्थतः प्राधान्यमस्त्येवेत्यर्थः ।

ननु वेदान्तवाक्यविचारेणैव सर्वनिर्णयः कार्यः स च वेदप्रामाण्यनिर्णयाधीन इति स आदौ

गोस्वामिश्रीमन्मुरलीधरविरचिता अणुभाष्यव्याख्या।

यदि'। **ब्रह्मोन**मित्यादौ। अस्ति च परमात्मनि—यथा '**ब्रह्म वेद ब्रह्मैव भवती**'ति। तस्माद्ब्रह्म किंलक्षणम्। लक्षणं हि सजातीयविजातीयवस्तुव्यावृत्तिप्रयोजनधर्मः। तच्च द्विविधम्। स्वरूपकार्यभेदेन। तत्र कार्यलक्षणं तावज्जगन्न सम्भवति। यद्यावदनुभूयते तत्सर्वं परिमितमविशुद्धमबुद्धं विध्वंसि न तेनोपलब्धेन तद्विरुद्धस्वभावस्य ब्रह्मणः स्वरूपं लक्षयितुं शक्यम्। न जातु कोऽपि कृतकत्वेन हेतुना नित्यत्वं साधयितुं शक्नोति।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

भावः। '**तस्मादि**'ति। गुणविचारे ब्रह्मणोऽर्थतो मुख्यत्वादित्यर्थः। विद्यमानगुणवत्तयैव ब्रह्मजिज्ञास्यमिति शेषषष्ठ्येव युक्तेत्यत्र गमकमाहुः—'**किञ्चे**'त्यादि '**इती**'त्यन्तम्। ब्रह्मविचारविषयणीं प्रतिज्ञां कृत्वाऽग्रे कार्यलक्षणं वदति, तेन कृत्वा किं ज्ञायते ब्रह्मसम्बन्धि गुणवत्त्वेन '**ब्रह्मण** एव वेदार्थत्वमि'ति सम्बन्धषष्ठ्या बोध्यत इति भावः। एवं चैतादृशगुणविशिष्टं ब्रह्मप्रतिपादनं विषयः। सम्बन्धश्च प्रतिपाद्यप्रतिपादकभावः। अधिकारी प्रयोजनं च द्वयं पूर्वमुक्तम्। एतावता प्रबन्धेनाधिकारिविषयसम्बन्धप्रयोजनरूपमनुबन्धचतुष्टयं प्रेक्षावतां प्रवृत्त्यर्थं निरूपित**मिति प्रथमाधिकरणम्**।

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

त्वाद्ब्रह्मप्रतिपत्त्यर्थं हि ब्रह्मसम्बन्धिनां विचार, इत्यर्थतः प्रधानत्वाच्च, वेदार्थभूतं ब्रह्म वेदानुकूलविचारविषयीकर्तव्यमिति सिद्धम्।

इति वेदान्तचन्द्रिकायां जिज्ञासाऽधिकरणम्।

श्रीलालभट्टकृता गूढार्थदीपिका।

वेदप्रामाण्यं कुतो न विमृष्टमित्याशङ्क्याऽऽहुः—'**वेदप्रामाण्यमि**'त्यादि। आस्तिकप्रतितन्त्रसिद्धत्वान्न सूत्रकृता विचार्यत इत्यर्थः।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

कुतो न कृत इत्यत आहुः। '**वेदे**'त्यादि। **प्रतितन्त्रे**त्यादि। गौतमकणादादिसकलशास्त्रसिद्धत्वेनाप्रामाण्यकोट्यनुपस्थितेरिति भावः॥ १॥

इति जिज्ञासाधिकरणम्॥

द्वितीयं जन्माद्यधिकरणम् ।

किञ्च, तत्र किंलक्षणं किंप्रमाणकमिति जिज्ञासायामाह सूत्रकारः–

जन्माद्यस्य यतः शास्त्रयोनित्वात् ॥ २ ॥

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

ननु तद्धर्मेण नित्यत्वादिनैव तल्लक्ष्यतामिति चेत् । न । तस्योपलब्धिविषयत्वाऽभावात् । उपलब्धे हि लक्षणं भवति । नानुपलब्धं, नाऽप्रसिद्धमित्यनुसन्धायोक्तं किं लक्षणमिति । नन्वनुभूयमानस्य सर्वस्य ब्रह्मस्वभावविरुद्धत्वेन लक्षणत्वं मास्तु । शब्दप्रमाणप्रतिपादितेन नित्यत्वादिना स्वरूपलक्षणेनैव तल्लक्ष्यतामिति चेत् । न । अत्यन्ताऽप्रसिद्धत्वेन[1] ब्रह्मणोऽपदार्थस्य वाक्यार्थत्वाऽभावात् । तस्माल्लक्षणप्रमाणयोरभावान्न ब्रह्मजिज्ञासितव्यमित्याक्षेपाभिप्रायः । तमिममाक्षेपं सूत्रकारः परिहरति—**'जन्माद्यस्य यतः शास्त्रयोनित्वात्'** । ननूदितसन्देहे शास्त्रप्रवृत्तिरत्र तु सन्देह

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

पूर्वसूत्रेण ब्रह्मविचारे प्रतिज्ञाते, कथं कर्तव्य इत्याकाङ्क्षा जायते । तदर्थं, समन्वयाविरोधाभ्यां कर्तव्य इति बोधयितुं सर्वेषां वाक्यानां ब्रह्मणि समन्वयः प्रथमाध्याये प्रतिपाद्यते । अविरोधश्च द्वितीयाध्याये । तत्रादौ **यतो वा इमानि भूतानी**त्यादिवाक्यानां ब्रह्मणि समन्वयं वक्तुं लक्षणप्रमाणबोधकं जन्माद्यधिकरणमवतारयन्ति–**'तत्रे'**ति । **जन्माद्यस्य यतः शास्त्रयोनि-**

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

जन्माद्यस्य यतः शास्त्रयोनित्वात् । २ । गुणवत्त्वेनैव ब्रह्मणो जिज्ञास्यत्वे गमकमाहुः—**'किञ्चे'**ति । **'तत्रे'**ति । ब्रह्मणोऽधिजिज्ञास्यत्वे, अथवा शेषषष्ठीपरिग्रहे ज्ञापकान्तरं प्रदर्शयन्नेव सूत्रमवतारयन्ति–**'किञ्चे'**ति । **तत्र** ब्रह्मसम्बधिनो विचारे प्रस्तुते । **लक्ष्यते ज्ञायते येन तल्लक्षण**मसाधारणो धर्मः । **प्रमाणं** तादृशलक्षणकाऽवगतिसाधनम् । अत्र पदद्वयेऽपि बहुव्रीहिः । **'इती'**ति । प्रधानत्वात्पूर्वं ब्रह्मण एव पूर्वोक्ताकारकज्ञानेच्छायां ब्रह्मसूत्रनिर्माणकर्ता भगवान् वेदव्यास इदं सूत्रं प्रणीतवान्–**'जन्माद्यस्य यतः शास्त्रयोनित्वादिती'**ति । तथाचाऽनेन सूत्रेणैव ब्रह्मसम्बन्धिलक्षणप्रमाणयोः प्रदर्शनाच्छेषष्ठ्येव सूत्रकाराशयगोचर इति ज्ञेयम् ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

जन्माद्यस्य यतः शास्त्रयोनित्वात् ।२। सूत्रार्थस्तु, **अस्य** प्रपञ्चस्य यतो जन्मादि तद्ब्रह्म।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

जन्माद्यस्य यतः शास्त्रयोनित्वात् ॥ २ ॥ उक्तरीत्या वेदान्तार्थब्रह्मणो जिज्ञास्यत्वे प्रतिज्ञाते केन प्रकारेण जिज्ञास्यतेत्याकाङ्क्षायां समन्वयाविरोधाभ्यां जिज्ञासा कर्तव्येति तत्रादौ समन्वयनिरूपणं सूत्रकाराभिप्रेतमिति सूत्रमवतारयन्ति—**'किञ्च तत्रे'**त्यादिना । **तत्र** जिज्ञासाविषयीभूते ब्रह्मणि । **आह** सूत्रेण लक्षणप्रमाणे आहेत्यर्थः । योगविभागेन **शास्त्रयोनित्वा**दिति सूत्रं पृथगिति केचित् वदन्ति । तन्न सम्यक्, अग्रिमसूत्रेषु सर्वत्र हेतुसाध्यनिर्देशपूर्वकमधिकरणरचनादर्शनादत्रापि तथैवोचितत्वादिति ।

---

१ अप्रसिद्धत्व इति खपुस्तकम् ।

ननु कथमत्र सन्देहः, यावता 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्याह श्रुतिरेव । विरुद्धं चैतत् । स्वरूपलक्षणाऽकथने कार्यलक्षणस्य वक्तुमशक्यत्वात् । विवादाध्यासितत्वाच्च ।

गोस्वामिश्रीमन्मुरलीधरविरचिता अणुभाष्यव्याख्या ।

एव नोदेतीति कथं जन्माद्यस्य यत इत्यादेः प्रवृत्तिरित्याशङ्कन्ते—'**नन्वि**'ति । सन्देहः कथं, किमाकारकोऽत्र । किंलक्षणं किंप्रमाणकमित्याकारकस्य तस्य वक्तुमशक्यत्वात् । कथमशक्यत्वमित्याकाङ्क्षायां तदेवोपपादयन्ति—'**यावते**'ति । ब्रह्मप्रपाठके '**ब्रह्मविदाप्नोति पर**'मित्यत्र किं तदित्याकाङ्क्षायां '**सत्यं ज्ञानमनन्तं ब्रह्मे**'ति स्वरूपलक्षणमुक्त्वा '**तस्माद्वा एतस्मादि**'त्यादिना कार्यलक्षणमुक्तम् । तथा च तद्विना पूर्वमेव तत्सूत्रे कार्यलक्षणोक्तिविरुद्धेत्याहुः—'**विरुद्धं चैतदि**'ति । एतत्कार्यलक्षणकथनं सूत्र उपपत्त्या श्रुत्या च '**सत्यं ज्ञानमि**'त्यादिकया विरुद्धम् । तदुपपादयन्ति—'**स्वरूपे**'ति । स्वरूपलक्षणं हि कार्यलक्षणस्योपजीव्यम् । तथा चोपजीव्यस्य प्राधान्यात्तद्विना तस्य वक्तुमशक्यत्वात् । प्रथमं कार्यलक्षणोक्तिरुपपत्त्या श्रुत्या च सूत्रे विरुद्धैव ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

त्वात् । २ । लक्षणज्ञाने सति संशयो न जायत इति कृत्वा जगज्जन्मादिकर्तृत्वं ब्रह्मत्वमिति ब्रह्मलक्षणं वक्तव्यम् । तच्च न सम्भवति । स्वरूपलक्षणेनैव संशयानुदयादित्याशयेन शङ्कते—'**नन्वि**'ति । यावदित्यवधारणे । तथा चाध्ययनानन्तरं विचारात्पूर्वमेव लक्षणज्ञाने जाते संशयो नोदेतीति भावः । '**विरुद्धमि**'ति । वेदे यस्मिन्प्रपाठके स्वरूपलक्षणं तदग्रिमप्रपाठके कार्यलक्षणमुक्तम् । अत्र तु विपरीतमिति श्रुतिविरुद्धमित्यर्थः । चोऽप्यर्थे । एतत् कार्यलक्षणप्रतिपादनमपीत्यर्थः । '**वक्तुमशक्यत्वादि**'ति । लक्ष्याऽज्ञानाल्लक्ष्ये लक्षणसमन्वयं कर्तुमशक्यत्वादित्यर्थः । '**विवादे**'ति । कार्यलक्षणस्य विवादग्रस्तत्वेन संशयनिराकरणं न भविष्यतीति भावः । ननु तस्यागमोक्तत्वान्निराकरणं

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ननु सन्दिग्धे हि विषये तज्ज्ञानार्थं लक्षणं, ब्रह्म तु **सत्यं ज्ञानमनन्तं ब्रह्मे**ति श्रुत्या निश्चितस्वरूपमिति कथं लक्षणप्रवृत्तिरित्याशङ्कामुत्थापयन्ति—**नन्विति** । **अत्र** ब्रह्मणि । यावतेत्यवधारणे । निश्चयेनेति यावत् । '**विरुद्धमि**'ति । स्वरूपलक्षणमन्तरा कार्यलक्षणमुक्तश्रुतिविरुद्धम् । जिज्ञासाविरुद्धं वा । '**एतदि**'ति । कार्यलक्षणम् । तत्र हेतुः—'**स्वरूपे**'ति । स्वरूपज्ञाने हि माहात्म्यजिज्ञासा भवति । हेत्वन्तरमाहुः—'**विवादे**'ति । विवादाश्रितत्वादित्यर्थः । तदेव दर्शयन्ति—

श्रीलालूभट्टकृता गूढार्थदीपिका ।

तत्र हेतुः—शास्त्रोक्तकारणत्वादिति । '**तत्र सन्देह**' इति । **तत्र** नित्यशुद्धमुक्तस्वभावत्वजगज्जन्मा-

भगवदीयश्रीमदिच्छाराममणीतः प्रदीपः ।

लक्षणार्थं वादी शङ्कते—'**नन्वि**'त्यादि।'**कथमत्रे**'त्यादि । निर्धर्मके ब्रह्मणि साधारणधर्मवद्धर्मिज्ञानरूपसंशयसामग्र्यसत्त्वात्कथं सन्देह इत्यर्थः । **यावता** निश्चयेन । '**विरुद्ध**'मित्यादि । श्रुतौ 'सत्यं ज्ञान'मित्यादिना स्वरूपलक्षणमुक्त्वा पश्चात्कारणलक्षणमुक्तं 'तस्माद्वा एतस्मादात्मन आकाशः

१ इत्यादिप्रवृत्तिरिति खपुस्तकम् । २ कार्यलक्षणे कृते स्पष्टत्वाज्जिज्ञासायाः पूर्णत्वादग्रिमशास्त्रवैयर्थ्यापत्तिः । स्वरूपलक्षणे तु माहात्म्यजिज्ञासायामग्रिमग्रन्थसार्थक्यमिति विरुद्धं कार्यलक्षणसूचकं जन्माद्यस्येति वक्तव्यमत्र ।

नहि ब्रह्मणो जगत्कर्तृत्वं सर्वसम्मतम्। नचाऽऽगमोदितमिति वेदमात्रस्य ब्रह्मप्रमाणकत्वं वक्तुं शक्यते। किञ्च व्यर्थश्चैवं विचारः। लक्षणप्रमाणाभ्यां हि वस्तुज्ञानं भवति। तच्च स्वरूपलक्षणेनैव भवतीति किमनेन। तस्मादयुक्तमुत्पश्याम इति—

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

दूषणान्तरमाहुः—'**विवादे**'ति। जगत्कर्तृत्वस्येति शेषः। तदेवोपपादयन्ति—**नहीति**। जगत्कर्तृत्वस्य ब्रह्मधर्मत्वे निश्चिते तल्लक्षणत्वं वक्तुं शक्यम्। नच तदस्ति। वेदान्तव्यतिरिक्तानां सांख्यादीनामसम्मतत्वात्। नन्विदमा निर्दिष्टस्य प्रपञ्चस्य प्रत्यक्षसिद्धत्वेऽपि तत्कर्तुरप्रत्यक्षत्वादागमोदित एव स इति वेदमात्रमेव तत्र प्रमाणम्। तथाच कथं तन्निष्ठस्य कर्तृत्वस्य विवादाध्यासितत्वमित्याशङ्क्याह—**न चागमोदितमिति**। न हि वेदमात्रमेव जगत्कर्तृसत्वे प्रमाणम्। इदं कार्यं सकर्तृकं कार्यत्वाद्घटवदित्याद्यनुमानादिप्रमाणान्तराणामेव मुख्यत्वेन तत्राङ्गीकृतत्वात्। आगमस्य तु तदनुरोधेन गौण्यापि नेतुं शक्यत्वात्। कार्यलक्षणोक्तौ दूषणान्तरमप्याहुः–किं चेति। एवं कार्यलक्षणोक्तिपूर्वकं ब्रह्मणो विचारो व्यर्थः। तत्कथं वैयर्थ्यमित्यत आह—'**लक्षणे**'ति। अत्राऽमृतत्वप्राप्तिसाधनीभूत-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

भविष्यतीत्यत आह–'**नचेति**। '**आगमोदितमि**'ति। कर्तृत्वमिति शेषः। '**मात्रस्ये**'ति। वेदस्यैवेत्यर्थः। अनुमानस्याऽपि ब्रह्मणि प्रमाणत्वादिति भावः। ननु वेदनिरूपितं प्रामाण्यमेव गृह्यत इत्यत आहुः—'**किञ्चे**'ति। '**अयुक्तमि**'ति। सूत्रोक्तं कार्यलक्षणमिति शेषः। कार्यलक्षणेन

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

'**नही**'त्यादि। कपिलादिभिः प्रकृत्यादेः कर्तृत्वेनाऽङ्गीकारात्। नहि सन्दिग्धं साध्यं वा लक्षणं भवितुमर्हति। ननु प्रमाणमूर्धन्येन वेदेन परमात्मा कर्तृत्वेनोक्त इति तदेवाद्रियतामत आहुः—'**नचे**'ति। आगमेन परमात्मा कर्तेत्युक्त इति हेतोः सर्वस्यापि वेदस्य, ब्रह्मण एव कर्तृत्वे प्रमाणकत्वमिति शक्यवचनं नेत्यर्थः। प्रजापतिप्रभृतीनामपि तत्रैव कर्तृत्वोक्तेः। अत्र ब्रह्मप्रमाणत्वं ब्रह्मप्रमाणताकत्वमिति वा ग्रन्थः प्रतिभासते। सर्वस्य जगतः कर्त्ता मत्कृतेश्च तथात्वतः। सर्वात्मन्करुणाशक्त्या ताद्रूप्यात् प्रकटीभव॥ सर्वात्मत्वाच्च भवतात्ताद्रूप्यात्क्रीडसि स्वयमित्यस्योत्तरार्द्धोऽपि(?)। स्वार्थे कप्रत्यय इति वा(?)। कार्यलक्षणवैय्यर्थ्यमाहुः–'**किञ्चे**'ति। '**एवमि**'ति। जगत्कर्तृत्वेन प्रकारेण ब्रह्मणो विचारः। तदुपपादयन्ति–'**लक्षणे**'त्यादिना। असाधारणधर्मवचनं हि लक्षणम्। असाधारण्यं हि तदितराऽवृत्तित्वे सति तन्मात्रवृत्तित्वम्। अनधिगतार्थगन्तृ प्रमाणम्। '**तच्चे**'ति। वस्तुज्ञानम्। '**स्वरूपे**'ति। '**सत्यं ज्ञानमनन्तं ब्रह्मे**त्याकारकेण। अत्रैव(?) कारणश्रुतित्वात्प्रमाणा-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

सम्भूत' इत्यादि। अत्र तु स्वरूपलक्षणमनुक्त्वाऽऽदौ कारणलक्षणमुक्तमिति श्रुतिविरोध इत्यर्थः। **अशक्यत्वात्** लक्ष्यज्ञानं विना लक्षणस्य कर्तुमशक्यत्वादित्यर्थः। **विवादे**त्यादि मायाशबलितेश्वररूपकार्यब्रह्मण एव कारणत्वं निर्गुणस्य वा परब्रह्मण इति जगज्जन्मादिकारणत्वस्य जिज्ञास्ये ब्रह्मणि विवा-

---

१ अयं श्लोकपंक्त्यात्मको ग्रन्थोऽलग्न इव भाति। प्रतिलिपेरभावात्।

उच्यते,

सन्देहवारकं शास्त्रं वेदप्रामाण्यवादिनाम् ।
क्रियाशक्तिज्ञानशक्ती सन्दिह्येते परस्थिते ॥

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

ज्ञानविषयीभूतब्रह्मनिर्धारार्थं लक्षणप्रमाणे वक्तव्ये तत्र स्वरूपलक्षणेनैव तत्सम्भवे किमनेन कार्यलक्षणेन । पूर्वपक्षमुपसंहरति—'**तस्मादि**'ति । कार्यलक्षणकथनं जन्मादिसूत्रेऽयुक्तमुत्पश्याम इति । नन्वत्र सन्देहस्याशक्यवचनत्वे कथं शास्त्रप्रवृत्तिरित्याशङ्क्य तत्प्रवृत्त्यर्थं विषयप्रकारमाह—'**उच्यत**' इति । नहि वयं विषयमात्रमशक्यवचनमिति ब्रूमः, किन्तु त्वदुक्तप्रकारकम् । अन्यथा विषयवारकत्वाऽभावेन तत्प्रवृत्तिरेव न स्यात् । सोऽपि वेदप्रामाण्याऽभ्युपगन्तृणामेव । अन्यथा तदुक्तेऽलौकिकेऽर्थे बाधबुद्धिरेव भवेत्कुतस्तरां सन्देहः । तर्हि कथमत्र सन्देह इत्याकाङ्क्षायां तत्स्वरूपमाहुः—'**क्रिये**'ति । परस्मिन्ब्रह्मणि स्थिते परस्थिते । नन्वस्मदुक्तप्रकारक एव विषयः कस्मान्न भवतीत्या-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

यः संशयो निवर्तते तं संशयं वक्तुं समाधानमाहुः—'**उच्यत**'इति । **सन्देहवारकमि**'ति । न तु वेदव्याख्यानकारकमित्यर्थः । शास्त्रं मीमांसारूपम् । परस्थिते परे ब्रह्मणि स्थितिर्ययोस्ते, परस्थिते । एतादृशे ये क्रियाशक्तिज्ञानशक्ती । उपनिषत्प्रतिपाद्ये ये सर्वज्ञत्वजगत्कर्तृत्वे ते उभे अपि सन्दिह्येते । स्वरूपलक्षणे सन्देहविषयी भवतः । स्वरूपलक्षणस्य निर्विशेषब्रह्मप्रति-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

न्तरस्य कार्यलक्षणस्य च व्युदासः । **अनेन** कार्यलक्षणेन । '**तस्मादि**'ति । अनपेक्षत्वेन वैयर्थ्यात् । कार्यलक्षणमनुपपन्नमित्यर्थः ।

एवं पूर्वपक्षे, समाधातुं तं गृह्णन्ति—'**उच्यत**' इत्यादि । तत्र पूर्वं वैयर्थ्यं परिहरन्ति—'**सन्देहे**'ति । सर्वस्याऽपि वेदस्य ये प्रामाण्यं वदन्ति तेषां जन्माद्यस्येतीत्यादिलक्षणशास्त्रं सन्देहनिवारकमिति नैवं विचारवैयर्थ्यमित्यर्थः । ननु सन्देह एव कथमित्याशङ्कायां सन्देहप्रकारमाहुः—'**क्रियाशक्ती**'ति । विरुद्धत्वदोषं निराकुर्वन्ति—**नही**'ति । तथा सति श्रौतक्रमानुसारेणैव लक्षणं वदेदिति भावः । सन्देहप्रकारं व्यक्तीकुर्वन्ति—'**तत्रे**'त्यादिना '**अकर्त्रि**'त्यन्तेन । अत्र नित्येत्यादि-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

दाध्यासितत्वादित्यर्थः । '**नही**'त्यादि । मायावादिभिः कार्यब्रह्मणः कर्तृत्वाङ्गीकारात्साङ्ख्यैश्च प्रकृतेरेव कारणत्वाङ्गीकारादित्यर्थः । '**नचागम**' इत्यादि । ब्रह्मणि जगत्कारणत्वस्य सकलप्रमाणमूर्धन्यो यो वेदः 'यतो वा इमानि भूतानि' 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यादिरूपस्तेनैव सिद्धत्वान्न विवादाध्यासितत्वमिति । आरोपेणापि कारणत्वस्य श्रुतेर्गतार्थतासम्भवात् । अनुमानेनापि कारणसिद्धेर्न वेदमात्रप्रमाणकत्वं वक्तुं शक्यत इत्यर्थः । **एवं विचारः** पूर्वोक्तरीत्या कारणलक्षणप्रयासः । वैयर्थ्यमेवोपपादयन्ति । शक्यमित्यर्थः । '**लक्षणे**'त्यादिना । **तच्च** ब्रह्मात्मकवस्तुज्ञानं चेत्यर्थः । **स्वरूपलक्षणेन** 'शुद्धबुद्धमुक्तस्वभाव'मित्यादिस्वरूपलक्षणेनेत्यर्थः । **किमनेन** कारणलक्षणेन । किञ्चित्प्रयोजनमित्यर्थः । पूर्वपक्षमुपसंहरन्ति—'**तस्मादि**'त्यादि । **अयुक्तं** जगज्जन्मादिलक्षणकरणमयुक्तमित्यर्थः ।

न हि श्रुतिं व्याख्यातुं प्रवृत्तः सूत्रकारः । किन्तु सन्देहं वारयितुम् । तत्र 'सत्यं ज्ञानमनन्तं' 'नित्यशुद्धमुक्तस्वभाव'मितिश्रुत्या कर्तृत्वादिप्रापञ्चिकधर्मराहित्यं प्रतीयते । 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ती'ति कर्तृत्वञ्च । तत्र सन्देहः—किं ब्रह्म कर्तृ आहोस्विदकर्तृ । किं तावत् प्राप्तम् ? । अकर्तृ । कथम् ?—

'ब्रह्मविदाप्नोति पर'मिति प्रधानवाक्यम् । फलसम्बन्धात् । ऋचापि विवृतम् ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

शङ्कय स्वोक्ते विनिगमकमाहुः—'**न ही**'ति । ब्रह्मपाठके '**ब्रह्मविदाप्नोति पर**'मित्यत्र किं तदित्याकाङ्क्षायां '**सत्यं ज्ञानमनन्तं ब्रह्मे**'ति स्वरूपलक्षणमुक्त्वा '**तस्मादि**'त्यादिना भूतभौतिकसृष्टिनिरूपणमुखेन कार्यलक्षणमुक्तम् । यद्यपि सूत्रकारः श्रुतिं व्याख्यातुमेव प्रवृत्तः स्यात्तदा त्वदुक्तप्रकारकमेव संशयं जन्मादिसूत्रेण निराकुर्यान्न त्वेवम् ।

ननु कथमेवमवगम्यत इति चेत्पूर्वं स्वरूपलक्षणाऽनुक्तेरिति बुद्ध्यस्व । ननु '**यः सर्वज्ञः सर्वशक्ति**'रित्यादिना ज्ञानक्रियाशक्ती निस्सन्दिग्धमेव प्रतिपाद्येत इति कथं तयोः संशय इत्यत आह—'**तत्रे**'त्यादिना । सत्यमिति नित्यत्वं प्रतिपादयति । ज्ञानमिति शुद्धत्वम् । अनन्तमिति मुक्त-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

पादकत्वादिति भाव इति कारिकार्थः । '**सूत्रकार**' इति । सूत्रकारो व्याख्याने प्रवृत्तश्चेत् क्रमेण व्याख्यानं कर्तव्यमिति, पूर्वोक्तं श्रुतिविरुद्धत्वं, लक्षणयोः पूर्वापरकथनरूपं दूषणं च स्यात्तदेव नास्तीति भावः । स्वरूपलक्षणप्रतिपाद्यमाहुः—'**तत्रे**'ति । कार्यलक्षणप्रतिपाद्यमाहुः—'**यतो वे**'ति । एतदधिकरणाङ्गभूतसंशयाकारमाहुः—'**तत्रे**'ति । पूर्वपक्षमाहुः—'**किं तावदि**'ति । कार्यलक्षणं न सम्भवतीति पूर्वपक्ष्याशयं वक्तुं तत्पूर्वपक्षं विवृण्वन्ति—'**ब्रह्मविदे**'ति । यथा **स्वर्गकामो यजेते**ति वाक्यस्य स्वर्गरूपफलसम्बन्धात्प्रधानवाक्यत्वमित्यर्थः ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

पदानि सत्येत्यादिपदानां विवरणं **ज्ञेयम्** । इति शब्दो हेत्वर्थकः । तथा चैतादृशं ब्रह्मेति । श्रुत्या **सत्यं ज्ञानमि**तिश्रुत्या, तथा प्रतीयत इत्यन्वयः । '**तत्रे**'ति । श्रुतिसिद्धत्वान्निःसन्दिग्धयोरपि क्रि-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

दिकारणत्वयोः सन्देह इत्यर्थः । तदेव संशयस्वरूपमाहुः—'**किं ब्रह्म कर्तृ आहोस्विदकर्त्रि**'ति । उभयोरपि श्रौतत्वेनाऽन्यतरबाधस्याऽशक्यत्वात्संशय इत्यर्थः । '**फलार्थं चे**'ति । **ब्रह्मविदाप्नोति परमिति**श्रुतौ ब्रह्मविदः परप्राप्त्युक्तेर्ब्रह्मज्ञानं फलार्थमित्यर्थः । '**फलवाक्योक्तब्रह्मज्ञानादेवे**'-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

ननु निरूप्ये ब्रह्मणि सन्देहाभावात्कथं व्यासशास्त्रप्रवृत्तिरिति शास्त्रप्रवृत्तिमुपपादयितुमाहुः—'**उच्यते**' इत्यादि । नहि ब्रह्मस्वरूपनिर्णयार्थं शास्त्रं प्रवृत्तं स्वरूपस्य सर्वशास्त्रनिर्णीतत्वात्, किन्तु ब्रह्मणि वेदविरुद्धवाद्यभ्युपगतप्रकारनिराकरणेन वेदसिद्धप्रकारस्थापनार्थमित्याहुः—'**सन्देहे**'त्यादि । ननु कथं ब्रह्मणि सन्देहो येन शास्त्रप्रवृत्तिः स्यादित्याकाङ्क्षायां सन्देहप्रकारमाहुः—'**क्रियाशक्ती**'त्यादि । सन्देहबीजमाहुः—'**तत्रे**'त्यादि ।

'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति । फलार्थं[1] च ब्रह्मज्ञानम् । फलञ्च फलवाक्योक्तधर्मज्ञानादेव ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

स्वभावत्वम् । न ह्यपरिच्छिन्नं केनचित्संसृष्टम् । नहि नित्यशुद्धमुक्तस्वभावे ब्रह्मणि प्रापञ्चिका धर्माः सम्भवन्ति । तस्मादकर्तृ । **'यतो वे'**त्यादिना तूत्पत्त्यादिकर्तृत्वं च प्रतीयते । नह्येकस्य बाधः कर्तुं शक्यः । उभयोरपि श्रौतत्वात् । तथा चैकतरनिश्चयाऽसम्भवाद्भवति संशयः कर्त्रकर्तृ वेति । तत्रादौ पूर्वपक्षमाहुः—**'अकर्त्रि'**ति । चोदयति—**'कथ'**मिति । तदेवोपपादयन्ति—**'ब्रह्मे'**त्यारभ्य **'पूर्वः पक्ष'** इत्यन्तेन । अत्र ब्रह्मविदाप्नोतीत्यनेन ब्रह्मप्राप्तिलक्षणस्य फलस्योक्तत्वात्तत्प्रतिपादकत्वादिदं वाक्यं प्रधानं स्वप्रकरणस्थवाक्यान्तरापेक्षया । तथा च प्रधानाऽनुरोधेनैवाप्रधानानि नेतुं योग्यानीति सिद्धम् । ततस्तत्साधनापेक्षायां ब्रह्मविदित्यनेन ब्रह्मज्ञानमेव तत्साधनत्वेनोक्तम् । किमा-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ननु पूर्वकाण्डेऽयं नियमोऽस्तु न तूत्तरकाण्ड इति नाऽस्य प्रधानत्वमित्यत आहुः—**'ऋचापी'**ति । यद्यस्य प्रधानवाक्यत्वं न स्यात्तर्हि ऋचा विवरणं न स्यादित्यपिनाऽयमर्थो ध्वन्यते । विवरणमाहुः—

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

याज्ञानशक्त्योः स्वरूपलक्षणविरुद्धत्वात्सन्देह इति भावः । एतदधिकरणघटकाङ्गमप्ययमेव संशयो ज्ञेयः । पूर्वपक्षमाहुः—**'अकर्त्रि'**ति । **'कथमि'**ति । प्रकारजिज्ञासायां तं प्रकारमाहुः—**'ब्रह्मविदि'**त्यारभ्य फलाऽश्रवणादित्यन्तम् । **'फलसम्बन्धादि'**ति । यत्र हि प्रधानीभूतेन फलेन सह साधनस्य सम्बन्धो विधीयते, भवति तत्प्रधानवाक्यम् । यथाऽ**ग्निहोत्रं जुहुयात्स्वर्गकाम** इति । तथाऽत्रापि साधनस्य ब्रह्मवेदनस्य परप्राप्तिलक्षणेन फलेन सम्बन्धबोधनात्स्वप्रकरणस्थवाक्यान्तरापेक्षया भवतीदं प्रधानवाक्यम् । फलस्य च प्राधान्यं पूर्वतन्त्रे शेषलक्षणे, **कर्मफलार्थत्वादि**त्य-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

त्यादि । **सत्यं ज्ञानमनन्तं ब्रह्मे**तिश्रुत्या सत्यपदेन नित्यत्वं ज्ञानपदेन शुद्धत्वमनन्तपदेन मुक्तत्वमुक्तमिति फलवाक्योक्तनित्यशुद्धमुक्तस्वरूपब्रह्मज्ञानादेव फलमित्यर्थः । **'नान्यथे'**ति । अन्यथा कर्तृत्वादिविशिष्टज्ञानान्मुख्यं फलं न भवतीति पूर्वपक्षिण आशयः ।

ननु **तस्माद्वा एतस्मादात्मन** इत्यत्र तच्छब्देन प्रकृतस्य ब्रह्मण एव परामर्शात्तस्यैव कर्तृत्वादिकमुक्तमिति कर्तृत्वादिविशिष्टज्ञानान्मुख्यं फलं कुतो न भवतीत्याशङ्क्य समाधत्ते—**'कर्तृत्वं च परविवरणतयोक्तमि'**ति । फलवाक्ये ज्ञेयं परं चेति द्वयमुक्तम् । तथा चोभयोरपि प्रकृतत्वम् । तत्र ज्ञेये शुद्धे ब्रह्मणि कर्तृत्वस्य बाधितत्वात्परमेव **तस्माद्वा एतस्मादात्मन आकाशः संभूत** इत्यत्र तच्छब्देन परामृश्य परस्यैव कर्तृत्वमुक्तमिति, कर्तृत्वविशिष्टज्ञानं न तु मुख्यब्रह्मज्ञानमतो न

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

फलसम्बन्धात् फलसम्बन्धबोधकवाक्यस्य पूर्वतन्त्रे प्राधान्याङ्गीकारादित्यर्थः । **ऋचा** वक्ष्यमाणविवरणर्चा । **फलं** साक्षात्कृतब्रह्मात्मकं फलम् । **'वाक्यो'**क्तेत्यादि । सत्यत्वज्ञानत्वानन्तत्व-

१ फलार्थे चेत्यपि पाठः ।

नान्यथा । **कर्तृत्वञ्च परविवरणतयोक्तम् । परं किमित्युक्ते 'यः सर्वान्तर आनन्द' इति । कथं**

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

कारकं तदित्याकाङ्क्षायां तदाकारस्य विषयस्य च प्रमाणान्तरावेद्यत्वस्य विदितपरब्रह्मकैरेव ज्ञातत्वात्तज्ज्ञापनार्थं तैः श्रुतिरेवोक्ता **'सत्यं ज्ञानमि'**ति । तया च नित्यशुद्धमुक्तस्वभावत्वज्ञापनात् । तदाप्तिरूपं यत्फलं, तत्फलवाक्योक्तं यद्ब्रह्म, तस्य ये धर्मा नित्यत्वादयस्तेषां ज्ञानादेव नान्यथा । अन्यथाज्ञानस्य तु **'योऽन्यथा सन्तमि'**त्यादिना फलविरोधित्वात् ।

नन्वेवं सति तत्प्रकरणे भूतभौतिकादिकर्तृत्वं तस्यैव कथमुक्तम् । तद्वैशिष्ट्यज्ञानस्य फलविरोधित्वात् । नित्यशुद्धत्वादिविशिष्टे तस्मिंस्तदसम्भवात् । तच्छब्देन हि पूर्वप्रकृतस्य तस्यैव परामर्शी-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

'सत्यमि'ति । **'विपश्चिते'**त्यन्तम् । **'धर्मज्ञानादि'**ति । परत्वज्ञानादित्यर्थः । परत्वज्ञानं च जगज्जन्मादिकर्तृत्वेनेति बोधयितुमाह—**'कर्तृत्वमि'**ति । 'तस्माद्वा एतस्मादि'त्यादिवाक्येनोक्तमित्यर्थः । **'आनन्द इती'**ति । **अन्योन्तर आत्मानन्दमयः, तेनैष पूर्ण** इत्यादिवाक्येन बोधित इत्यर्थः । अनेन परस्वरूपमुक्तमिति भावः । ननु **ब्रह्मविदाप्नोती**त्यस्मिन्प्रपाठकेऽयं क्रमः उक्तः । परन्तु

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

नेन सूत्रेण प्रतिपादितमेव । तथा च प्रधानवाक्याऽनुरोधेनैवाऽन्यानि प्राकरणकानि गुणभूतानि वाक्यानि नेतुं योग्यानीति नाऽप्रधानवाक्योक्तं कर्तृत्वं ब्रह्मणि शक्यनिरूपणमिति भावः । तत्र ब्रह्म तज्ज्ञानतत्फलानां स्वरूपं श्रुत्येकसमधिगम्यमित्येतेन सत्यं ज्ञानमित्याद्युङ्क्तिरूपितस्वरूपादतिरिक्तस्वरूपं ब्रह्मेति, फलप्रेप्सुभिरन्यथाज्ञाने च फलाऽभावं पश्यद्भिर्नाङ्गीकर्तुं शक्यमित्युक्तं भवति । जानन्त्या फलाय जिज्ञासुभ्यस्तत्स्वरूपज्ञानाय विदिततत्स्वरूपयैव श्रुत्या तत्स्वरूपं निर्णीतमपीत्याहुः—**'ऋचापी'**ति । अत्र विवृतपदमपि नाऽन्वेति(?) । विवरणमेवाहुः—**'सत्यमि'**त्यादि । विवरणसिद्धमर्थमाहुः—**'फलार्थे'**मित्यादि **'नान्यथे'**त्यन्तम् । फलवाक्योक्ता धर्माः सत्यत्वादयः । एतेन 'सत्यं ज्ञानमि'त्याद्युङ्क्तिरूपितस्वरूपादतिरिक्तस्वरूपं ब्रह्मेति जानन्त्या नाऽङ्गीकर्तुं शक्यमित्युक्तं भवति । तथा सति विवरणवैयर्थ्यापत्तेः । ननु किमर्थं तद्ग्रेतना तस्माद्वा एतस्मादित्यादिप्रस्तावना । कर्तृत्वादिधर्मवैशिष्ट्यज्ञानं

श्रीलालूभट्टकृता गूढार्थदीपिका ।

मुख्यं फलमित्याशयः । **'परं किमित्युक्ते यः सर्वान्तर आनन्द इती'**ति । सर्वान्तर इत्यत्र

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

नित्यत्वशुद्धत्वादिवाक्योक्तधर्मज्ञानात् । **नान्यथा,** न कार्यब्रह्मगतकर्तृत्वादिधर्मज्ञानादित्यर्थः । **परविवरणतया** उपलक्षणतया परब्रह्मपरिचायनार्थमित्यर्थः । परविवरणमेवोपपादयन्ति—**'परं कि'**मित्यादिना । तथा च 'ब्रह्मविदाप्नोति पर'मित्यत्र ज्ञेयं परं च परिचायकधर्मविशिष्टं सोपाधिकं निरूपितं शुद्धबुद्धत्वादिधर्मशून्यं तत्र किमपेक्षया परत्वमित्युक्त इत्यर्थः । तत्र परत्वमुपपादयति—**'यः सर्वान्तर'** इति । तथा चान्नमयादिचतुष्टयापेक्षयान्तरत्वात्तेभ्य एव पर इति ज्ञेयापेक्षयाऽपर इति च सिद्धमिति । ननु ज्ञेयब्रह्मापेक्षया कर्तृब्रह्मणि अवरत्वसाधकं सर्वान्तरत्वं गौणेतरापेक्षयाऽवरत्वसाधकं

१ अयमधिकः पाठोऽत्र पतित इति भाति ।

सर्वान्तरमित्याकाङ्क्षायां परिचयार्थं भूतभौतिकसृष्टिमुक्त्वा गौणानन्तर्यं परिहृतम् । गौणो-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

दित्याशङ्कायामाहुः—'**कर्तृत्वं चे**'ति। प्रधानवाक्ये हि ज्ञेयं परं चेति द्वयमुक्तम् । तथा चोभयोरपि प्रकृतत्वात्पूर्वस्मिंस्तस्य बाधितत्वात्परमेव तच्छब्देनाऽपकृष्य तस्यैव कर्तृत्वमुक्तम् । तत्किं ज्ञेया-ऽपेक्षया परमन्याऽपेक्षया वेति सन्देहो माभूदित्याशयेन सर्वान्तरमानन्दं निरूपयन्त्यन्नमयाद्यपेक्षयैव परत्वमाह । ननु सर्वान्तरत्वेऽपि कथं तत्परत्वं तस्य तदसाधकत्वादित्याशङ्क्य स्वयमेव भूतभौतिकादि-कर्तृत्वेन तदपेक्षयोत्कृष्टत्वमेवोक्तम् । न तु सर्वान्तरत्वेन तत्सम्बन्धकृतं गौणत्वम् । ज्ञेयापेक्षया

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

अन्योन्तर आत्मेति वाक्यं पश्चादुक्तमिति परस्य गौणत्वं स्यादित्यत आह—'**कथमि**'त्यादिना । '**परिचयार्थ**'मिति । उपलक्षणविधया ज्ञानार्थमित्यर्थः । '**भूतभौतिके**'ति । आकाशाद्यन्नादि-सृष्टिम् । '**परिहृतमि**'ति । यथाऽन्नाऽनन्तरं प्राणस्य गौणत्वं, पर्यवसानाऽभावात् । यथा आनन्दस्य

केश्चिद्विरचिता वेदान्तचन्द्रिका ।

च फलविरोधीत्यत आहुः—'**कर्तृत्वंचे**'ति । पूर्ववाक्ये ज्ञेयं परञ्चेतिद्वयं प्रकृतम् । तत्र सत्यं ज्ञान-मितिज्ञेयस्वरूपलक्षणविरोधेन पूर्वस्य बाधाद्द्वितीयमेव तच्छब्देन परामृष्यत इति । तथाच जगदुत्प-त्तिस्थितिभङ्गकर्तृत्वमेव परत्वमिति पर्यवसितमित्यर्थः । ततः परस्य स्वरूपजिज्ञासायां सर्वाऽऽन्तरानन्द इति परस्वरूपमुक्तमित्याहुः—'**परंकि**'मित्युक्त इत्यादि । योऽन्नमयादिसर्वेभ्यश्चतुर्भ्य आन्तरोऽन्तवर्त्या-नन्दः स एव परः फलरूप इत्यर्थः । अत्रोक्तमित्यनुषङ्गः । ननु केन प्रकारेण सर्वान्तरत्वमित्याका-ङ्क्षायामाहुः—'**कथ**'**मिति** । अथवोक्तमेव विवरणं विशदयन्ति—'**परमि**'त्यारभ्य '**परहृत**'मित्य-न्तेन । '**पर**'**मिति** । परस्वरूपजिज्ञासायां सर्वान्तर आनन्द इति तत्स्वरूपम् । तन्निरूपयिष्यमाणया श्रुत्या सर्वान्तरत्वज्ञानमेव कथं भविष्यतीत्याकाङ्क्षायां पूर्वमेव तज्ज्ञानार्थं तत एवाऽऽकाशादिपञ्च-भूतानामोषध्यादित्रयभौतिकानांच सृष्टिमुक्त्वा, अन्नमयादिचतुर्णां गौणमन्यतोऽन्यत आनन्तर्यं निरूप्यते । सर्वान्तरत्वेनाऽऽनन्दनिरूपणेन प्राणादीनामिव गौणमानन्तर्यं निराकृतम् । मुख्यमेवाऽऽनन्तर्यं निरूपितमित्यर्थः । तथाच भूतभौतिकस्रष्टृत्वेन सर्वकारणरूपोऽऽन्नमयादिसर्वेषां पुरुषत्वविधायकस्तत्सर्वान्तर आनन्दः परपदार्थ इति सिद्धम् । एवं हि **तस्माद्वा एतस्मादित्या-**

श्रीलालूभट्टकृता गूढार्थदीपिका ।

सर्वस्मादन्नमयादेरन्तर इत्यर्थो, न तु ज्ञेयाऽपेक्षयेति पूर्वपक्षिण आशयः। '**कथं सर्वान्तर**' इत्यादि। **तस्माद्वा** इत्यादिना भूतभौतिकसृष्टिमुक्त्वा परस्य **गौणं** गुणसम्बन्धकृतं यदानन्तर्यमन्तरत्वभाव रूपं तत्परिहृतम् । गुणसम्बन्धेन परस्मिन्नान्तर्यभावो नास्ति, किन्तु सर्वान्तरमस्त्येवेति भावः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

कुतो नेत्यपेक्षायामाह—'**कथं सर्वे**'त्यादि । **परिचयार्थं** परब्रह्मापेक्षया तस्यावरत्वपरिचयार्थं विशे-ष्यमादाय शुद्धज्ञेयब्रह्मज्ञापनार्थं चेत्यर्थः। **गौणानन्तर्यं** गौणाकाशाद्यपेक्षया न्यूनत्वम् । **परिहृतं** गौणाकाशादिसर्वकर्तृत्वोक्त्या तत्सर्वादित्वस्य सिद्ध्या 'स्वतन्त्रः कर्ता' इत्यनेन स्वातन्त्र्यस्य च सिद्ध्या

१ अत्र टीकादिषु भाष्यप्रकाशयोश्च 'आनन्तर्य'मिति दृश्यते । सरलस्तु 'आन्तर्य'मिति तथापि सर्वं प्रतिलिपि-प्रामाण्याच्च तथैव रक्षितः । संभवेद्वा व्याकरणस्य सर्वतोमुखवृत्तित्वात् ।

पासनाफलञ्च प्रधानशेषतयोक्तम् । तत्राऽन्यगतकर्तृत्वाऽऽरोपानुवादोऽपि सम्भवति ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

गौणत्वे विनिगमनान्तरमाह—'**गौणोपासने**'ति । ज्ञेयापेक्षया गौणस्य परस्य योपासना तस्याः फलं प्रधानस्य ज्ञेयफलस्य शेषतयोक्तम् । गौणोपासनाफलस्य कामभोगरूपत्वेनाऽनित्यत्वात्तत्प्रदर्शनेन तत्र वैराग्योत्पादनद्वारा तच्छेषत्वम् । नन्वन्यत्र '**यतो वे**'त्यादौ ज्ञेयस्यैव कर्तृत्वाद्युक्तेः । कथं परस्यैव कर्तृत्वमित्यत आह—'**तत्रे**'ति । **तत्र** कर्तृत्वप्रतिपादके वाक्येऽन्यस्मिन्परस्मिन्गतं यत्कर्तृत्वं तस्य य आरोपश्चिद्रूपत्वात्सजातीयत्वेन ब्रह्मणि, तस्याऽनुवादो यतो वेत्यादौ सम्भवति । अत एवैकत्र निर्णीतः

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

तु वक्तुं न शक्यते । अन्ते पर्यवसानात् । सृष्ट्यादिकर्तृत्वाच्चेति भावः । '**गौणोपासने**'ति । **येऽन्नं ब्रह्मोपासत** इत्यादिवाक्येनोक्ता गौणा या अन्नब्रह्मोपासना, तस्या यत्फलमित्यर्थः । '**प्रधानशेषतये**'ति । प्रधानस्य यत्फलं ब्रह्मानन्दावाप्तिरूपं, तच्छेषतया तदङ्गत्वेनेत्यर्थः । एतेन परस्य सर्वोत्कृष्टत्वं ध्वनितम् । एतावता प्रबन्धेन परे ब्रह्मणि कर्तृत्वं प्रतीयते, स्वरूपलक्षणे तु प्रापञ्चिकधर्मराहित्यं ब्रह्मणि प्रतिपाद्यत, इति कृत्वा ब्रह्मविदाप्नोति परमिति वाक्यप्रतिपाद्यं परप्राप्तिसाधनीभूतं यत् ब्रह्मज्ञानं तद्विषयीभूते ब्रह्मणि कर्तृत्वं न प्रतीयत इति विरोधः । एतादृशविरोधपरिहारार्थं, **प्रजापति-**

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

रभ्य **ब्रह्मपुच्छं प्रतिष्ठे**त्येतावद्भागस्य परविवरणरूपं प्रयोजनमुक्त्वा, मध्ये गौणानामन्नमयादीनां चतुर्णामुपासनातत्फलनिरूपणस्य प्रयोजनमाहुः—**गौणोपासने**ति । '**सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासत**' इत्यादिना गौणान्नब्रह्माद्युपासनाफलं प्रधानशेषतया, प्रधानस्य फलस्या'**ऽस्ति ब्रह्मेति चेद्वेदे**'त्याद्यनुवाकचतुष्टयेन निरूपितस्य सत्वब्रह्मानन्दावाप्तिसर्वभयाभावरूपस्य शेषतया सर्वोत्कृष्टत्वज्ञापकतया निरूपितम् । नन्वेवं सति कर्तृत्वमेव सिद्धं ब्रह्मण इत्यत आहुः—'**तत्रे**'ति । सर्वान्तरत्वपरिचयार्थं कर्तृत्वे परस्मिन्निरूपणीये पूर्वकाण्डोक्तप्रजापतिगतस्य, सांख्योक्तप्रकृतिगतस्य वा

श्रीलालूभट्टकृता गूढार्थदीपिका ।

परस्य सर्वाऽऽन्तरत्वमन्नमयाद्यपेक्षया, न तु ज्ञेयापेक्षयेत्यत्रोपपत्तिमाह—'**गौणोपासनाफलं चे**'त्यादि । ज्ञेयापेक्षया गौणस्य परस्य या उपासना, तस्याः फलं कामाशनरूपम् । प्रधानस्य ज्ञेयज्ञानफलस्य शेषतयोक्तम् । अतो ज्ञेयापेक्षयाऽऽन्तरत्वं परस्येत्यर्थः । '**तत्रान्यगतकर्तृत्वाऽऽरोपानुवादोऽपी**'ति । **तत्र** ज्ञेये ब्रह्मणि । स्वरूपलक्षणविरोधेन कर्तृत्वस्याऽसम्भवात् । अन्यगतं प्रकृतिगतं यत्कर्तृत्वम् । तस्य कर्तृत्वस्याऽऽरोपेणाऽनुवादः सम्भवति । न तु तत्र कर्तृत्वमित्यर्थः । **एकत्र निर्णीतः शा-**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

परिहृतमित्यर्थः । नन्वानन्दमयस्यावरब्रह्मत्वे तस्योपासनं फलं च वेदो न ब्रूयादित्यत आह—'**गौणे**'त्यादि । **गौणोपासनाफलं** गौणस्यानन्दमयस्य **उपासना** सर्वकर्तृत्वादिनोपासना तस्याः फलं 'सोऽश्नुते' इत्यादिना कामभोगादिरूपं क्षयिष्णु फलम् । **प्रधानशेषतया** नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मण उपासनाया यन्मोक्षरूपं फलं तच्छेषतया तस्य तस्य क्षयिष्णुत्वदर्शनेन वैराग्योत्पादन-

---

१ चरमत्वमिति तेनाऽऽनन्तर्यमित्यपि पाठः साधुः ।

ततश्च 'भृगुर्वै वारुणिरि'त्युपाख्यानेऽपि परिचायकत्वाद्गौणकर्तृत्वमेवानूद्यते । फलाश्रवणादिति, पूर्वः पक्षः ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

शास्त्रार्थोऽपरत्राप्यन्वेतीतिन्यायाद्भृगुप्रपाठकेऽपि ब्रह्मपरिचायकत्वेन प्रपाठकान्तरोक्तं परनिष्ठमेव कर्तृत्वं तत्राऽनूद्यते । तत्र विनिगमकमाह—'**फलाऽश्रवणादि**'ति । यदि परस्मिन्निव तस्मिन्नपि मुख्यमेव कर्तृत्वं स्यात्तदा तज्ज्ञानस्याऽपि कामभोगादिकमनित्यमेव फलत्वेनोक्तं स्यात् । न त्वेवम् । तदाप्तिरूपस्याऽमृतत्वस्यैव तत्र तत्फलत्वेनोक्तेः ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

रकामयत प्रजाः सृजेयेति पूर्वकाण्डोक्तप्रजापतिगतस्य साङ्ख्योक्तप्रकृतिगतस्य वा कर्तृत्वस्य परे ब्रह्मण्यारोपं कृत्वाऽनुवादस्यापि सम्भव इत्याशयेनाऽऽह—**तत्राऽन्यगते**ति । ननु भृगुप्रपाठके 'यतो वा इमानी'त्यादिना यत्कर्तृत्वमुक्तं तस्य का वा गतिरित्यत आह—'**ततश्चे**'ति । गौणकर्तृत्वमेव आरोपितकर्तृत्वमेव । ननु तत्र कथमेवं ज्ञायत इत्यत आह—'**फले**'ति । तथा च कार्यलक्षणं न सम्भवतीति पूर्वपक्ष्याशयः ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

कर्तृत्वस्याऽऽरोपेणाऽनुवादः सम्भवतीति न वास्तवकर्तृत्वसिद्धिरिति भावः । अपिशब्दो वास्तवसमुच्चायक, एवकारार्थो, वा वाक्यालङ्कारे । 'एकत्र सिद्धः शास्त्रार्थः' इति न्यायादुत्तरप्रपाठकेऽपि कर्तृत्वाऽऽरोपानुवाद एवेत्याहुः—'**ततश्चे**'ति । स्वरूपलक्षणाविरोधादेव । '**परिचायकत्वादि**'ति । कर्तृत्वनिरूपणस्य परिचयार्थत्वात् । गौणकर्तृत्वमारोपितकर्तृत्वम् । '**फलाश्रवणादि**'ति । अयं भावः ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

स्त्रार्थोऽपरत्रापि नेय इति न्यायेनाऽन्यत्राऽपि यदुक्तं कर्तृत्वं तस्य व्यवस्थामाहुः—'**ततश्च भृगुर्वै वारुणिरित्युपाख्यानेऽपी**'त्यादिना । नन्वेतदनुरोधेन तत्र व्यवस्थाप्यते, तर्हि तदनुरोधेनैतदेव कुतो न व्यवस्थाप्यते, तथा सति '**भृगुर्वै**' इत्युपाख्याने, **आनन्दाद्ध्ये**वेत्यादिना ब्रह्मणि कर्तृत्वस्योक्तत्वादत्रापि ज्ञेये कर्तृत्वं स्यादित्याशङ्क्य 'भृगुर्वै' इत्युपाख्यानस्याऽमुख्यत्वमाहुः—'**फलाश्रवणादि**'ति । तथा च तस्याऽमुख्यत्वादेतदनुरोधेन तदेव व्यवस्थाप्यमित्यर्थः । एवं शुद्धे ब्रह्मणि कर्तृत्वं वस्तुतो नास्तीति पूर्वपक्षिण आशयः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

द्वारा मोक्षाङ्गतयोक्तमित्यर्थः । नन्ववरब्रह्मत्वेनोपहितचैतन्यस्याप्युपाधिनिरासेन विशेष्यमात्रविचारे ज्ञेयब्रह्मत्वात् । 'तस्माद्वा' इत्यादिवाक्ये उक्तं कर्तृत्वमसम्भाव्येवेत्यत आह—'**तत्रे**'त्यादि । **तत्र** 'तस्माद्वे'त्यादिवाक्ये । अन्यासंश्लिष्टा प्रकृतिस्तद्गतं यत्कर्तृत्वं तस्य यो विशेष्ये आरोपस्तेन यः श्रुतिरूपोनुवाद इत्यर्थः । पूर्वानुवाकोक्तप्रकारमनुवाकान्तरोक्तोपासनास्थलेऽपि अतिदिशति—'**ततश्चे**'त्यादिना । **ततः** एकत्र शास्त्रार्थस्य सिद्धत्वतः । **परिचायकत्वात्** 'काकवन्तो देवदत्तगृहा' इत्यत्रेवाविद्यमानमेव कर्तृत्वं देवदत्तगृहाणां काका इव शुद्धज्ञेयब्रह्मस्वरूपबोधकं भवति । **अनूद्यते** ब्रह्मपरिचायनार्थं प्रकृत्यादिगतं कर्तृत्वं श्रुत्याऽनुवादरूपेणोच्यते । **फलाश्रवणात्** कार्यब्रह्मोपास-

सिद्धान्तस्तु—

उत्पत्तिस्थितिनाशानां जगतः कर्तृ वै बृहत्।
वेदेन बोधितं तद्धि नान्यथा भवितुं क्षमम्॥
नहि श्रुतिविरोधोऽस्ति कल्पोऽपि न विरुध्यते।
सर्वभावसमर्थत्वादचिन्त्यैश्वर्यवद्बृहत्॥

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

तस्मात्तन्न कर्तृ इतिस्थिते पूर्वपक्षेऽत्र सिद्धान्तमाहुः—'**सिद्धान्तस्त्वि**'ति। '**उत्पत्तिरि**'ति। यदुक्तं ज्ञेयमकर्तृ तन्नोपपद्यते। तस्याऽऽम्नाये सर्वत्रैव निरूप्यमाणत्वात्। ननूक्तमनागतमेव तदारोपन्यायेन तत्राऽनूद्यत इत्याशंकायामाह—'**नान्यथे**'ति। नहि परमाप्तो वेदोऽक्षरमात्रमप्यन्यथा वदति। तथा सत्यन्यत्राऽपि तथात्वं व्याहन्येत। '**उत्पत्ती**'त्यारभ्य '**क्षममि**'त्यन्तो ग्रंथो '**वेदेने**'त्यारभ्य '**प्रसङ्गादि**'त्यन्तेन व्याख्यातः(?)। नन्वेवं नित्यत्वादिप्रतिपादिकानां कर्तृत्वादिप्रतिपादिकानां च विरोधः कस्मान्न भवतीत्यत आहुः—'**न ही**'ति। विरोधो हि सहाऽनवस्थानलक्षणः, नहि सत्यत्वकर्तृत्वादीनां प्रमाणान्तरेण सिद्धः। '**तं त्वौपनिषदं पुरुषं पृच्छामी**'ति श्रुतेर्ब्रह्मणः श्रुत्येकस-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

सिद्धान्तं विवृण्वन्ति—'**सिद्धान्तस्त्वि**'ति। बृहत् ब्रह्मेत्यर्थः। '**तद्धी**'ति। कर्तृत्वं हीत्यर्थः। **अन्यथा** आरोपितं गौणमिति यावत्। '**कल्पोऽपी**'ति। सूत्रमपीत्यर्थः। क्वचित्कल्प्य इत्यपि पाठः।

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

फलसम्बन्धिवाक्यमेव प्रधानवाक्यम्। तद्रहितं तु गौणम्। फलं च फलार्थाभिहितप्रधानवाक्योक्तधर्मज्ञानादेव। नान्यथा। यज्ज्ञानाच्च फलोक्तिस्त एव धर्मा वास्तवाः। कर्तृत्ववाक्ये च फलाऽनभिधानात्कर्तृत्वादिधर्मज्ञानस्य फलार्थत्वाऽभावेन परिचयमात्रार्थत्वादारोपानुवाद एव कर्तृत्वादिधर्माणामिति। एवंस्थिते पूर्वपक्षे सिद्धान्तमाहुः—'**उत्पत्ती**'त्यादि। **बृहज्ज्ञेयं** ब्रह्म। **तत्** कर्तृत्वम्। '**अन्यथे**'ति गौणम्। नन्वेवं स्वरूपलक्षणविरोध इति चेन्नेत्याहुः—'**न ही**'ति। निरपेक्षो रवः श्रुतिः।

श्रीलालूभट्टकृता गूढार्थदीपिका।

इत्थं पूर्वपक्ष उपस्थिते, सिद्धान्ते शुद्धे ब्रह्मणि कर्तृत्वं साधयन्ति—'**उत्पत्तिस्थितिनाशानामि**'त्यादिना। अर्थस्तु—जगतः उत्पत्तिस्थितिनाशानां कर्तृ वै निश्चयेन बृहत् शुद्धं ब्रह्मैवेत्यर्थः। इह प्राचां पुस्तके उत्पन्नस्थितिनाशानामिति पाठो दृश्यते तत्र उत्पन्नेति भावे क्तः। तथा सत्यर्थस्तुल्यः। नन्वेवं शुद्धे ब्रह्मणि कर्तृत्वाद्यङ्गीकारे **निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमि**त्यादिश्रुतिविरोध इत्याशङ्क्य समादधते।—'**न हि श्रुतिविरोधोऽस्ती**'ति। सत्यकर्तृत्व-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

नाया यत्फलं सर्वकामफलभोगाशनरूपं तस्यैतत्प्रपाठकेऽश्रवणादित्यर्थः। इति **पूर्वपक्षः** जगज्जन्मादिकर्तृत्वलक्षणस्य शुद्धे ब्रह्मण्यसम्भवरूपः पूर्वः पक्ष इत्यर्थः।

सिद्धान्तमाहुः—'**उत्पत्ती'त्यादि**। **बृहत्** वेदान्तवेद्यं ब्रह्म। **तत्** ब्रह्मणो जन्मादिकर्तृत्वम्। **अन्यथा** श्रुत्याऽरोप्यानूद्यते इत्येवंरूपम्। **श्रुतिविरोधः** सत्यज्ञानाऽनन्तत्वकर्तृत्वादीनां गोत्वाश्वत्वादीनामिव सहानवस्थानरूपो विरोधो न क्वापि सिद्धोऽस्तीति भावः। **कल्पोपि** 'सर्वभावः

वेदेनैव तावत् कर्तृत्वं बोध्यते। वेदश्च परमाप्तोऽक्षरमात्रमप्यन्यथा न वदति।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

मधिगम्यत्वेनोभयवैशिष्ट्यस्याऽविरुद्धत्वात् । '**नहि श्रुतिविरोधोऽस्ति कल्पोऽपि न विरुध्यत**' इति । अथाऽभ्युपेत्यापि विरोधसमाधानमाहुः—'**कल्पोऽपी**'ति । कल्पः पक्षः । विरोधोऽस्तीति शेषः । सोऽपि ब्रह्मणि न विरुध्यते । नच कर्तृत्व इत्यारभ्योपपत्तेरित्यन्तेन व्याख्यातः ।

ननु तेषां विरोधे कथं सामानाधिकरण्यमित्यत आहुः—'**सर्वभावसमर्थत्वादचिन्त्यैश्वर्यवदि**'ति । ब्रह्मादीनामप्यचिन्त्यैश्वर्यवत्त्वेन ब्रह्मणि सर्वोपपत्तेः । अत एव '**नैषा तर्केण मतिरापनेये**'त्यादिश्रुतिरपीममेवार्थमाह । तत्र विनिगमकमाहुः—'**सर्वभावसमर्थत्वादि**'ति । सर्वरूपेण

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

'**सर्वभावे**'ति । सर्वभवने समर्थत्वाद्बृहदकर्तृ कर्तृ भवतीत्यर्थः । ननु कथं श्रुतिविरोधो नास्तीत्यत आह—'**वेदेने**'ति । **ब्रह्मविदाप्नोति परमि**त्यनेन साधनं फलं चोक्तम् । तत्र साधनविषयीभूते ब्रह्मणि सत्यं ज्ञानमित्यादिना स्वरूपलक्षणमुक्त्वाऽकर्तृत्वं प्रतिपादितम् । फलकर्मीभूते परे ब्रह्मणि 'तस्माद्वा एतस्मादि'त्यादिवाक्येन कार्यलक्षणमुक्त्वा कर्तृत्वं प्रतिपादितम्। अथ च ब्रह्मणा विपश्चितेत्येतद्वाक्यगततृतीयान्तेन ब्रह्मपदेन परस्यैव विवरणं क्रियते । तेन च कृत्वा किं ज्ञायते लक्षणद्वयस्यैकं ब्रह्मैव लक्ष्यमिति लक्षणयोर्विरोधाभावः। तथा चाचिन्त्यैश्वर्यवत्त्वात् वेदेनैव कर्तृत्वमकर्तृत्वं च बोध्यत

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

तादृशो वेदशब्द एव । वेदवाक्यमिति यावत् । ब्रह्मणः कर्तृत्वं नास्तीत्याकारकवेदवाक्याऽभावादिति भावः । ननु यथा—'**बर्हिर्देवसदनं दामी**'ति मन्त्रे लवनालिङ्गादनेन मन्त्रेण बर्हींषि लुनीयादिति श्रुतिः कल्प्यते । तथाऽत्रापि प्रत्यक्षश्रुतिविरोधाभावेऽपि स्वरूपलक्षणविरोधभावालिङ्गात्कल्पितताहशश्रुतिविरोधो भविष्यतीत्यत आहुः—'**कल्पोऽपी**'ति। अत्र **अकर्तरि च कारके संज्ञायामि**ति कर्मणि घञ् । कल्पोऽपि वेदभाग इत्यर्थः । प्रत्यक्षायाः कर्तृश्रुतेः प्राबल्यादिति भावः । अन्यथैन्द्रया ऋचोऽपि लिङ्गात्कल्पितश्रुत्येन्द्रोपस्थानाऽङ्गत्वमेव स्यात् । तथा च प्रत्यक्षया तया कल्पितायास्तस्या बाध्यत्वान्न तद्विरोध इत्यर्थः । ननु सत्यत्वकर्तृत्वयोः सहाऽनवस्थानलक्षणो विरोधो भवतीत्यतो वदन्ति-'**सर्वभावे**'ति । भावो धर्मः । तथा च सर्वधर्माश्रयत्वात्तथा तत् । यद्वा । ननु कर्तृत्वे कारणाऽन्तरसापेक्षात्वादसङ्गश्रुतिविरोध इत्यत आहुः—'**सर्वे**'ति । भवनं भावः सर्वत्वेन भावः सर्वभावः । स्वस्यैव सर्वभावे समर्थत्वादभिन्ननिमित्तोपादानरूपतयाऽचिन्त्यैश्वर्यवद्ब्रह्मेति नाऽसङ्गश्रुति-

श्रीलालूभट्टकृता गूढार्थदीपिका।

निष्क्रियत्वादीनां सहाऽनवस्थानलक्षणो विरोधो नास्ति। यतः सर्वभवनसमर्थे ब्रह्मणि विरोधो नास्त्यतस्तत्प्रतिपादिनीनां श्रुतीनामपि विरोधो नास्तीत्यर्थः । '**कल्पोऽपी**'ति । कल्पसूत्रमपीत्यर्थः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

'सर्वभवन'मित्येवरूपकल्पसूत्रमपि । **न विरुध्यते** सर्वभवनसमर्थत्वादकर्त्रपि कर्त्रित्यर्थसम्भवान्न विरुध्यते इत्यर्थः । विरोधाभावे युक्तिमाहुः—'**सर्वभावे**'त्यादि । सर्वरूपैर्भवनं सर्वभावस्तत्र समर्थत्वादित्यर्थः । सर्वभवनसामर्थ्यमुपपादयन्ति—'**अचिन्त्ये**'त्यादि । तच्च 'सत्यं चानृतं च सत्यमभव द्यदिदं किञ्च तत्सत्यमाचक्षते' इति श्रुत्युक्तरूपम् । **वेदेनैव** 'यतो वा इमानि भूतानि' 'आनंदाद्ध्ये-

अन्यथा सर्वत्रैव तदविश्वासप्रसङ्गात् । न च कर्तृत्वे विरोधोऽस्ति । सत्यत्वादिधर्मवत्कर्तृत्व-स्याप्युपपत्तेः । सर्वथानिर्धर्मकत्वे सामानाधिकरण्यविरोधः । सत्यज्ञानादिपदानां धर्मभे-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

भवनं भावस्तस्मिन्समर्थं हि तत् । **'सत्यं चानृतं च सत्यमभवद्यदिदं किंच तत्सत्यमाच-क्षत'** इत्यादिश्रुतेः । तथा च यथैकरसमपि ब्रह्म **'सत्यं विज्ञानमानन्दं ब्रह्मे'**त्यादौ सत्यादिपदप्रवृत्तिनिमित्तधर्मवद्भवति । तथा च कर्तृत्वादिविशिष्टमप्यस्तीति न काचिदनुपपत्तिः । ननु नास्त्येव ब्रह्म सत्यादिपदप्रवृत्तिनिमित्तधर्मवत्तस्य निषेधमात्रपर्यवसितत्वेन सर्वथा निर्धर्मकत्वादित्यत आहुः—

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

इति भावः । ननु क्वचिद्वेदस्याप्यारोपितार्थबोधकत्वं स्यादित्यत आह—**'वेदश्चे'**ति । अन्यथा आरोपितमर्थम् । अन्यथा क्वचित्स्थले तथा स्वीकारे । **'अस्ती'**ति । आरोपितार्थस्य स्वर्गकामो यजेतेत्यत्रापि सत्वेन सन्मार्गोच्छेदापत्तिः । **'न चे'**ति । अस्तीत्यनेनान्वितम् । **'विरोध'** इति । शुद्धब्रह्मणो निर्धर्मकत्वेन तत्र कर्तृत्वस्वीकारे स्वरूपलक्षणविरोध इत्यर्थः । शुद्धस्य निर्धर्मकत्वमेव नास्तीत्याहुः—**'सत्यत्वादी'**ति । आदिना ज्ञानत्वानन्तत्वपरिग्रहः । **'सामानाधिकरण्य'** इति । एकार्थप्रति-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

विरोधः । अथवा कल्पितश्रुतिविरोधाभाव एवायं हेतुः । तथा च स्वस्यैव सर्वरूपेण भवनसमर्थत्वात्तादृशमेव तदिति कल्प्यस्य वेदभागस्य लौकिककर्तृत्वनिषेधपरत्वान्न तद्विरोध इत्यर्थः । कारिकार्थं विशदयन्ति—**'वेदेनैवे'**त्यादि । ननु बोध्यते परमारोपितम् । तत्राहुः—**'वेदश्चे'**ति । **'अन्यथे'**ति । बाधितार्थम् । **'अन्यथे'**ति । बाधितार्थवक्तृत्वे । **'सर्वत्रे'**ति । विधिमन्त्रनिषेधांशे स्वरूपलक्षणांशे च । **'कर्तृत्व'** इति । सत्यत्वादिधर्मैरिति शेषः । यथैकरसमपि सत्यादिपदप्रवृत्तिनिमित्तधर्मवत् । तथा

श्रीलालूभट्टकृता गूढार्थदीपिका ।

यद्वा कल्पोऽपि पक्षोपि, ब्रह्म कर्तृत्वादिधर्मरहितमिति पक्षोऽपि न विरुद्ध्यते । कर्तृत्वादिषु विद्यमानेऽप्यकर्तृत्वादेः स्वीकारे बाधकाऽभावात् । सर्वभवनसमर्थत्वाद्विरुद्धधर्माश्रयत्वादिति भावः । **'सर्वत्रैव तदविश्वासप्रसङ्गादि'**ति । **ज्योतिष्टोमेन स्वर्गकामो यजेते**त्यादौ विध्यंशे, **सत्यं ज्ञानमनन्तं ब्रह्मे**त्यादिस्वरूपलक्षणांशे वेदो ह्यविश्वसनीयः स्याद्यदि क्वाऽप्यक्षरमात्रमप्यन्यथा वदेदिति भावः । **'न च कर्तृत्वे विरोधोऽस्ती'**ति । कर्तृत्वाऽङ्गीकारे स्वरूपलक्षणेन विरोधो नास्तीत्यर्थः । तत्र हेतुः—**'सत्यत्वादि धर्मवदि'**त्यादि । ननु **सत्यं ज्ञानमनन्तं ब्रह्मे**ति श्रुतौ सत्य पदेनाऽसत्यं, ज्ञान पदेन जडो, ऽनन्तपदेन सान्तो व्यावर्त्यत इति त्रिभिः पदैरेक एवार्थ उच्यत इति न तत्र ब्रह्मणि सत्यत्वमायातीत्याशङ्क्याऽऽहुः—**'सर्वथा निर्धर्मकत्वे'** इत्यादि । **सत्यं ज्ञानमनन्तं ब्रह्मे-**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

त्यादि वेदेनैवेत्यर्थः । **परमाप्तः** परमसत्यवक्ता । **अन्यथा** वेदस्य मिथ्यावक्तृत्वे । **सर्वत्रैव** अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादिविधिषु, 'निष्कलं शान्तमनवद्य'मित्यादिसर्वस्मिन् वेदे । **तदविश्वासे**त्यादि । वेदप्रामाण्येऽविश्वास इत्यर्थः । **विरोधोऽस्ति** सर्वभवनसमर्थत्वादेव विरोधो नास्तीत्यर्थः । ननु निर्धर्मके कर्तृत्वधर्मोऽसम्भवीत्यत आहुः—**'सत्यत्वादी'**त्यर्थः । ननु सत्यज्ञानानन्तादिपदानि शुद्धधर्मिमात्रस्य सत्यज्ञानानन्तस्वरूपस्यैव बोधकानि न तु धर्मैर्विशिष्टस्यापीत्यत आहुः—**'सर्वथे'**-

देनैव तदुपपत्तेः । न च कर्तृत्वं संसारिधर्मो देहाद्यध्यासकृतत्वादिति वाच्यम् । प्रापञ्चिके कर्तृत्वे तथैव, न त्वलौकिककर्तृत्वे । अत एवास्येत्याह । 'अस्ये'ति पुरोवर्ती प्रपञ्च इदमा-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

'सर्वथे'ति । तथा सति भिन्नेभ्यो धर्मेभ्य एकरूपधर्मिबोधकत्वलक्षणं सामानाधिकरण्यं कथमुपपद्येत । तथा च तदुपपत्त्यर्थं यथैकरसेऽपि धर्मभेदाभ्युपगमस्तथा कर्तृत्वादेरपीत्यर्थः । अचिन्त्यैश्वर्यमेव दृढीकर्तुं किंचिदाशङ्क्य समादधते—**न चे**ति । ननु कर्तृत्वस्य देहाध्यासकृतत्वेन संसारित्वादसङ्गे तस्मिन्कथं तत्सम्भव इति चेन्न । प्रापंचिके लौकिके तस्मिंस्तथा नियमेऽप्यलौकिके तस्याऽभावात् । अलौकिकत्वे विनिगमकमाहुः—**'अत एवे'**ति । अत्रेदमाऽनेकभूतभौतिकादिलोकाद्भुतरचनायुक्तकोटिब्रह्माण्डरूपोऽत

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

पादकत्वरूपसामानाधिकरण्यविरोध इत्यर्थः । तदेवोपपादयति—**'सत्ये'**ति । धर्मभेदेनैवेति । यथा नीलोत्पलमित्यादौ नीलत्वमुत्पलत्वमेकस्मिन्नुत्पले वर्तत इति कृत्वा नीलाभिन्नमुत्पलं इत्यभेदप्रकारकाऽभेदसंसर्गको वा शाब्दबोधो जायते । तथा सत्यं ज्ञानमित्यादावपि धर्मभेदेनैवोपपत्तिर्भविष्यतीति भावः । **'संसारी'**ति । जीवधर्म इत्यर्थः । **'तथैवे'**ति । देहाध्यासकृतत्वमेव । अस्मिन्नर्थे सूत्रकारसम्मतिमाहुः—**'अत एवे'**ति । **'अस्ये'**ति । अलौकिककर्तृत्वं भगवन्निष्ठमेवेत्यभिप्रायेणैव जन्मा-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

कर्तृत्वादिधर्मवदपीति न काप्यनुपपत्तिः । ननु **'अस्थूलं' 'निष्क्रियं निष्कल'**मित्यादिवाक्याऽनुरोधान्निर्धर्मकमेव तदिति कथं सत्यत्वादिवत्कर्तृत्वाद्युपपत्तिरित्यत आहुः—**'सर्वथे'**ति । तथा सति भिन्नैर्धर्मैरेकधर्मिबोधकत्वरूपसामानाधिकरण्याऽनुपपत्तिः । **'तदुपपत्तेरि'**ति । सामानाधिकरण्योपपत्तेः । ननु तथाप्यप्राकृते ब्रह्मणि कर्तृत्वं नोपपत्तिक्षममित्याशङ्क्य निषेधन्ति—**'न चे'**ति । **'तथैवे'**ति । देहाद्यध्यासकृतत्वम् । एतेन कारिकोक्ताऽचिन्त्यैश्वर्यवत्त्वं विवृतं ज्ञेयम् । तत्र विनि-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

त्यादिपदानां यानि प्रतिपाद्यानि तेषां सत्यत्वचिद्रूपत्वाऽनन्तत्वादीनां सामानाधिकरण्यविरोधः । भिन्नेभ्यो धर्मेभ्य एकधर्मिबोधकत्वलक्षणं सामानाधिकरण्यं नोपपद्येतेत्यर्थः । अयमर्थः । यद्यसत्यजडसान्तव्यावृत्तमेकमेव वस्तु ग्राह्यं स्यात्तदा सत्यादिपदत्रयोक्तिर्व्यर्था स्यात् । पौनरुक्त्यापत्तेः । स्वार्थत्यागरूपदोषाऽऽपत्तिस्तु वर्तत एवेति तथा व्याख्यानमनुत्तममिति भावः । अतः सत्यत्वचिद्रूपत्वाऽनन्तत्वानां सामानाधिकरण्यमादर्तव्यम् । **'धर्मभेदेनैव तदुपपत्तेरि'**ति । सुन्दरसुस्पर्शोऽरुणोत्पलमित्यादौ सुन्दरत्वादीनां धर्माणां भेदेनैव सामानाधिकरण्योपपत्तेः । एकाधिकरणवृत्तित्वं

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

त्यादि । **सामानाधिकरण्यविरोधः** नानापदार्थतावच्छेदकविशिष्टानामभेदेन बोधस्यैव सामानाधिकरण्यपदार्थत्वात्पदार्थतावच्छेदकधर्माणां धर्मिण्यनङ्गीकारे च तादृशबोधस्यानुत्पत्तिरूपो विरोध इति भावः । **तदुपपत्तेः** सामानाधिकरण्येन बोधोपपत्तेः । **'नचे'**त्यादि । **संसारिधर्मः** 'अहङ्कारविमूढात्मा कर्ताहमिति मन्यते' इति भगवद्वाक्यात्संसारिधर्म इत्यर्थः । **'देहे'**त्यादि । आत्मत्वेन देहे ज्ञाते तत्र कर्तृत्वस्यारोपादित्यर्थः । **प्रापञ्चिके** अविद्याकृतदेहाद्यध्यासवन्निष्ठे । **तथैव** संसारिधर्मत्वमेव । **अलौकिककर्तृत्वे** वेदबोधितब्रह्मनिष्ठकर्तृत्वे । **अत एव** उक्तलक्षणरूपकर्तृत्वस्यालौकिकत्वादेव । **अस्ये-**

निर्दिश्यते । अनेकभूतभौतिकदेवतिर्यङ्मनुष्याऽनेकलोकाद्भुतरचनायुक्तब्रह्माण्डकोटिरूपस्य मनसाप्याकलयितुमशक्यरचनस्याऽनायासेनोत्पत्तिस्थितिभङ्गकरणं न लौकिकम् । प्रतीतञ्च निषेध्यं नाऽप्रतीतं, न श्रुतिप्रतीतम् । सत्यत्वादयश्च लौकिकाः । ततः सर्वनिषेधे

गोस्वामिश्रीमन्मुरलीधरविरचिता अणुभाष्यव्याख्या ।

एव तदतिरिक्तेन मनसाऽप्याकल्पयितुमशक्यः प्रपंचो निर्दिश्यते । तस्याऽप्यनायासेन वीक्षणमात्रेणोत्पत्त्यादिकरणं न लौकिकम् । तथा च तस्याऽलौकिकत्वान्न देहाद्यध्याससम्भावनेति भावः । ननु लोके देहाद्यध्यासं विना कर्तृत्वस्याऽदृष्टत्वात्तत्प्रत्यक्षस्य ज्येष्ठप्रमाणत्वात्तद्विरुद्धं तत्तेन निषेध्यमित्यत आहुः—**प्रतीतं चे**ति । यद्धि प्रतीतं तन्निषेध्यम् । नाऽप्रतीतम् । निषेधस्य प्राप्तिपूर्वकत्वात् । अप्रतीतनिषेधेऽसतोऽपि निषेधप्रसङ्गः । न हीदमा निर्दिष्टस्य कार्यस्य कर्तृत्वं लोके प्रतीतम् । येन प्रत्यक्षादिना तन्निषिध्येत । ननु लोके तस्याऽप्रतीतावपि श्रुतौ प्रतीतत्वान्नाऽप्रतीतत्वमित्याशङ्क्याऽऽहुः—'**न श्रुतिप्रतीतमि**'ति ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

द्यस्येत्यस्मिन् सूत्रेऽस्येत्युक्तमित्यर्थः—'**इदमे**'ति । इदंशब्देनेत्यर्थः । अलौकिककर्तृत्वमेवाऽऽहुः—'**अनेके**'ति । **नन्वस्थूलमनण्वि**त्यादिवाक्यानां निर्धर्मकब्रह्मप्रतिपादकत्वात्स्थूलत्वादीनां निषेध इव कर्तृत्वनिषेधोऽपि सम्भवतीत्यत आहुः—'**प्रतीतमि**'ति । अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वादनेकब्रह्माण्डकर्तृत्वस्य लोके प्रतीत्यभावादप्रतीतकर्तृत्वस्य निषेधो न सम्भवतीत्याशयेनाऽऽहुः—'**नाऽप्रतीतमि**'ति । ननु **तस्माद्वा एतस्मादि**त्यादिश्रुतिप्रतीतकर्तृत्वस्य निषेधः स्यादित्यत आहुः—'**न श्रुतिप्रतीत**मिति । **अतिरात्रे षोडशिनं गृह्णाती**त्यनेन षोडशिग्रहस्य ग्रहणं विहितं तदङ्गत्वेन समयाध्युषिते सूर्ये षोडशिनस्तोत्रमुपाकुर्यादित्यनेन स्तोत्रोपाकरणमपि विहितम् । कुत्रचित् । **नातिरात्रे षोडशिनं गृह्णाती**त्यनेन वाक्येनातिरात्रे षोडशिग्रहस्य निषेधोऽपि बोध्यते । तेन च कृत्वा विकल्पः प्रतीयते यथा, तथात्रापि श्रुतिप्रतीतकर्तृत्वस्य निषेधे तुल्यबलत्वा-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

गमकमाहुः—'**अत एवे**'त्यादिना । '**अनायासेने**'ति । वीक्षणमात्रेणेत्यर्थः । '**न लौकिकमि**'ति । एतादृशस्याऽस्यैतादृशकर्तृत्वं न लोकसिद्धमित्यर्थः । लौकिकदृष्ट्या लोकैः प्रतीतं यद्देहाद्यध्यासकृतं कर्तृत्वं तदेव श्रुत्या निषेध्यं ब्रह्मणोऽप्राकृतत्वज्ञानाय न लोकाऽप्रतीतमलौकिककर्तृत्वमित्याहुः—'**प्रतीतमि**'त्यादिना । नापि श्रुतिप्रतीतं श्रुत्या निषेद्धुं शक्यम् । समबलत्वेन बाध्यबाधकत्वाऽभावात् । तदेतदुक्तं '**न श्रुतिप्रतीतमि**'ति । **नन्वसद्वा इदमग्र आसी**दित्या-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

सुन्दरत्वसुस्पर्शत्वारुणत्वादीनामेकस्मिन्नुत्पले वृत्तिर्धर्मभेदेनैव दृष्टा । तथाऽत्रापि सत्यत्वज्ञानत्वाऽनन्तत्वादीनामेकस्मिन् ब्रह्मणि वर्तनम् । यथा सत्यत्वादयो धर्मा ब्रह्मणि विद्यन्ते तथैव श्रुत्युक्ताः कर्तृत्वादय इति न सर्वात्मना निर्द्धर्मकत्वमिति तात्पर्यम् ।

नन्वस्थूलादिवाक्यानां क्वाऽवकाश इत्याकाङ्क्षायामाहुः—**प्रतीतं च निषेध्य**मिति । लोकप्रतीतानामेव स्थूलत्वादीनां निषेधः । न तु श्रौतानामित्यर्थः । अत एवा'**ऽस्थूलमनण्वह्रस्वमि**'-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

त्याह 'जन्माद्यस्य यत' इत्यनेन सूत्रकार आहेत्यर्थः । अलौकिककर्तृत्वमेवोपपादयन्ति—'**अस्ये**'त्यादिना, नाविद्याकृताध्यासवन्निष्ठम् । फलितमाहुः—'**प्रतीत**'मित्यादि । तथा च निषेधस्य प्रतियोगि-

गोस्वामिश्रीमुरलीधरविरचिता अनुभाष्यव्याख्या ।

नहि लौकिकैः प्रमाणैस्तन्निषेद्धुं शक्यम् । तस्याः सर्वतोऽभ्यर्हितत्वेन तेषां तत्रासामर्थ्यात् । समानविषयत्वाऽभावाच्च । अन्यथा समस्तोपाध्यनवच्छिन्नाऽनन्ताऽऽनन्दचैतन्यैकरसमुदासीनमेकमद्वितीयमात्मतत्त्वं श्रुतिस्मृतीतिहासपुराणसिद्धमहमित्यनुभवेन प्रादेशिकाऽनेकविधशोकदुःखादिप्रपञ्चोपप्लुतमात्मतत्वं दर्शयता बाध्येत । न च ज्येष्ठप्रमाणप्रत्यक्षविरोधादाम्नायस्यैव तदपेक्षस्याऽप्रामाण्यमुपचरितार्थत्वं वेति साम्प्रतम् । तस्याऽपौरुषेयत्वेन निरस्तसमस्तदोषाशङ्कस्य स्वतःसिद्धप्रमाणभावस्य स्वकार्ये प्रमितौ प्रमाणान्तराऽनपेक्षत्वात् । ननु प्रमितावनपेक्षत्वेऽपि स्वोत्पत्तौ प्रत्यक्षाऽपेक्षत्वात्तद्विरोधादनुत्पत्तिलक्षणमप्रामाण्यं स्यादिति चेन्न । उत्पादकाऽप्रतिद्वन्द्वित्वात् । न ह्याम्नायजन्यं ज्ञानं व्यावहारिकं प्रत्यक्षस्य प्रामाण्यमुपहन्ति, येन कारणाभावात्स्वयं न भवेदपि तु पारमार्थिकम् । न चैवमतात्त्विकप्रमाणभावेभ्यः कथं तात्त्विकप्रमाणोत्पत्तिरिति वाच्यम् । अतात्त्विकप्रमाणभावेभ्योऽपि सांव्यावहारिकेभ्यस्तत्त्वज्ञानोत्पत्तिदर्शनात् । यथा वर्णे ह्रस्वत्वदीर्घत्वादयोऽन्यधर्मा अपि समारोपितास्तत्त्वप्रतिपत्तिहेतवः ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

द्विकल्पः स्यान्नतु निषेधः स्यादित्यतो न श्रुतिप्रतीतं निषेध्यमिति भावः । ननु मास्तु कर्तृत्वनिषेधः । श्रुत्युक्तं सत्यत्वादिकं तु लोकप्रसिद्धमपि तस्यैव निषेधोऽस्त्वित्यत आह–**'सत्यत्वे'**ति । लौकिकालौकिकत्वेनादृताः । **'तत'** इति । तदनन्तरमित्यर्थः । **सर्वनिषेधे** लोकश्रुतिप्रतीतसाधारण्येन सर्व-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

दिश्रुत्या **सदेव सौम्येद**मिति श्रुतिप्रतिपादिता अपि सत्यत्वादयोऽलौकिका एवेति निषिध्यन्त एवेत्याशङ्क्याऽऽहुः—**'सत्यत्वादय'** इति । यदि तेऽपि लौकिकसिद्धा भवेयुस्तत्त्वेनैव च निषेध्याश्चेत्स्युस्तदा लौकिकाऽलौकिकसर्वधर्मनिषेधे ब्रह्मणोऽज्ञानमेव भवेत् । लक्षणाऽधीननिरूपणत्वाल्लक्ष्यस्य । तथा च **तमेव विदित्वे**त्यादिश्रुतिविरोधः । अथवा **'असदेवेति श्रुत्या, निष्कला**दिश्रुत्या वा ये निषेध्याः सत्यत्वादयस्ते लौकिका एव । अन्यथा ततोऽलौकिकानामपि तेषां निषे-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

त्यनेनाऽणुत्वनिषेधोऽ**णोरणीयान् महतो महीया**नित्यनेनाऽणुत्वविधानं च संगच्छते । निषेधविध्योर्भिन्नविषयत्वात् । दोषविशेषवशाल्लोकानुसारि यदणुत्वं प्रतीतं, तस्य निषेधात् । प्रमाणान्तराऽवेद्यमुपनिषदेकवेद्यस्याऽणुत्वस्य विधानात् । **'नाऽप्रतीतम'**िति । प्रसञ्जयितुमशक्यत्वेन निषेधाऽविषयत्वादप्रतीतं न निषिध्यत इत्यर्थः । ननु तर्ह्येकया श्रुत्या प्राप्तस्याऽपरया श्रुत्या निषेध इत्येव कुतो नोच्यत इत्याकाङ्क्षायामाहुः—**'न श्रुतिप्रतीतम्'**िति । समानबलत्वेन निषेधाऽनर्हत्वात् । विधानवैयर्थ्यापातात्सर्वत्र तथानुपलम्भाच्च न श्रुतिप्राप्तस्य निषेध इत्यर्थः । अत एवाऽ**जरममरमभयमि**त्यादिश्रुतिषु मरणनिषेधः । भ्रमात्प्रतीतस्यैव मरणस्य निषेधः । न हि कापि श्रुतिर्मरणं विधत्ते । अत एकत्र निर्णीतः शास्त्रार्थोऽपरत्रापि नेय इति न्यायात् सर्वत्रैव श्रुतौ ये धर्मा निषिध्यन्ते ते दोषवशात्प्रतीता एव । ये तु विधीयन्ते ते त्वलौकिकाः श्रुत्येकसमधिगम्या इति निर्दुष्टो निर्णयः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

ग्रहसापेक्षत्वादप्रतीतनिषेधो न भवतीत्यर्थः । **न श्रुतिप्रतीतं** श्रुत्या प्रतीतस्य श्रुत्या निषेधे विकल्प एव भवेन्नतु निषेध इत्यर्थः । नन्व'सदेवेदमग्र आसीत्' 'नासदासीन्नो सदासीदि'त्यादिश्रुतिभिः 'सत्यं ज्ञानमि'त्यादिश्रुतिप्रतीतस्य सत्यत्वादेरपि निषेधात्कथं श्रुतिप्रतीतं निषेद्धुमशक्यमित्यत आहुः—

तदज्ञानमेव भवेत् । न च सत्यत्वादिकं लोके नास्त्येव । व्यवहारमात्रत्वात् । कारणगत-सत्यत्वं प्रपञ्चे भासत इति वाच्यम् । तर्हि कर्तृत्वं तथा कुतो नाङ्गीक्रियते? । स्मृतिश्च स्वी-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

इदं शाब्दानुभवस्य ज्येष्ठप्रमाणजन्यत्वमङ्गीकृत्योक्तम् । वस्तुतस्तु यत्र लौकिके शाब्द इयं रीतिस्तत्राऽपौरुषेये तस्मिन्का शङ्का प्रत्यक्षजन्यस्य बाधस्य । ननु लौकिकप्रमाणैर्निषेधाऽसंभवेऽपि 'निष्क्रियमि'त्यादिश्रुत्यैव तन्निषेध्यमिति चेत्—स्वोक्तनिषेधे प्रतारकत्वप्रसङ्गेन परमाप्तत्वं श्रुतेर्व्याहन्येत । उभयोरपि श्रुतित्वाऽविशेषाद्बाध्यबाधकभावाऽनुपपत्तेश्च । **नन्वसदेवेदमग्र आसीन्नासदासीन्नो सदासीदि**'त्यादिभ्यः सत्यत्वादेर्निषेधात्तस्य च श्रुत्येकसमधिगम्यत्वात्कथं श्रुतिप्रतीतं श्रुत्या न बाध्यत इत्याशङ्क्याऽऽहुः—'**सत्यत्वादयश्च लौकिका**' इति । निषिध्यन्त इति शेषः । सर्वेषां निषेधे बाधकमाह—'**तत**' इति । ब्रह्मणः सर्वेषां निषेधे तस्य ब्रह्मणोऽज्ञानमेव भवेत् । लक्षणनिरूपणाधीननिरूपणत्वाल्लक्ष्यस्य । तथा च '**तमेव विदित्वे**'त्यादिश्रुतयो बाधिता एव भवेयुरित्यर्थः । ननु सांव्यावहारिकं तन्नास्त्येव । अस्तिभातिप्रियत्वेन तदन्वयस्यैव समन्वयसूत्रे वक्ष्यमाणत्वात् । तथा

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

निषेधे । **तदज्ञानमेव** ब्रह्माज्ञानमेव । केनचिद्रूपेण निरूपणं कर्तव्यं, सर्वनिषेधे निरूपणं कर्तुमशक्यत्वाच्छास्त्रवैयर्थ्यं स्वरूपलक्षणवैयर्थ्यं च स्यादिति भावः । '**न चे**'ति । ब्रह्माऽज्ञानाऽभावाय श्रुतिप्रतीतमेव सत्यत्वं न लोकप्रतीतमिति न तस्य निषेध इति भावः । समाधानमाहुः—'**तर्ही**'ति । **तर्हि** श्रुतिप्रतीतनिषेधाऽस्वीकारे । **तथा** श्रुतिप्रतीतत्वादनिषेध्यम् । कर्तृत्वस्य स्मृतिप्रतीतत्वमप्याहुः—'**कर्ते**'ति ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

धात्तदुभयनिषेधे तदज्ञानापत्तिरित्यर्थः । फलं च पूर्वोक्तमेव । ननु लोके तत्सत्यत्वादिकं नास्त्येव । भानं तु कारणगतस्यैव तस्येत्यलौकिका एव त इति तत्राहुः—'**न चे**'ति । '**तर्ही**'ति ब्रह्मण्यलौकिकतदङ्गीकारे । **तथा**ऽलौकिकं कर्तृत्वम् । सत्यत्वसमानयोगक्षेमत्वात्कर्तृत्वस्येति हृदयम् । किञ्च तादृशकर्तृत्वाऽङ्गीकारे स्मृतिसङ्गतिस्वीकाररूपो गुणोऽपीत्याहुः—'**स्मृतिश्चे**'ति । ननु वस्तुस्वभाव-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

एवमेव सर्वत्र निर्वाहात् । '**सत्यत्वादयश्च लौकिका**' इति । यदि **यतो वा इमानि भूतानी**त्यादिश्रुतिसिद्धमपि कर्तृत्वं लौकिकं मत्वा ब्रह्मणि नाऽऽद्रियते, तदा तु **सत्यं ज्ञानमि**ति श्रुतिसिद्धाः सत्यत्वादयोऽपि लौकिका इति मत्वा नाऽऽदरणीया इत्यर्थः । ननु तर्ह्यस्तिसत्यत्वादीनामप्यनादरणीयतेत्याशङ्क्याऽऽहुः—'**ततः सर्वनिषेधे तदज्ञानमेव भवेदि**'ति । धर्ममात्र-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

सत्यत्वादय इति । तथा च लौकिकसत्त्वादेरेवोक्तश्रुत्या निषेधः कृतो ननु श्रुतिप्रतीतसत्त्वादेरित्यर्थः । नन्वस्तिभातिप्रियमितिब्रह्मस्वरूपान्तःपात्यस्तित्वमेव सत्यत्वं लोके प्रतीयते तच्च सर्वत्र व्यापकब्रह्मस्वरूपान्वयेनैव प्रतीयते तच्च न लौकिकमित्याहुः—'**न च सत्यत्वे**'त्यादिना । **व्यवहारे**त्यादि । प्रपञ्चस्य मिथ्यात्वेन सत्यत्वव्यवहारनिर्वाहार्थम् । **कारणगतमेव** विवर्तोपादानगतमेव । **तथा** ब्रह्मगतम् । लोके

कृता भवति 'कर्ता कारयिता हरि'रिति। न चाऽऽरोपन्यायेन वक्तुं शक्यम्। तथा सत्यन्यस्य स्यात्। तत्र न प्रकृतेः। अग्रे स्वयमेव निषिध्यमानत्वात्। न जीवानाम्। अस्वातन्त्र्यात्।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

च तदेव पारमार्थिकं कारणगतं कार्ये भासत इत्याशङ्क्य प्रतिबन्दिदानेन समादधते—**'न च सत्यत्वादी'**ति। प्रतिबन्दिनमाह—**'तर्ही'**ति। तत्समानयोगक्षेमत्वात्कर्तृत्वस्य। अधिकं तत्रानुप्रविष्टं न तु तद्धानिरितिन्यायेनाऽऽह—**'स्मृतिश्चे'**ति। अत एव चशब्दः।

ननु नित्यशुद्धमुक्तस्वभावे ब्रह्मणि अन्यगतकर्तृत्वारोपाऽनुवादेनैव सर्वोपपत्तौ कस्मात्पारमार्थिकं तदभ्युपगम्यत इत्यत आहुः—**'न चे'**ति। आरोपो ह्यसन्निहितविषयः परत्र पूर्वदृष्टावभासः। स चाऽत्र न संभवति। अन्यपदार्थे तस्य निरूपयितुमशक्यत्वात्। कथमशक्यत्व'मजामेकामि'त्यादिना प्रकृतौ तस्य विद्यमानत्वादित्यत आहुः—**'तत्र न प्रकृतेरि'**ति। अत्रेदमानिर्देशेन पूर्वोक्तविशेषणद्वयविशिष्टस्य नामरूपाभ्यां व्याकृतस्य जगतः कर्तृत्वमचेतने न सम्भवति। यत्खलु नाम्ना रूपेण च व्याकृतं तच्चेतनकर्तृकं दृष्टं, यथा घटादि। चेतनो हि संकल्पात्मना बुद्धौ घट इति नाम्ना रूपेण च कम्बुग्रीवादिनाऽऽलिख्य घटं निष्पादयतीति नाऽचेतने तथाकृतिः सम्भवतीति न प्रधानस्य कर्तृत्वं सम्भावयितुमपि शक्यमित्यादियुक्तिभिः सूत्रकारेणैव निराकरिष्यमाणत्वादित्यर्थः। ननु चेतना इन्द्रादयो, ग्रहा वा जगज्जनयिष्यन्ति कृतं नित्यशुद्धमुक्तस्वभावेन ब्रह्मणेत्यत आह—**'न जीवानामि'**ति। तत्र हेतुमाहुः—**'अस्वातन्त्र्यादि'**ति। कानिचिद्भूतान्याकाशादीनि, कानिचिद्भौतिकानि देवतिर्यङ्मनुष्यादिरूपाण्यनेकलोकरूपाणि च। तेषामप्यद्भुताऽपरिमितज्ञानक्रियाशक्तीनां वि-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

ननु स्वरूपलक्षणभङ्गान्यथानुपपत्त्या सत्यत्वं ब्रह्मणि वक्तव्यं, कर्तृत्वं तु न वक्तव्यम्। तस्माद्वेत्यादिश्रुत्युक्तकर्तृत्वोपपत्तिस्त्वारोपादेवेत्याशङ्कते—**'नचे'**ति। शक्यमित्यनेनाऽन्वितम्। **तथा सति** अन्यगतकर्तृत्वस्य ब्रह्मण्यारोपे क्रियमाणे सति। कर्तृत्वस्याऽन्यगतत्वमेव नास्तीत्याहुः—**'न प्रकृतेरि'**ति। अग्रे ईक्षत्यधिकरणे। **'अस्वातन्त्र्यादि'**ति। प्रपञ्चमध्यपातित्वेनोत्पत्तिस्थिति-

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

विरुद्धत्वाद्ब्रह्मणि पारिमार्थिकं कर्तृत्वं न वक्तुं शक्यम्। श्रुत्यादिसङ्गतिस्त्वन्यगतकर्तृत्वारोपादेवेत्याशङ्क्य समादधते—**'न चे'**त्यादि। **'तथा सती'**ति। कर्तृत्वाऽऽरोपे सति। पारिमार्थिकं तदन्यस्य स्यात्। जडजीवावेव द्वावन्यपदार्थाविति पूर्वं जडे तन्निषेधन्ति—**'तत्र ने'**ति। **अग्र** ईक्षत्यधिकरणादौ। जीवानां निषेधन्ति—**'ने'**ति। **'अस्वातन्त्र्यादि'**ति.। कारणान्तरसापेक्षत्वात्।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

ब्रह्मगतकर्तृत्वसत्तासाधिकां स्मृतिमाहुः—**'कर्ते'**त्यादि। ननु नित्यशुद्धेत्याद्युक्तब्रह्मण्यन्यगतकर्तृत्वारोपेण श्रुत्यानुवादेपि कर्तृत्वव्यवहारोपपत्तेर्वास्तवकर्तृत्वस्वीकारे प्रयोजनाभाव इत्यत आहुः—**'नचारोपे'**त्यादि। **वक्तुं शक्यं** ब्रह्मणि कर्तृत्वमित्यर्थः। **तथा सति** अन्यगतजगत्कर्तृत्वस्य ब्रह्मणि आरोपे वक्तव्ये सति। **तत्र** ब्रह्मान्यपदार्थे जगत्कर्तृत्वं न सम्भवतीत्युपपादयन्ति—**'तत्रे'**त्यादिना। **अग्रे** आनन्दमयाधिकरणे द्वितीयाध्याये चेत्यर्थः। **स्वयमेव** व्यासचरणैरेव। नन्विन्द्रादिजीवगतमेव कर्तृत्वं ब्रह्मणि आरोप्यत इत्यत आहुः—**'न जीवाना'**मिति। **अस्वातन्त्र्यात्** 'स्वतन्त्रः कर्ते'ति-

नचाऽन्येषाम् । उभयनिषेधादेव । तस्मात् ब्रह्मगतमेव कर्तृत्वम् । एवं भोक्तृत्वमपि ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

स्मयजनिका या रचना, तद्युक्तानि ब्रह्माण्डानि, तेषां कोट्यस्तद्रूपस्याऽत एव तैर्मनसापि विचारयितुमशक्यस्योत्पत्त्यादिकरणं ब्रह्मणः सर्वज्ञात्सर्वशक्तेरन्यस्मिन्न सम्भवति । केचिदिन्द्रादयो देवाः परमैश्वर्यवन्तः केचित्तदायत्ताः । केचित्तिर्यञ्चो भयजनकाः केचिन्नेति । तथा मनुष्येषु केचित्सूदर्त्विगादयः कर्तार एव न भोक्तारः । केचित्तु पित्रादयः श्राद्धे भोक्तार एव न कर्तारः । तथा **'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात'** इत्युपक्रम्य **'यस्मिञ्जाते एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियादिपशुमान्भवती'**त्यादौ चतुर्थाध्याये विचारितम् । तत्र पूतत्वादि किं पितुः फलमुत पुत्रस्येति । तत्र फलस्य कर्तृगामित्वनियमान्निर्वपेदिति प्रेरणाऽनुपपत्तेश्च पितुरेव फलमिति प्राप्ते राद्धान्तितं **'यस्मिञ्जात एतामिष्टिं निर्वपति स पूत'** इति जातगामित्वेन फलश्रवणात्पुत्रगाम्येव फलम् । न कर्तृगामि । तथा केचिन्नियतदेशोत्पादा यथा कृष्णमृगादयः । केचिन्नियतकालोत्पादा यथा कोकिलादयः । केचिन्नियतनिमित्ता यथा नवाम्बुदध्वानादिनिमित्ता बलाकागर्भादयः । केचित्प्रतिनियतक्रिया यथा ब्राह्मणानां यजनादयो, नेतरेषाम् । एवं केचिद्दुःखिनः । केचित्सुखिनः । कदाचित्तद्विपर्ययश्चेत्याद्यद्भुतरचनायुक्तब्रह्माण्डकोटिरूपमेकस्या अपि शरीररचनायाः स्वरूपं तैर्मनसाप्याकलयितुमशक्यरचनं कुतस्तरां तत्करणसामर्थ्यमिति, न चेतना इन्द्रादयोऽस्य कर्तार इति सर्वज्ञं सर्वशक्तिनित्यशुद्धमुक्तस्वभावमलौकिकं ब्रह्मैव कारणमित्यलौकिकमेव कर्तृत्वमिति सिद्धम् ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

भङ्गकरणे सामर्थ्याऽभावादिति भावः । **'न चान्येषामि'**ति । इन्द्रादीनामित्यर्थः । **उभयनिषेधादि'**ति । इन्द्रादीनां जीवान्तःपातित्वाज्जडजीवयोरुभयोर्निषेधादेवाऽन्येषां निषेध इत्यर्थः । उपसंहरन्ति—**'तस्मादि'**ति । **'कर्तृत्वमि'**ति । श्रुतिप्रतिपाद्यमलौकिकमिति शेषः । एतावता प्रबन्धेन परब्रह्मणि फलवाक्योक्तकर्तृत्वं प्रतिपाद्य कार्यलक्षणस्वरूपलक्षणयोर्विरोधः परिहृतः । इदानीं फलवाक्याऽनुक्तानां सर्वज्ञत्वादिधर्माणां सकलानां तत्तच्छ्रुतिप्रतिपाद्यानां ब्रह्मणि निरूपयितुं भूमिकां रचयन्ति—**'एवमि'**ति । **'भोक्तृत्वमि'**ति । श्रुतिप्रतिपाद्यमलौकिकं भोक्तृत्वमित्यर्थः । स्मृति-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

स्मृतेः प्रपञ्चोत्पत्तिस्थितिभङ्गकरणे जीवानां प्रपञ्चमध्यपातित्वेन स्वातन्त्र्याभावादित्यर्थः । ननु जडचेतनभिन्नानामन्येषामेव प्रपञ्चकर्तृत्वं ब्रह्मणि आरोप्यत इत्यत आहुः—**'नचान्ये'**षामिति । **उभयनिषेधात्** उभयेनैवान्येषां निषेधादित्यर्थः । ननूभयातिरिक्तस्याप्रसिद्धत्वात्कथमुभयेनान्येषां निषेध इति चेदित्थम् । तथाहि—जडजीवोभयं वस्तु, वेदेन वस्तुत्वेन प्रमीयमाणत्वादात्मवदितिकेवलान्वय्यनुमानेनोभयत्वावच्छेदेन वस्तुत्वे निर्धारितेऽर्थादुभयातिरिक्तवस्तुनो निषेधादिति बोध्यम् । ननूभयोर्वस्तुत्वप्रमापको वेदः क इति चेदयं 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' इत्यादिरूपोवसेयः । ब्रह्मणि कर्तृत्वमुपसंहरन्ति—**'तस्मा'**दित्यादिना । कर्तृत्वतुल्यतया भोक्तृत्वमुपपादयन्ति—**एवमिति** । तथा च यथा कर्तृत्वमलौकिकं तथा ब्रह्मणि भोक्तृत्वमप्यलौकिकमवसेयमित्यर्थः । ननु ब्रह्मणि कर्तृत्वं नास्त्येव 'निष्क्रियं' 'असंगो ह्ययं पुरुष' इत्यादिश्रुतिभिर्निषेधादत आहुः—**नवेत्यादि** । **कर्तृत्वं** प्रमासमानाधिकरणम-

न वा काचिच्छ्रुतिः कर्तृत्वं निषेधति । विरोधभानात्कल्प्या[1] तु लौकिकपरा । फलवाक्येऽप्यश्रुतानां गुणोपसंहारः कर्तव्यः ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

ननु प्रकृतिजीवाऽतिरिक्तानामेव केषाञ्चित्कारणत्वं कस्मान्न भवतीत्यत आहुः—'**न चान्येषामि**'ति—तत्र हेतुमाहुः-'**उभये**'ति । तदतिरिक्तस्य वस्तुनोऽभावादित्यर्थः । उपसंहरन्ति—'**तस्मादि**'ति । अतिदिशन्ति—'**एवं भोक्तृत्वमपी**'ति। यथा कर्तृत्वमलौकिकं, तथा भोक्तृत्वमप्यलौकिकमेवाऽभ्युपगन्तव्यमित्यर्थः । ननूक्तं '**निष्क्रिय**''**मसङ्गो ह्ययमि**'त्यादिश्रुतिभिः कर्तृत्वादिकं निषेध्यत इति, तत्राऽऽह—'**न वे**'ति। कर्तृत्वमलौकिकं कर्तृत्वम् । प्रतीतं हि निषेध्यमित्युक्तत्वाद्देहाद्यध्यासकृतस्यैव प्रतीतत्वेन तदेवाऽत्र निषिध्यत इति नाऽनुपपत्तिः काचित् । अलौकिकस्य निषेधे बाधकान्तरमाह—'**विरोधभानादि**'ति । ब्रह्मण औपनिषदत्वाद्विरुद्धधर्माश्रयत्वेन सर्वोपपत्तेर्विद्यमानत्वेऽपि बुद्धिदोषजन्यविरोधभानादलौकिकतन्निषेधपरत्वेन कल्प्या तु श्रुतिर्लौकिकपरा लौकिकप्रमाणपादानुगा भविष्यतीति महद्दूषणम् । श्रौतस्यार्थस्य लौकिकप्रमाणाऽनुसारित्वं नास्ती-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

रपि—**भुङ्क्ते भोजयते हरिरि**ति भोतृत्वं प्रतिपादयति । अपिना सर्वज्ञत्वादीनां परिग्रहः । ननु यद्यलौकिककर्तृत्वं ब्रह्मणि स्वीक्रियते चेदकर्तृत्वप्रतिपादकानां श्रुतीतां कर्तृत्वनिषेधकत्वं स्यादित्यत आह—'**न वे**'ति । '**श्रुतिरि**'ति । '**असङ्गो ह्ययं पुरुष**' इत्याद्यकर्तृत्वप्रतिपादिका श्रुतिरित्यर्थः । '**विरोधे**'ति । श्रुतिप्रतिपाद्ययोः कर्तृत्वाऽकर्तृत्वयोरचिन्त्यैश्वर्यवति भगवति विरोधाऽभानादित्यर्थः । ननु ब्रह्मण्यकर्तृत्वप्रतिपादकश्रुत्यन्वयाऽनुपपत्त्या साक्षात्कर्तृत्वनिषेधिका श्रुतिः कल्प्यत इत्यत आह—'**कल्प्ये**'ति । '**लौकिके**'ति । जीवनिष्ठं यल्लौकिककर्तृत्वं तन्निषेधपरत्वेन व्याख्येयेत्यर्थः ।

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

'**अन्येषामि**'ति । कालकर्मस्वभावानाम् । तदन्तर्भावादेवेति भावः । उपसंहरन्ति—'**तस्मादि**'ति । अतिदिशन्ति—'**एवमि**'ति । अलौकिककर्तृत्ववत्फलवाक्योक्तं सर्वकामभोक्तृत्वमलौकिकम् । अनध्यस्तमप्राकृतमिति यावत् । न हीतिकारिकार्थं विवृण्वन्ति—'**न ही**'ति । '**विरोधभानादि**'ति निष्कलादिश्रुतिविरोधभानरूपाल्लिङ्गात्कल्प्या निषेधिका श्रुतिर्लौकिककर्तृत्वादिधर्मनिषेधिका भविष्यतीत्यर्थः । तथा च कालत्रयाऽबाध्यं स्वप्रकाशमपरिच्छिन्नं सर्वकर्तृत्वसर्वकामभोक्तृत्वाद्यलौकिकधर्मविशिष्टं परं ब्रह्मेति सिद्धम् ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

निषेधे तदज्ञानं, ब्रह्माऽज्ञानमेव भवेदित्यर्थः । '**विरोधभानात्कल्प्या त्वि**'ति । निरञ्जनत्वादिधर्मविरोधात्कल्पनीयाऽनुमेया तु श्रुतिर्लौकिकपरा । लौकिकधर्मनिषेधिका भविष्यतीत्यर्थः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

लौकिकं कर्तृत्वमित्यर्थः । इत्थं च लौकिककर्तृत्वभोक्तृत्वयोर्निषेधेप्यलौकिके ब्रह्मण्यव्याहते एवेत्यर्थः । ननु निष्क्रियत्वासङ्गत्वादीनां ब्रह्मणि श्रुत्या प्रतिपादनादलौकिककर्तृत्वनिषेधिका श्रुतिः कल्प्या ।

१–कल्प्योऽपीत्यपि पाठः ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

त्याशयेन श्रुतिरेवाऽऽह—'**नैषा तर्केण मतिरापनेये**'ति । स्मृतिश्चा'**ऽलौकिकास्तु ये भावाः**'। '**नहि विरोध उभयमि**'त्यादिकममुमेवार्थमाह ।

ननु '**ब्रह्मविदाप्नोती**'त्यादिसन्दर्भे कर्तृत्वोक्तावपि भोक्तृत्वस्याऽनुक्तत्वादेवं भोक्तृत्वमपीति कथं संगच्छत इत्याशङ्क्य कैमुत्येन समाधानमाहुः—'**फलवाक्येऽपी**'ति । अत्रायमर्थः । '**तमेव विदित्वे**'-त्यादिभिर्ब्रह्मज्ञानस्यैवाऽपरोक्षस्याऽमृतत्वसाधकत्वम् । तत्साधनं, '**श्रोतव्यो मन्तव्यो निदिध्यासितव्य**' इति श्रुतेः श्रवणादिकमेव । तथा च निदिध्यासनरूपाण्युपासनानि विज्ञेयस्य पूर्वापरादिभेदरहितस्यैकरसस्य सैन्धवघनवदवधारितस्य ब्रह्मणः प्रतिवेदान्तं भिद्यन्ते न वेति सन्देहे सर्ववेदान्तप्रत्ययानि विज्ञानानि तस्मिंस्तस्मिन्वेदान्ते तान्येव तान्येव भवन्ति । संयोगरूपचोदनाख्यानां प्रतिवेदान्तं विशेषाऽभावात् । यथा मुख्यप्राणोपासनायां वाजसनेयिनां छन्दोगानां च प्रयोजनसंयोगो विशिष्ट एव ज्येष्ठश्च श्रेष्ठश्च स्वानां भवतीति । तथा रूपमप्युभयत्र तदेव विज्ञानस्य । विज्ञेयमेव हि रूपं विज्ञानस्य । तेन हि तन्निरूप्यते । यथा द्रव्यदैवतं यागस्य । ज्येष्ठत्वश्रेष्ठत्वादिविशेषाणामुभयत्रापि साम्यात् । तथा चोदनाऽपि 'यो ह वै ज्येष्ठं च श्रेष्ठं च वेदे'ति समानैव । एवमाख्यापि सैव प्राप्ता विद्येति । तथा च संयोगादिभिर्हेतुभिर्विज्ञानानामेकत्वे यत्रैव वेदान्तरोदितगुणेभ्यो न्यूना गुणास्तत्र तत एवोपसंहर्तव्या इति. गुणोपसंहारपादे निरूपयिष्यते । तथा फलवाक्येऽपि फलं ब्रह्म तत्प्रतिपादके ब्रह्मविदाप्नोतीत्यादिवाक्येऽपि, तैरव हेतुभिस्तत्राश्रुतानां भोक्तृत्वसर्वगतत्वसर्वात्मत्वसर्वाधिपतित्वादीनां गुणानां गुणोपसंहारः फलसाधनीभूतविज्ञाननिष्ठगुणानामिवो-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ननु फलवाक्यविवरणरूपात्त**स्माद्वा एतस्मा**दित्यादिवाक्याद्भोक्तृत्वसर्वज्ञत्वादीनामप्रतीतेः कया रीत्या ब्रह्मणि तेषां धर्माणां विद्यमानत्वबोधो भवतीत्यत आह—'**फलवाक्ये**'ति । '**गुणोपसंहार**' इति । अग्र उक्तानां गुणानामुपास्ये यथोपसंहारस्तथाऽग्रे चराचराधिकरणीयविषयवाक्योक्त-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

ननु फलवाक्ये तावद्धर्माऽश्रवणात्कथं तद्वैशिष्ट्यमूरीकार्यमित्यत आहुः—'**फलवाक्येऽपी**'ति । अश्रुतानां कर्तृत्वादिधर्माणाम् । **गुणोपसंहारो** गुणानामुपसंहारः संग्रहः । अपिर्वेक्ष्य-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ननु ब्रह्मविदाप्नोति परमिति फलवाक्यसन्दर्भे **तस्माद्वा एतस्मा**दित्यादिना कर्तृत्वं श्रूयते । **न तु भोक्तृत्वमपीति** कथमेवं भोक्तृत्वमपीति भाष्यकृद्भिरुक्तमित्याशङ्क्य भाष्यकाराः समादधते—'**फलवाक्येऽप्यश्रुतानामि**'त्यादिना । गुणोपसंहारन्यायस्तृतीयाध्याये स्फुटः । तथाचैको

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

अलौकिककर्तृत्वस्याप्यसङ्गादिश्रुतिविरुद्धत्वादित्यत आहुः—'**विरोधे**'त्यादि । तथा च विरुद्धधर्माश्रयत्वस्य ब्रह्मणि सर्वोपनिषत्समन्वयानुरोधेनाङ्गीकाराद्विरोधाभावात्कल्प्या श्रुतिः **लौकिकपरा** लौकिकप्रमाणान्तःपातिन्येव भविष्यतीति नालौकिककर्तृत्वनिषेधनसमर्था भविष्यतीति भावः । नन्वलौकिककर्तृत्वस्य साधितत्वेपि **एवं भोक्तृत्वमपी**त्यनेन प्रतिज्ञातमलौकिकभोक्तृत्वं कथं सिध्येदित्याकाङ्क्षायां कैमुतिकन्यायेन तत्सिद्धिमाहुः । '**फलवाक्य**' इत्यादिना । **फलवाक्येपि**

तथाचायं सूत्रार्थः—जन्मादिर्येषामित्यवयवसमासादतद्गुणसंविज्ञानो बहुव्रीहिः। अथवा

गोस्वामिश्रीमन्मुरलीधरविरचिता अणुभाष्यव्याख्या ।

पसंहारः कर्तव्य इत्यर्थः । अत एवाऽपिशब्दोऽपि संगच्छते । तथा सति कैव कथा भोक्तृत्वमात्रस्येति कैमुतिकन्यायः प्रदर्शितः । **'न च कर्तृत्वमि'**त्यारभ्य **'गुणोपसंहारः कर्तव्य'** इत्यन्तो ग्रन्थोऽचिन्त्यैश्वर्यार्थनिरूपको ज्ञेयः ।

नन्वत्र सूत्रव्याख्यानस्यैवोचितत्वेन श्रुतिवाक्यार्थनिरूपणं कुत्रोपयुज्यत इत्यत आहुः—**'तथा चे'**ति । तथा च वाक्यार्थे निश्चितेऽयमेव वाक्यार्थ एव सूत्रार्थ इत्यर्थः । अस्य भाष्यत्वेन तथोक्तिर्युक्तैव । एवं वाक्यार्थनिरूपणेन सूत्रार्थं निरूप्य तदेव दृढीकर्तुं सूत्राऽवयवान्व्याचक्षते । **'जन्म आदिर्येषामि'**ति । तानीति शेषः । अवयवार्थकानां पदानां हि बहुव्रीहौ बहुधाऽतद्गुणसंविज्ञानत्वमेव प्रतीयते । संयोगसमवायाऽन्यसम्बन्धेन कार्याऽनन्वयितया गुणानां वृत्तिघटकीभूतपदाना-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

भोक्तृत्वस्य भूमाद्यधिकरणोक्तभूमात्वस्यात्रोपसंहारं कृत्वा तत्तद्धर्माणां ब्रह्मणि विद्यमानत्वमनया रीत्या बोध्यमिति दिक् । एतावता कार्यलक्षणस्य ब्रह्मणि समन्वयं कृत्वाऽतद्गुणसंविज्ञानबहुव्रीहिं स्वीकृत्य पुष्टिसृष्टिप्रकारेण सूत्रार्थमाहुः—**'तथाचे'**ति । जन्म आविर्भावो येषां प्रकाराणामित्यर्थः । 'अवयवस-

केश्चिद्विरचिता वेदान्तचन्द्रिका ।

माणोपासनासमुच्चायकः । फलितमाहुः—**'तथा चे'**ति । **'अयमि'**ति । उक्तप्रकारेणाऽनुपपत्त्यभावात्कर्तृत्वादिधर्मविशिष्टं ब्रह्मेत्येवंरूपो वक्ष्यमाणः, अन्ते सिद्ध्यतीति शेषः । तमेव विशदयन्तः सूत्राऽवयवान् व्याकुर्वन्ति—**'जन्मादी'**ति । जन्मादिः प्रथमोऽवयवो येषां जन्मस्थितिलयानां ते जन्मादि । अत्र सुपां सुलुगिति जसो लुक् । **'अवयवसमासादि'**ति । अवयवत्वबोधकसमासात् । भावप्रधानोऽयं निर्देशः । तादृशसमासत्वादित्यर्थः । **'अतद्गुणसंविज्ञान'** इति ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

साधारणो ब्रह्मधर्मो यत्र श्रूयते तत्राऽन्येषामनुक्तानामप्युपसंहारः कर्तव्यः । एवं सति फलवाक्ये ह्यश्रुतमपि भोक्तृत्वमुपसंहर्तव्यमिति बोधनीयम् । **जन्म आदिर्येषामित्यवयवसमासा-**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

'ब्रह्मविदाप्नोति परमि'तिफलवाक्येपि । **'अश्रुताना'**मित्यादि । तथाचोपसंहारपादे तत्तदुपासनानुगुणयोग्यगुणानां धर्माणामुपास्ये यथोपसंहारः क्रियते तथा फलवाक्योक्तफले परस्मिन्नपि माहात्म्यज्ञानोपयोगितया भोक्तृत्वसर्वगतत्वसर्वाधिपतित्वादिश्रुतिबोधितसर्वधर्माणामेवोपसंहारः कर्तव्यः का कथा भोक्तृत्वस्येत्यर्थः ।

एवं सिद्धान्तं निरूप्य सिद्धान्तस्य सूत्रतात्पर्यस्य विषयत्वं ज्ञापयितुं सूत्रार्थमाहुः—**'तथाचे'**त्यादिना । जन्मआदि प्रथमावयवरूपं येषां ते जन्मादि । 'सुपां सुलुगि' ति जसो लुक् । तथा चादिपदस्य यत्पदार्थे उत्पत्तिस्थितिभङ्गत्रित्वावच्छिन्ने लक्षणा । जन्मपदतात्पर्यग्राहकं एतत्रित्वावच्छिन्नं यत इति बोधः । **'अतद्गुणे'**त्यादि । तथा च यत्र समासघटकपदार्थतावच्छेदकधर्मप्रकारेण समासघटकपदार्थानां बोधस्तत्राजहल्लक्षणा, यथा लम्बकर्ण इत्यत्र लम्बकर्णत्वधर्माभ्यां लम्बकर्णयोर्बोधात्

जन्मप्रभृति सर्वे भावविकारा आदिशब्देन गृह्यन्ते । तथा च, जन्म च आदिश्चेत्येकव-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

मर्थोऽन्यपदार्थे प्रधानेऽन्वेतीत्यतद्गुणसंविज्ञानत्वम् । अत एव **'सर्वादीनि सर्वनामानी'**त्यत्र सर्वशब्दस्य सर्वनामसंज्ञाप्रयुक्तसुडागमसिद्ध्यर्थं तद्गुणसंविज्ञानो बहुव्रीहि**'र्हलि सर्वेषामि'**ति ज्ञापकबलेन स्वीकृतः । तस्मादवयववाचके बहुव्रीहौ ज्ञापकं विना न तद्गुणसंविज्ञानत्वमिति भावः ।

ननु जन्म आदिर्येषामिति विग्रहवाक्ये बहुवचनमनुपपन्नं, सूत्रे प्रत्यक्षत एवैकवचनस्य दृष्टत्वादिति चेत् । उच्यते । अयं बहुवचननिर्देशो बहुव्रीहेः कर्मधारयगर्भत्वसूचकः । अन्यथा

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

मासादि'ति भावप्रधानो निर्देशः । अवयवसमासत्वादित्यर्थः । तथा च जन्म आविर्भावः तद्रूपं यदवयवं तत् आदिः प्रथमं येषां स्थितिप्रलयाभिसंवेशानां प्रकाराणां ते जन्मादि । ननु जन्मादय इति वक्तव्ये कथं जन्मादीति चेत् । न । अस्य सूत्रस्य वेदरूपत्वं बोधयितुं छान्दसः **सुपां सुलुगिति** सूत्रेण जसो लुक् । ब्रह्मण इत्यधिकारलभ्यम् । यतो ब्रह्मणः सकाशादस्य जगतो जन्मादि आविर्भावतिरोभावादिप्रकारा भवन्तीति सूत्रार्थः । तथा च श्रुतिः-**सो अङ्ग वेद यदि वा न वेद । कि॰स्विद्वनं कउ स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदुतत् यदध्य तिष्ठद्भुवनानि धारयन् । ब्रह्म वनं ब्रह्म स वृक्ष**

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

एतल्लक्षणं तु अन्यपदार्थविशेषणीभूतस्य समस्यमानपदार्थस्य कार्याऽनन्वयितया ज्ञानविषयत्वम् । तथा च जन्मस्थितिलयरूपान्यपदार्थविशेषणीभूतस्य समस्यमानपदार्थस्य जन्मन आकाङ्क्षादिविरहेण क्रियान्वयाऽभावादस्याऽतद्गुणसंविज्ञानत्वम् । अथवाऽन्यपदार्थाः स्थितिप्रलयाभिसंवेशाः । तद्विशेषणीभूत आदिपदार्थः । तद्विशेषणं चान्यव्यावर्तकतया जन्मतद्धर्मरूपप्राथम्यस्याऽपेक्षाबुद्धिजन्यत्वान्न ब्रह्मकर्तृकभवनक्रियायामन्वयः (?) । तदनन्वये द्वाराभावान्न तत्र जन्मनोऽप्यन्वय इत्यतद्गुणसंविज्ञानत्वमस्य समासस्येति ज्ञेयम् । जन्मादिभावविकारसंग्रहार्थं पक्षान्तरेणाऽपि विवृण्वन्ति– **'अथवे'**ति । अस्मिन्पक्ष आदिशब्दः प्रभृत्यर्थकः । प्रभृतिशब्दः सजातीयान्यवाचकः । **'सर्व'** इति । जायतेऽस्ति

श्रीलालूभट्टकृता गूढार्थदीपिका ।

दतद्गुणसंविज्ञानो बहुव्रीहिरिति । **'अवयवसमासा'**दिति । अवयववाचकेन आदिशब्देन समासादित्यर्थः । आदिशब्दस्यावयववाचकत्वं **सर्वादीनि सर्वनामानी**ति सूत्रे सिद्धम् । अत एव तत्वबोधिन्यामुक्तमादिशब्दोऽत्रावयववाचीति । तथा च जन्म आदि अवयवभूतं येषामिति लौकिकविग्रहेऽर्थः । येषामित्यन्यपदार्थे । येषां जन्मस्थितिभङ्गानामवयवभूतानां मध्ये आदि अवयवभूतमित्युत्पत्त्यादित्रयाणां निवेशः । एवं सति येषां जन्मस्थितिभङ्गानां मध्ये जन्म आदि अवयवभूतं

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

अजहल्लक्षणा । अत्र तूत्पत्तित्वस्थितित्वभङ्गत्वसमानाधिकरणत्रित्वेन रूपेण त्रयाणां बोधादुत्पत्तित्वादिधर्मत्रयस्य च **सामाधिकरण्यविशेषणतया** बोधात्तै रूपैरुत्पत्त्यादीनामबोधादतद्गुणसंविज्ञानबहुव्रीहिरिति परिष्कृतोऽर्थः।बहुव्रीह्यपेक्षया द्वन्द्वस्य लघुत्वादाहुः—**अथवेत्यादि । सर्वे भावविकाराः । जन्मप्रभृति** जन्मावधीकृत्य'जायतेस्ति विपरिणमते वर्धतेपक्षीयते नश्यतीति' सिद्धाः

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

'जन्म आदिः यस्य तदि'त्थमेव विग्रहः कृतः स्यात् । एवं चाऽतद्गुणसंविज्ञानपक्षे जन्मनोऽपि ब्रह्महेतुत्वप्रतिपत्तये कर्मधारयो गर्भस्थो वेद्य एकशेषेण । तथा च जन्म च तदादिश्च जन्मादिः । जन्म आदिर्येषां तानि जन्मादीनि । जन्मादिश्च जन्मादीनि च जन्मादीति विग्रहो ज्ञेयः । '**नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामि**'ति सूत्रेण बहुव्रीहेः शेष एकवद्भावस्य वैकल्पिकत्वप्रदर्शनार्थं येषामिति बहुवचननिर्देश इति भावः । अस्मिन्पक्षे गौरवमेकदेशक्लेशं च मनसि निधाय पक्षान्तरमाहुः—**अथवे**'त्यादिना समाहारद्वन्द्वेन । अत्रायं भावः । पूर्वस्मिन्पक्षे बहुव्रीहेः कर्मधारयगर्भस्यैकशेषस्य च गुरुत्वादुभयपदार्थनिष्ठसमाहारद्वन्द्वस्य लघुत्वाज्जन्म चादिश्चानयोः समाहारो जन्मादि । समाहारस्यैकत्वादेकवचनं '**स नपुंसकमि**'ति सूत्रेण नपुंसकत्वं च । तथा चाऽस्मिन्पक्षे

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

आसीत् यतो द्यावापृथिवी निष्टतक्षुः।मनीषिणो मनसा विब्रवीमि वः। ब्रह्माध्यतिष्ठद्भुवनानि धारयन् इत्यादिश्रुत्या जगतो जन्मादिप्रकाराणां तत्तद्रूपेण जगद्रूपेण च भगवानेव क्रीडतीति पुष्टिसृष्टिप्रकारः सूत्रेण बोधित इति सर्वमनवद्यम् ।

ननु सर्वे तद्गुणसंविज्ञानत्वमत्र स्वीकुर्वन्तीति चेत् । न । अत्राऽतद्गुणसंविज्ञानत्वस्यैव स्वीकारात् । तथाहि—तद्गुणसंविज्ञानत्वं नाम तस्य अन्यपदार्थस्य गुणो विशेषणं तस्य संविज्ञानं विशेष्यान्वयिनान्वयित्वं येन । अन्वयित्वं च संयोगसमवायान्यतरसम्बन्धेन । यथा शुक्लवाससमानय लम्बकर्णमानयेत्यादौ । यत्र विशेषणस्य कार्यसम्बन्धाऽभावस्तत्रातद्गुणसंविज्ञानत्वम् । यथा चित्रगुमानय । तथा च प्रकृते जन्म आदिर्येषामित्यत्र आदिपदार्थः प्राथम्यं, तच्चापेक्षाबुद्धिजन्यमिति तस्य बुद्धिकर्तृकत्वं न ब्रह्मकर्तृकत्वमिति ब्रह्मकर्तृकभवनक्रियायां तस्य सम्बन्धाऽभावात्तद्द्वारा जन्मनोऽपि सम्बन्धाऽभावादतद्गुणसंविज्ञानत्वमिति मन्तव्यम् । अधिकं तु प्रकाशे द्रष्टव्यमिति दिक् । प्रवाहसृष्टिप्रकारेण सूत्रार्थमाहुः—'**अथवेति**' । '**भावविकारा**'इति जायतेऽस्तिविपरिणमते वर्द्धतेऽपक्षीयते नश्यतीति वेदाङ्गनिरुक्तोक्ताः षड्भावविकारा इत्यर्थः । '**गृह्यन्त**' इति ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

ते जन्मस्थितिभङ्गा जन्मादिशब्दवाच्या इत्यतद्गुणसंविज्ञानबहुव्रीहावपि जन्मनो ग्रहणं भवति । अन्यपदार्थे जन्मनोऽपि निवेशात् । इत्थमन्यपदार्थे जन्मनो निवेशाऽभावे त्वतद्गुणसंविज्ञानबहुव्रीहिपक्षे जन्मनो ग्रहणं न स्यात् । लौकिकविग्रहवर्ति यत्तच्छब्दवाच्यस्यैव बहुव्रीहिवाच्यत्वात् । **अनेकमन्यपदार्थे** इत्यनुशासनात् । अतो जन्मनोऽप्यन्यपदार्थे निवेशं कृत्वा जन्मादिपदवाच्यत्वं साधनीयम् । **अन्यपदार्थमात्रवाचकत्वमतद्गुणसंविज्ञानत्वमिति** शाब्दिकवर्यैरङ्गीकारात् । अतःपरं द्वन्द्वसमासमाश्रित्य पक्षान्तरमाहुः—'**अथवे**'त्यादि । '**जन्मप्रभृति सर्वे**' इति । जन्मप्रभृति आदि येषां, अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीति रूपाणां पञ्चभावविकाराणां ते जन्मप्रभृतयः पञ्चभावविकाराः । अस्यां भाष्यफक्किकायामतद्गुणसंविज्ञानबहुव्रीहिनिष्पन्नो जन्मप्रभृतिशब्दः । जन्मप्रभृतयश्च ते सर्वे च जन्मप्रभृतिसर्वे इति तत्पुरुषसमाससम्पन्नं जन्मप्रभृतिसर्वे इति पदम् । तथा चास्त्यादयो भावविकारा आदिशब्देन सूत्रे गृह्यन्त इति भाष्यफक्किकार्थः । आदिशब्देनास्त्यादयो भावविका-

द्भावः। आदिशब्दश्च धर्मवाची, स च स्वसम्बन्धिनं लक्षयति । तस्योभयसापेक्षत्वादुत्पत्ते-र्विद्यमानत्वादन्यानेव भावविकारानुपलक्षयतीत्यादिशब्देनान्ये भावविकाराः । अथवा

गोस्वामिश्रीमन्मुरलीधरविरचिता अणुभाष्यव्याख्या ।

आदिशब्दः प्रभृत्यर्थकत्वेन पूर्वोत्तरोभयसापेक्षत्वाज्जन्मनः साक्षान्निर्दिष्टत्वादुत्तरानवस्थित्यादीनेव भावविकारानुपलक्षयतीति ज्ञेयम् । जन्मनः प्रधानस्य समभिव्याहारात् । नहि केवलस्य विशेषत एतदुपलक्षकत्वं सम्भवति । समाहारद्वन्द्वपक्ष एव शिष्यबुद्धिवैशद्यार्थं प्रकारान्तरमाहुः—**'अथवे'**ति । घटप्रागभावध्वंसाऽधिकरणक्षणस्यैवोत्पत्त्यधिकरणत्वेन घटसत्ताक्षणस्यैतद्ध्वंसाधिकरणत्वात्त-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

पश्चेति शेषः । जन्मपदाऽऽदिपदयोर्द्वन्द्वेन जन्मादिपदस्य षड्वाचकत्वमाहुः—**'तथा चे'**ति । **'एकवद्भाव'** इति । **सर्वोऽपि द्वन्द्वो विभाषैकवद्भवतीत्ये**कवद्भावः । **'धर्मवाची'**ति । पूर्वोत्तरमीमांसकयोर्वृत्तिविषये सिद्धान्तस्यैक्याज्जातिशक्तिवादिनां मीमांसकानां मते प्राथम्यरूप-धर्मवाचीत्यर्थः । स्वसम्बन्धिनं प्राथम्यरूपधर्मसम्बन्धिनम् । ननु कथं लक्षयतीत्यत आहुः—**'तस्ये'**ति । **'उभयसापेक्षत्वादि'**ति । जन्मनि यत्प्राथम्यं तदस्त्यादिपञ्चनिरूपितं जन्मन-श्चाश्रयत्वमित्येवंरीत्या प्राथम्यस्योभयसापेक्षत्वादित्यर्थः । **'आदिशब्देने'**ति । यद्यप्यादिशब्दा-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

विपरिणमते वर्धतेऽपक्षीयते नश्यतीति षड्भावविकाराः । तद्ग्रहणे समासमाहुः—**'तथा चे'**ति । **'एकवद्भाव'** इति । धर्मोऽत्रादित्वम् । प्राथम्यमिति यावत् । समाहारद्वन्द्व इत्यर्थः । आदि-शब्देन तद्ग्रहणे प्रकारं दर्शयन्ति—**'आदिशब्दश्चे'**ति । एकवद्भावो यस्मिन् । द्वन्द्वः स तथा सिद्ध इति । पूर्वतन्त्रे शब्दानां धर्मवाचकत्वसिद्धेः । **'स'** इति । प्राथम्यरूपो धर्मः । तत्र कं लक्षयती-त्याकाङ्क्षायामाहुः—**'तस्ये'**ति । प्राथम्यरूपधर्मस्य । **'उभये'**ति । स्वाधारस्वनिरूपकोभयसाका-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

राः कथं गृह्यन्त इत्याकाङ्क्षायामाहुः—**'आदिशब्दश्च धर्मवाची'**त्यादि । आदिशब्दः प्राथम्यधर्म-वाचीत्यर्थः । **'स च स्वसम्बधिनं लक्षयती'**ति । प्राथम्यसम्बन्धिनं सत्तारूपं भावविकारं लक्षणया वक्ति । पञ्चसु भावविकारेषु सत्तारूपस्य धर्मस्य प्राथम्यात् । **'तस्योभयसापेक्षत्वादि'**ति । किंनिष्ठ-मादित्वं किं प्रतियोगिकमादित्वमित्थमुभयसापेक्षत्वादित्यर्थः । सत्तानिष्ठमादित्वं वृद्ध्यादिप्रतियोगिक-मिति सत्तारूपो भावविकार आदिशब्दवाच्यः । अन्येषां वृद्धिविपरिणामापक्षयनाशानामुपलक्षको भवतीत्यादिशब्देनाऽस्त्यादयः पञ्चविकारा ग्राह्याः । नन्वस्तिरूपभावविकारापेक्षयापि जन्मनः प्राथम्याज्जन्मरूपो भावविकारः कुतो न गृह्यत इत्याशङ्क्याऽऽहुः—**'उत्पत्तेर्विद्यमानत्वादि'**ति । उ-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

षड्भावविकाराः जगज्जन्मोत्तरकालीनाः । **एकवद्भावः समाहारद्वन्द्व** इत्यर्थः । **धर्मवाची** पूर्वमीमांसायां गवादिपदानां गोत्वादिधर्मशक्तिन्यायेनादिपदस्यापि प्राथम्यरूपधर्मे शक्तिरित्यर्थः । विग्रहवाक्यमाहुः—**तथा चे**त्यादि । **धर्मवाची** प्राथम्यरूपधर्मवाची । **स च** प्राथम्यरूपधर्मश्च । **स्वसम्बन्धिनं** स्वाश्रयनिरूपकात्मकौ सम्बन्धिनौ बोधयतीत्यर्थः । **बोधयतीति** अनुमानविधया बोधयति । तथाहि प्राथम्यमाश्रयनिरूपकोभयसापेक्षं **सम्बन्धिपदार्थत्वात्** प्रतियोगितावदितिरीत्या

जन्मनोऽनादित्वम्। तदाधारस्य पूर्वमविद्यमानत्वात्। अन्ये त्वादिमन्तः। तदाधारस्य पूर्वं

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

स्यास्तदनाधारत्वम्। स्थित्यादीनां तु तदुत्तरभावित्वेन तदाधारत्वादादिमत्त्वम्। अस्मिन्पक्षे आदिशब्दस्याधारवाचकत्वमिति ज्ञेयम्। तथाऽऽचादिशब्दः संस्थित्यादितदाधारभूतो योऽर्थस्तस्य सत्तारूपो धर्मस्तस्य तु वाची तेषामवश्यं तदुत्तरभाविनां स्थित्यादीनां धर्माणामुपलक्षक इत्यर्थः। द्वन्द्वपक्षेऽपि समाहारस्य समासार्थत्वे बहुव्रीहौ चाऽन्यपदार्थस्येतितुल्यत्वेन तद्गुणसंविज्ञानबहुव्रीहेः सर्ववादिसम्मतत्वेन च पक्षान्तरमाहुः—'**अथवे**'ति। इहागमनमाविर्भावः। प्रवेशस्तिरोभावः। अथवा, आगमनं स्थितिः प्रवेशस्तिरोभावस्तयोरवान्तरभेदाज्जन्म आदिर्येषामिति। विग्रहस्तु जन्म आदिर्यस्य तदिति बोध्यः। जन्मादीत्येकवचनात्। नन्वेवं स्थितिनाशयोरेवान्यपदार्थत्वेन द्विवचनस्यैवोचितत्वात्सूत्र एकवचनासङ्गतिरित्यत आहुः—'**जात्यपेक्षये**'ति। तत्रानुद्भूतावयवत्वेनैक-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

र्थस्योभयत्र सम्बन्धात् षड्भावविकारे लक्षणा वक्तुं शक्यते, तथापि जन्मपदस्य विद्यमानत्वात्पञ्चैव लक्षयतीत्यर्थः। नन्वेवं चेदुभयत्रसम्बन्धेन षट्स्वेव लक्षणाऽस्तु, जन्मपदं व्यर्थमित्यस्वरसादाह— '**अथवे**'ति। '**अनादित्वमि**'ति। जन्मनः पूर्वं पञ्चाभावादाश्रयं विना तस्य स्थितिर्नास्तीति जन्मन अनादित्वमित्यर्थः। इदं चासत्कार्यवादिमतेन। '**अन्ये त्वि**'ति। अस्त्यादीत्यर्थः। **तदा-**

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

ङ्गत्वात् तत्र स्वाधारभूताया उत्पत्तेर्जन्मपदेनैवोक्तत्वादन्यानेव स्वनिरूपकांस्तांस्तथेति आदिशब्देनाऽन्येऽवस्थित्यादयः पञ्चविकारा लक्ष्याः। ग्राह्या इत्यर्थः। एवमादिपदव्याख्यान आदिपदेनाऽऽदित्वधर्मवत्तया लाघवेन जन्मनोऽपि गृहीतुं शक्यत्वेन जन्मपदवैयर्थ्याऽऽपत्तिरित्यरुच्याऽऽदिपदस्य जन्मातिरिक्तभावविकारोपलक्षकत्वं प्रकारान्तरेणाऽऽहुः—'**अथवे**'ति। '**तदाधारे**'ति। जन्माधारस्य। जन्मनः पूर्वम्। तथात्वादिति हेतुः। अयमर्थः—घटप्रागभावध्वंसाधिकरणक्षणस्योत्पत्त्यधिकरणत्वेन घटसत्ताकालंस्योत्पत्तेर्ध्वंसाधिकरणतयोत्पत्तेस्तदनाधारत्वेनाऽनादित्वम्। '**अन्य**' इति। स्थित्यादयः पञ्च। आदिर्विद्यते येषां त आदिमन्तः। '**तदाधारे**'ति। घटसत्ताकालस्य घटस्य

श्रीलालूभट्टकृता गूढार्थदीपिका।

त्पत्तिवाचकस्य जन्मशब्दस्य सूत्रे विद्यमानत्वात्तेनैव ग्रहणे पुनर्नादिशब्देन जन्मनो ग्रहणमिति भावः। आदिशब्देन जन्मनो ग्रहणाऽभावे हेत्वन्तरमाहुः—'**अथवे**'ति। जन्म च आदिश्चेति विग्रहोऽस्मिन्नपि पक्षे। '**जन्मनो नादित्वमि**'ति। जन्मनः न आदित्वमिति पदच्छेदः। न आदिधर्मत्वमित्यर्थः। जन्मनि घटादिपदार्थनिष्ठादिधर्मत्वाऽभाव इत्यर्थः। जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

बोधयतीत्यर्थः। **तस्य** प्राथम्यस्य। **उभयसापेक्षत्वात्** स्वाश्रयतया जन्मनो निरूपकतयेतरेषां स्थित्यादिपदार्थानामित्येवमुभयसापेक्षत्वादित्यर्थः। **विद्यमानत्वात्** जन्मपदेन शक्त्यैव बोधनात्। **अन्यानेव** प्रपञ्चोत्पत्तिभिन्नानेव। **भावविकारान् षड्** भवविकारान्। **लक्षयति** लक्षणया प्राथम्यनिरूपकान् बोधयतीत्यर्थः। तथा च जन्म जन्मनिष्ठप्राथम्यनिरूपकाः **षड् भावविकाराश्च** यतो भवन्तीत्यर्थः। समाहारद्वन्द्वपक्षमेव प्रकारन्तरेण प्रदर्शयन्ति—'**अथवा जन्मन**' इत्यादिना।

विद्यमानत्वात्। अत आदिशब्दः स्वाधारसद्धर्मवाची तद्धर्माणामुपलक्षकः। अथवा गमनप्र-

---

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

वचनमिति भावः । तथा लिङ्गमपि लाघवाय सामान्यतो नपुंसकमेव निर्दिष्टम् । नन्वेवं सति येषामिति बहुवचनं भाष्ये कथं संगच्छत इति चेत्—अस्मिन्पक्षे तद्गुणसंविज्ञानो बहुव्रीहिरिति प्रदर्शनार्थमन्यपदार्थानामनेकविधत्वप्रदर्शनार्थं चेति बुध्यस्व । नन्वेवं जन्मनोऽन्यपदार्थप्रवेशेऽपि

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

धारस्य प्रपञ्चस्येति शेषः । '**स्वाधारसद्धर्मवाची**'ति । स्वं आदित्वम् । तदाधारभूतः सद्धर्मः । अस्तिपदवाच्यो धर्मः अस्तित्वं तस्य वाची तद्बोधकः । अन्यापेक्षया प्राथम्यात्तद्वाचकः सन् विपरिणामादीनां लक्षक इत्यर्थः । एतेनाऽजहत्स्वार्था लक्षणा सूचिता । तथा च जन्मपदेन प्रथमो विकार, आदिपदेन पञ्च विकारा बोध्या इति न जन्मपदवैयर्थ्यमिति भावः ।

केश्चिद्विरचिता वेदान्तचन्द्रिका ।

वा । '**अत**' इति । स्थित्यादीनामेवादिमत्त्वात् । '**स्वाधारे**'ति । **स्वं** स्थित्यादि । तदाधारो घटादिः सत्पदार्थः । तद्धर्मः सत्तारूपो धर्मः । तद्वाची सन्नेव स्वाधारधर्माणां विपरिणामादीनामेवोपलक्षक इति न जन्मपदवैयर्थ्यमित्यर्थः । जन्मनोऽपि सङ्ग्रहार्थं तद्गुणसंविज्ञानपक्षमप्याहुः—'**अथवे**'ति । आगमनं ह्युद्गमः । व्युच्चरणमिति यावत् । '**अभिसंविशन्ती**'ति श्रुत्युक्तोऽभिसंवेशः । तयोर्भेद-रूपत्वादुत्पत्त्यादिषड्भावविकारा[णां]नप्यन्यपदार्थेषु संगृह्येति शेषं पूरयित्वा जन्मोद्गम आदिर्येषा-मुत्पत्त्यादिप्रवेशान्तानामिति तद्गुणसंविज्ञानोऽयं बहुव्रीहिरित्यर्थः ।

श्रीलालूभट्टकृता गूढार्थदीपिका ।

नश्यति चेति यास्कोक्तेषु षट्सु भावविकारेषु प्रथमस्याऽपि जन्मनः न आदित्वम् । तत्र हेतुमाहुः—'**तदाधारस्य पूर्वमविद्यमानत्वादि**'ति । जन्मनः पूर्वं जन्माधारस्य घटादेरविद्यमानत्वादित्यर्थः । यावद्घटादेर्जन्म न जातं तावत्तस्य प्रागभावोऽस्तीति घटादेरविद्यमानत्वम् । तथा च धर्मिणोऽभावाज्जन्मा-ख्यो भावविकारः कस्य पदार्थस्यादिधर्मः स्यात् । अतो जन्मन आदित्वं नास्तीत्याशयः । ततश्चादिशब्देन जन्म न गृह्यते, किन्तु जन्मशब्देन जन्म ग्राह्यम् । आदिशब्देन सत्तारूपो विकारो ग्राह्यः । वृद्ध्या-दीनामप्यादिशब्दग्राह्यता नास्तीत्यत्र हेतुमाहुः—'**अन्ये त्वादिमन्त**' इति । अन्ये वृद्ध्यादयो भाव-विकारा आदिमन्तो न त्वादय इत्यर्थः । आदिमत्त्वे हेतुमाहुः—'**तदाधारस्य पूर्वं विद्यमानत्वा-दि**'ति । यद्यपि सत्ताधारस्य घटस्य विद्यमानत्वात्सत्तारूपस्याऽपि विकारस्यादिमत्त्वमायाति, तथापि

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

अनादित्वं स्वाधिकरणक्षणपूर्वक्षणावृत्तिस्वाधारकत्वमेवानादित्वं, पारिभाषिकं तज्जन्मनोस्तीति भावः । **तदाधारस्य** उत्पत्तेराधारस्य प्रपञ्चस्य । **पूर्वं** उत्पत्तेः पूर्वं, **अविद्यमानत्वात्** बहिःप्रकटस्य अविद्यमानत्वादित्यर्थः । **तदाधारस्य** स्थित्यादेराधारस्य । **पूर्वं** स्वाधिकरणक्षणपूर्वक्षणे । अतः यतो विद्यमानत्वमत इत्यर्थः । **स्वाधारसद्धर्मवाची**। तथाचात्र कल्पे आदिशब्दः स्थित्यादिभावविकारा-श्रयस्य सतः प्रपञ्चस्य बोधकः। तत्र स्वशब्देन स्थित्यादयो भावविकाराः **तदाधारः सन्** प्रपञ्चस्तस्य **धर्मः** सत्त्वरूपस्तस्य **वाची** शक्त्या तस्य बोधकः । **तद्धर्माणामि**त्यादिः । सतः प्रपञ्चस्य धर्माणां स्थित्यादिभावविकाराणां लक्षकः, लक्षणया बोधक इत्यर्थः । एतादृशजन्मादि यत इति बोधः ।

वेशयोर्भेदाज्जन्म आदिर्येषामिति । जात्यपेक्षया एकवचनम् । जन्म तु श्रुतत्वात् सिद्धम् ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

वृत्तिपदार्थघटकत्वेनाऽन्यपदार्थत्वाऽभावादतद्गुणसंविज्ञानत्वमेव कस्मान्न भवतीत्यत आहुः—'**जन्म त्वि**'ति । '**श्रुतत्वादि**'ति । ब्रह्मण इति शेषः । 'यतो वे'त्यादौ श्रुतत्वाद्ब्रह्मणः सकाशात्सिद्धम् । तथा च यथा सर्वनामसंज्ञाप्रयुक्तसुडागमलिङ्गेन 'हलि सर्वेषामि'त्यनेन सर्वादीनीत्यत्र तद्गुणसंविज्ञानो बहुव्रीहिस्तथाऽत्रापि श्रौतेन लिङ्गेन तद्गुणसंविज्ञान इत्यर्थः ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

इदानीं मर्यादा सृष्टिप्रकारेण तद्गुणसंविज्ञानपक्षमाश्रित्य सूत्रार्थमाहुः—'**अथवे**'ति । '**गमनप्रवेशयोरि**'ति । जन्मप्रलययोर्मध्ये यत्कार्यस्वरूपं तस्येत्यर्थः । **भेदात्** कारणतो भेदात् । '**जन्मे**'ति । जन्म आदिर्येषां तज्जातीयं जन्मादि । जातिसूत्रविकारत्वम्, एवंच यतो ब्रह्मणः सकाशादस्य जगतो जन्मादिषड्भावविकारा भवन्तीत्यर्थः । तथा च ब्रह्मकर्तृकभवनक्रियायां विकाराणामन्वयात्तद्गुणसंविज्ञानबहुव्रीहिरिति भावः । अस्मिन्नर्थे कारणमाहुः—'श्रुतत्वादि'ति । '**यस्मिन्निदं सं च विचैति सर्वं यस्मिन् देवा अधि सर्वे निषेदु**'रित्यु-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

नन्वेवं सूत्र एकवचनाऽसङ्गतिरित्यत आहुः—'**जात्यपेक्षये**'ति । '**ब्राह्मणो मामकी तनु**'रित्यादिवत् । जातिश्चाऽत्र सर्वेषु क्रियात्वरूपा । अत्र भाष्ये येषामिति बहुवचनं त्वन्यपदार्थस्याऽनेकविधत्वप्रदर्शनार्थम् । यद्वा येषामिति न विग्रहः किन्त्वर्थकथनमात्रम् । स तु जन्मादिरस्य जन्मादिजातीयस्य धर्मस्य तदेतत्सूचनार्थमेव जात्यपेक्षयेति ग्रन्थः । अत एव लिङ्गमपि सामान्याऽभिप्रायं कृतनपुंसकमेव निर्दिष्टम् । ननूद्गमरूपजन्मनि किंप्रमाणमित्यत आहुः—'**जन्मत्वि**'ति । '**श्रुतत्वादि**'ति । व्युच्चरणश्रुतिश्रुतत्वात्सिद्धं निर्विवादम् । एतद्यथा तथा प्रपञ्चितं श्रीमद्गोस्वामिचरणैर्विद्वदाभरणे । एवं पक्षत्रयेण सूत्रं व्याख्यायर्जुमार्गेण व्याकुर्वन्ति—

श्रीलालूभट्टकृता गूढार्थदीपिका ।

सर्वेषु धर्मेषु सत्ताया एव प्राथम्यात्सत्तारूपो विकार आदिशब्दवाच्य इत्यर्थः । तदाहुः—'**अत आदिशब्दः स्वाधारसद्धर्मवाची**'ति । स्वः घटादिः आधारो यस्य, एतादृशो यः सद्धर्मः सत्तारूपो धर्मस्तस्य वाचकः आदिशब्द इत्यर्थः । एवंसति जन्मादिपदे जन्मपदेन जन्म ग्राह्यमादिशब्देन सत्ता ग्राह्येति, विकारद्वयवाचकं जन्मादिपदं समाहारद्वन्द्वनिर्मितमिति फलितम् । वृद्ध्यादिभावविकाराणां चतुर्णां ग्रहण उपायमाहुः—'**तद्धर्माणामुपलक्षक**' इति । तद्धर्माणां वृद्ध्यादिरूपाणामुपलक्षक इत्यर्थः । उपलक्षणविधया वृद्ध्यादयो गृह्यन्ते । इत्थं जन्मादिपदेन षडपि भावविकारा गृहीता इति निर्दुष्टमखिलम् । अतःपरं तद्गुणसंविज्ञानबहुव्रीहिमादृत्य जन्मादिपदस्यार्थ उच्यते । '**गमनप्रवेशयोर्भेदादि**'ति । '**यतो वा इमानि भूतानि जायन्ते**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

बहुसम्मतत्वेन तद्गुणबहुव्रीहिपक्षमाश्रित्याहुः—'**अथवे**'त्यादि । **गमने**त्यादि । **गमन**माविर्भावरूपोत्पत्तिः, **प्रवेशो** भङ्गस्तयोर्**भेदात्** । भिन्नार्थबोधकं 'जन्म' 'आदि' इतिपदद्वयमुपात्तमित्यर्थः । **जन्म** जन्मपदार्थः । **आदिः** अनादित्वाश्रयः । येषामिति बहुवचनं तद्गुणसंविज्ञानेन बहूनां सङ्ग्रहा-

अथवा किमनया कुसृष्ट्या, जन्म आद्यस्य आकाशस्य यत इति। 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत' इत्येव विचार्यते । फलसम्बन्धित्वात् । तेनैकत्र सिद्धः शास्त्रार्थः प्रकारा-

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

एवं पक्षत्रयेण जन्मादीत्यवयवं व्याख्याय ततोऽपि लाघवप्रदर्शनार्थमृजुमार्गेण व्याख्यानमाहुः—'**अथवे**'ति । कुत्सितानां गौरवलक्षणादियुक्तानां सृष्टिः कुसृष्टिः । आदौ भव आद्यः । ननु 'सोऽश्नुत' इत्यत्र प्रथमान्तेन तच्छब्देन जीवस्यैवोक्तत्वात्तस्मादित्यनेन तस्यैव सन्निहितस्य परामर्शादात्मशब्देन च सामानाधिकरण्यादैश्वर्यादिविशिष्टस्य कस्यचिद्भूतभौतिकादिकर्तृत्वं निःसन्दिग्धमेव प्रतीयत इति कथमेतस्य जन्मादिसूत्रविषयत्वं सन्देहाऽभावादित्यत आहुः—'**फलसम्बन्धित्वादि**'ति । नहीदं वाक्यं जीवपरमेवेति वक्तुं शक्यम् । ब्रह्मपरत्वस्याऽपि सम्भावयितुं

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

पनिषदि श्रुतत्वादित्यर्थः । '**सिद्धमि**'ति । **यत्सिद्धं तदन्यं सजातीयं स्मारयतीति** न्यायात्संचरस्य प्रतिसंचरस्मारकत्वं युक्तमेवेति भावः । पुष्टिप्रवाहमर्यादाप्रकारेण व्याख्यायैषां कथनस्याऽनतिप्रयोजनत्वान्निश्चयगौरवाच्चेत्यरुच्या प्रकारान्तरेण सूत्रार्थमाहुः—'**अथवे**'ति । ननु सूत्रात्केवलाकाशस्यैवोत्पत्तिः प्रतीयते, नतु जगदुत्पत्तिः । एवं च केवलाकाशजनकत्वस्यैव

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

'**अथवे**'ति । '**कुसृष्ट्ये**'ति । कुत्सितानां प्रतिपत्तिगौरवलक्षणादिदोषयुक्तानामर्थानां सृष्टिः कल्पना तया किम् । न किमपीत्यर्थः । '**आद्यस्ये**'ति । आदौ भव आद्यः । तस्याऽऽकाशस्य । ननु **यतो**

श्रीलालूभट्टकृता गूढार्थदीपिका ।

येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ती'ति श्रुतौ प्रयन्ति गमनं कुर्वन्ति । यद्ब्रह्म प्रविशन्तीत्यर्थस्य विविक्षया प्रयन्ति प्रविशन्तीति गमनप्रवेशनक्रिये उक्ते । तयोर्गमनप्रवेशयोर्भेदाज्जन्म आदिर्येषामिति बहुवचनम् । तेन पदेन लौकिको विग्रहः कर्तव्य इत्यर्थः । एवं सति यतो वा इमानीतिश्रुतौ चत्वारः पदार्था उक्ताः । जन्मजीवनगमनप्रवेशाख्याः । तेषां सूचनार्थं लौकिकविग्रहवाक्ये येषामिति बहुवचनाऽऽग्रहो भाष्यकाराणाम् । तथा च जन्म आदिर्येषां **यतो वा इमानी**ति श्रुत्युक्तजीवनगमनप्रवेशनानां, ते जीवनगमनप्रवेशनाख्या जन्मादिपदवाच्या इत्यर्थः । अन्यथा प्रवेशनिर्गमनयोर्भेदाऽनङ्गीकारे जन्म आदिः ययोः स्थितिभङ्गयोरिति विग्रहः स्यात् । अस्मदुक्तरीत्या तु **यतो वा इमानि भूतानि जायन्त** इति श्रुतौ जन्मजीवनगमनप्रवेशा य उक्तास्तेषां चतुर्णामपि ग्रहणार्थं जन्म आदि येषामिति विग्रहेण जन्मादीनां चतुर्णां ब्रह्मकर्तृकत्वं साध्यते । चतुर्णां ब्रह्मकर्तृकत्वबोधनाय येषामिति बहुवचनं भाष्ये । **नन्वनेकमन्यपदार्थे** इत्यनुशासनादन्यपदार्थबोधो बहुव्रीहिणा भवेत् । अन्यपदार्थाश्च येषामित्यनेनोक्ता जीवनगमनप्रवेशास्तेषामेवात्र बोधो भविष्यति न जन्मन इत्याशङ्क्य समादधते—'**जन्म तु श्रुत-**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

र्थमुक्तं, नतु विग्रहघटकमपि । सूत्रे एकवचनस्यैव सत्त्वात् । विग्रहवाक्यं तु जन्म आदिर्यस्य तत् इत्येवंरूपम् । नन्वेकवचनेन सौत्रेण जन्मादिषण्णां बोधः कथमित्यत आहुः—'**जात्ये**'त्यादि । तथा च विकारत्वधर्मस्यैक्यादेकवचनमिति भावः । नन्वत्राप्यादिपदस्य षट्समुदायत्वावच्छिन्ने लक्षणया सर्वेषां

न्तरेपि। 'यतो वा इमानी'त्यत्र विस्फुलिङ्गवत् सर्वोत्पत्तिः। अत्र तु क्रमेणेति विशेषः। एतेन

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

शक्यत्वात्। तत्र हेतुः। 'फलसम्बन्धित्वादि'ति। महावाक्यप्रकरणपठितस्याऽवान्तरवाक्यस्य तेनापि सहैकार्थ्यात्तत्सम्बन्धित्वम्। तथा च पक्षद्वयसम्भावनस्याऽत्र प्रसक्तत्वाच्छास्त्रस्याऽवकाश इति भावः। नन्वेतस्य जन्मादिसूत्रविषयत्वे यतो वेत्यत्र कथं निर्णय इत्यत आह—**'तेनै-कत्रे'**ति। **'तत्तेजोऽसृजत स वायुमसृजते'**त्यादौ सर्व एव प्रकारा 'आकाशं वायुं च सृष्ट्वाऽऽ-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

ब्रह्मलक्षणत्वमायाति, न तु जगज्जन्मादिकर्तृत्वस्येति यतो वेत्यादिवाक्ये ब्रह्मभेदापत्तिः स्यादित्यत आह—**'तेने'**ति। येन **यतो** वेत्यादि विषयवाक्यत्वेनाऽऽदृतं तेनाप्याकाशादिवाक्यसङ्ग्रहार्थमेवमङ्गीकार्यम्। अन्यथाऽऽकाशादिवाक्ये ब्रह्मान्तराऽऽपत्तिः स्यादिति भावः। **'सिद्ध'** इति। दिक्प्रदर्शनरीत्याऽन्यान्यपि वाक्यान्यत्र बोद्धव्यानीति ब्रह्मणो जगज्जन्मादिकर्तृत्वं सिद्धमिति शास्त्रार्थः सिद्ध इत्यर्थः। **'प्रकारान्तरेऽपी'**ति। बोध्य इति शेषः। ननु कुत्र प्रकारान्तर इत्यत आह—**'यतो वे'**ति। भृगुप्रपाठक इति शेषः। **'विशेष'** इति। बोध्य इति शेषः।

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

वा इमानीतिवाक्यं विहायेदं किमिति विचार्यत इत्यत आहुः—**'फले'**ति। परविवरणरूपत्वात्तु तत्त्वम्। परस्यैव च फलत्वात्। एतेनाऽस्य प्रधानवाक्यत्वमप्युक्तं भवति। तथा च **गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय** इति न्यायादेतद्विचारस्यैवमुक्तत्वादिति भावः। नन्वस्याऽस्य सूत्रस्य विषयत्वे **'यतो वा इमानी'**त्यादौ कथं निर्णय इत्यत्राहुः—**'तेने'**ति। एकत्रोत्पत्तिप्रकारे।

श्रीलालूभट्टकृता गूढार्थदीपिका।

त्वात्सिद्धमि'ति। बहुव्रीहिणाऽन्यपदार्थस्योक्तत्वाज्जीवनगमनप्रवेशानां ग्रहणम्। जन्म तु, श्रुतत्वाज्जन्मादिपदे श्रुतत्वात्सिद्धमित्यर्थः। समासघटकीभूतत्वेऽपि तद्गुणसंविज्ञानपक्षाऽऽश्रयणात्समस्तपदान्तर्गतजन्मपदवाच्यस्याऽपि जन्मनो ग्रहणं **सर्वादीनि सर्वनामानी**ति पाणिनिसूत्रे सर्वादिपदान्तर्गतसर्वपदवाच्यस्यापि सर्वशब्दस्य ग्रहणवदिति हार्दम्। स चासौ गुणश्च तद्गुणः। तस्य संविज्ञानमुपयोगसमये प्रव्यक्तीभावो यत्र स तद्गुणसंविज्ञान इति लक्षणात्। उदाहरणं तु **लोहितोष्णीषा ऋत्विजः प्रचरन्ति**। लम्बकर्णमानयेत्यादि। **'जात्यपेक्षयैकवचनमि'**ति। जन्म आदिर्येषामिति विग्रहवाक्ये जन्मपद एकवचनं जात्यपेक्षयेत्यर्थः। **यतो वा इमानि**

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

बोधेपि जन्मनो जन्मत्वेन रूपेणाबोधादतद्गुणसंविज्ञान एव भवेदत आहुः—**'जन्मे'**त्यादि। **श्रुतत्वात्** जन्म तु 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुत्युपस्थापितत्वात् जन्मविशिष्टजन्मनिष्ठादितानिरूपकसमुदायत्वावच्छिन्ने आदिपदलक्षणातात्पर्यात्तद्गुणसंविज्ञान एवमिहापीत्यर्थः। ऋजुपक्षान्तरेण सूत्रार्थमाहुः—**'किमनये'**त्यादिना। इत्येव ब्रह्मणः सकाशात्सर्वस्योत्पत्तिबोधकमिदमेव वाक्यं **विचार्यते**। विषयत्वेन 'जन्माद्यस्य यत' इतिसूत्रेणेत्यर्थः। ननु बहूनां तादृशवाक्यानां मध्य इदमेव

१ ननु का उभयत्रापि शास्त्रार्थस्यैक्यात् कुत्रैक्यं गमनदिच्छयोत्पत्तिप्रकारभेद इति विशेष इत्यर्थः इत्यर्थाः सूचिता इति व्यासचरणैरित्यदिः। अत एव मयापि व्यख्याता इत्यर्थः। इत्यत आहुः–पुस्तकाऽशुद्धेरादर्शोऽयम्।

सर्व एव प्रकाराः सूचिता वेदितव्याः । ब्रह्मविचारे ब्रह्मणोप्यधिकृतत्वात्तद्ब्रह्मेत्यायाति ।

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या ।

काशं वा सृष्ट्वे'त्यादयः सर्व एव ज्ञेयाः । तथा च सर्वेषां सृष्टिवाक्यानामविरोधः सिद्ध्यतीति भावः । ननु सूत्रे ब्रह्मशब्दाऽभावादनुपपत्तिप्रतिसन्धानाऽभावेनाऽध्याहारस्याऽपि वक्तुमशक्यत्वाच्च कथमेतस्य फलवाक्योक्ततन्निष्ठकर्तृत्वनिश्चायकत्वमित्यत आहुः—'**ब्रह्मविचार**' इति । यत्तदोर्नित्यसम्बन्धात्तच्छब्दस्य प्रतिज्ञासूत्रेऽधिकृतस्य ब्रह्मण एव सन्निहितत्वाद्विशेषेणोपस्थापकत्वमिति नाऽध्याहार इत्यर्थः ।

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम् ।

ननु सूत्रे किमर्थमयं श्लिष्टप्रयोगः कृतः । येनानेकव्याख्यानं संभू(क्त)तमत आहुः—'**एतेने**'ति । जन्माद्यस्येति श्लिष्टप्रयोगेणेत्यर्थः । '**प्रकारा**' इति । स्वमते साक्षात्कर्तृत्वम् । परमते तटस्थत्वं, कुत्रचित् क्रमेणेति प्रकाराः ।

ननु लक्ष्ये लक्षणसमन्वयार्थं लक्ष्यबोधकं पदमवश्यं वक्तव्यमत आहुः—'**ब्रह्मे**'ति । '**आयाती**'ति, अर्थादित्यादिः । एतावता लक्षणांशो व्याख्यातः । प्रमाणांशं व्याख्यातु-

कैश्चिद्विरचिता वेदान्तचन्द्रिका ।

शास्त्रार्थः कर्तृत्वरूपः । प्रकारान्तर उत्पत्तिस्थितिप्रलयनिरूपणरूपप्रकारान्तरे । अत्र ज्ञातव्य इति शेषः । वाक्यद्वयोक्तोत्पत्तिप्रकारे यो विशेषस्तमप्याहुः—'**यतो वे**'त्यादिना । चतुर्धा सूत्रविवरणफलमाहुः—'**एतेने**'ति । चतुर्धा सूत्रविवरणेन । सूत्रे श्लिष्टप्रयोगेन वेदोक्ताः साक्षात्परम्पराभेदेन ये सृष्टिप्रकाराः सूचितास्ते ज्ञातव्या इत्यर्थः । ननु पूर्वं ब्रह्मसम्बन्धिविचारस्यैवाऽधिकृतत्वेन ब्रह्मणोऽनधिकृतत्वादत्र तद्ब्रह्मेत्यध्याहृतं भविष्यतीत्याशङ्कामपाकुर्वन्ति—'**ब्रह्मविचारे**'ति । यत्त-

श्रीलालूभट्टकृता गूढार्थदीपिका ।

भूतानि जायन्ते इति श्रुतौ यत्प्रयन्त्यभिसंविशन्तीति गमनप्रवेशयोर्भेद उक्तस्तत्सूचनार्थं भाष्ये जन्म आदिर्येषामिति बहुवचनम् । तथाऽस्मिन्नेव विग्रहवाक्ये जात्यपेक्षया जन्मेत्येकवचनमित्यर्थः। अयमर्थः । यतो वेति श्रुतौ भूतानि जायन्त इति बहुवचनाद्भूतप्रतियोगिकानि जन्मान्यपि बहूनीति जन्मपदे बहुवचनं प्राप्नोति अस्ति तु जन्मेत्येकवचनमित्याशङ्क्य जन्मपद एकवचनं साधयन्ति । 'जात्यपेक्षया एकवचनमि'ति । सकलेषु भूतप्रतियोगिकजन्मसु जन्मरूपा जातिरेकैवेति जन्मपद एकवचनमुचितमतो जन्म आदिर्येषामिति विग्रहः कर्तव्य इति हार्दम् । जन्म आदिर्येषामिति विग्रहेऽन्यपदस्य बहुवचनान्तत्वाज्जन्मादिशब्देऽपि प्रथमाबहुवचनरूपो जस् **सुपां सुलुगिति** वैदिकप्रक्रियासूत्रेण लुप्तः । अतो जन्मादीति प्रयोगः सूत्रे साधुः ।

'**फलसंबन्धत्वादि**'ति । आरम्भे **ब्रह्मविदाप्नोति परमिति** फलस्योक्तत्वात्**तस्माद्वा एतस्मादात्मन आकाशः संभूत** इत्येव सृष्टिवाक्यं मुख्यमिति तदेव विचार्यत इति भावः ।

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः ।

विषयत्वेन विचार्यतेऽत्र किं गमकमित्यत आहुः—'**फले**'त्यादि । 'ब्रह्मविदाप्नोति परमि'तिफलबोधकवाक्यघटितप्रपाठकान्तर्गतत्वेन तस्य प्राधान्यादिति भावः । नन्वत्रैवमेवास्तु अन्यत्र तु 'यतो वा इमानी'त्यादिस्थलेषु सर्वत्र तपआदिनिष्पन्नस्य विभूतिरूपस्य वा जीवस्यैव कर्तृत्वमस्त्वित्यत आहुः—

न त्वध्याहारः। शास्त्रे योनिः शास्त्रयोनिः। शास्त्रोक्तकारणत्वादित्यर्थः। शास्तीति शास्त्रं

गोस्वामिश्रीमुरलीधरविरचिता अणुभाष्यव्याख्या।

ननु ब्रह्मणोऽधिकृतत्वेऽपि नित्यशुद्धमुक्तस्वभावत्वात्कथमेतस्य कर्तृत्वमुपपद्यत इत्याशङ्क्य शिष्टेन सूत्रावयवेन तत्समाधानमाह—'**शास्त्रयोनित्वादि**'ति। ब्रह्मणः श्रुत्येकसधिगम्यत्वेन कारणत्वस्याऽपि तथात्वान्नानुपपत्तिरिति भावः। ननु सूत्रे शास्त्रपदोपादानात्काणादन्यायमायावादादीनामपि प्रसक्तेस्तत्रैव कथमुक्तेन प्रकारेण कारणत्वोक्तिरित्याशङ्क्य शास्त्रशब्दार्थमाह—'**शास्ती**'ति। शासनं सन्मार्गे स्थापनम्। नहि काणादादीनां सन्मार्गे स्थापनं कार्यत्वेन वक्तुं शक्यम्। तेषां शुक्रमोहितबुद्धित्वेन च वेदविरुद्धत्वेन मोहार्थत्वात्। ननु वेदशब्दस्य काण्डद्वयवाचकत्वेनोत्तरका-

गोस्वामिश्रीमद्गिरिधरविरचितं विवरणम्।

माहुः—'**शास्त्रे**'त्यादिना। शास्त्र इति विषयसप्तमी। विषयत्वं च प्रतिपाद्यत्वमित्यभिप्रायेणाऽऽहुः—'**शास्त्रोक्ते**'ति। वेदप्रतिपाद्येत्यर्थः। 'वेद' इति। प्रभुसम्मितः सुहृत्सम्मितः कान्तासम्मितश्चेति शब्दस्य त्रिविधत्वादयं प्रभुसम्मितः शब्द इत्यर्थः। एवं च तदाज्ञाभङ्गो न कर्तव्य इति भावः। ननूपनिषद्वाक्यमेवात्र प्रमाणमिति वक्तव्ये वेदसामान्यग्रहणं किम-

कैश्चिद्विरचिता वेदान्तचन्द्रिका।

दोर्नित्यसम्बन्धादर्थादेव तद्बोधो भविष्यतीति नाऽध्याहारापेक्षापीत्याशयः। एवं लक्षणबोधकांशाऽऽद्यभूतं सूत्रांशं व्याख्याय प्रमाणबोधकं हेतुभूतं सूत्रांशं व्याकुर्वन्ति—'**शास्त्रे योनिरि**'ति। विषयसप्तमीयम्। विषयत्वं चाऽत्र प्रतिपाद्यत्वम्। तथा च शास्त्रे हि सृष्ट्यादिकर्तृत्वं ब्रह्मण एव प्रतिपाद्यते। अतः शास्त्रप्रतिपादितसृष्ट्यादिकर्तृत्वाद्यदस्य जन्मादिकर्तृ तदेव ब्रह्मेति सूत्रार्थः पर्यवसितो ज्ञेयः। एतेन ब्रह्म श्रुत्येकसमधिगम्यमिति तत्कर्तृत्वमपि तथेति नाऽनुमानगम्यं कर्तृत्वं सद्भिरादर्तव्यमिति सूचितमतो नाऽनुपपत्तिरिति भावः। अन्यत्र शास्त्रत्वव्यवहारो गौण इति बोधयितुमाहुः—'**शास्ती**'ति। एतदुक्तमेवाऽऽदरणीयं सद्भिरिति ज्ञापनार्थमेव वेदपदं परित्यज्य शास्त्र-

श्रीलालूभट्टकृता गूढार्थदीपिका।

शास्त्रे योनिः शास्त्रयोनिरिति सप्तमीतत्पुरुषः। शास्त्रे इति सप्तम्या शास्त्रस्याधिकरणत्वम्। प्रतिपाद्यत्वसम्बन्धेन तत्र वर्तमानत्वात्। तथा च शास्त्रे प्रतिपाद्यं यत्कारणं तत् शास्त्रयोनिः। तत्त्वं शास्त्रयोनित्वम्। फलितमाहुः—'**शास्त्रोक्तकारणत्वादि**'ति। ननु ब्रह्मणः कारणत्वमुपनिषत्सूपलभ्यते ततश्च जन्माद्यस्य यत उपनिषद्योनित्वादित्येव वक्तव्यं तद्विहाय शास्त्रयोनित्वादिति किमर्थ-

भगवदीयश्रीमदिच्छारामप्रणीतः प्रदीपः।

'**तेने**'त्यादि। **तेन** ब्रह्मणः कारणतायाः सिद्धत्वेन। **एकत्र सिद्ध** इत्यादि 'तस्माद्वा एतस्मादात्मन'इत्यत्र ब्रह्मणः प्रपञ्चकारणत्वमिति शास्त्रार्थः सिद्धः स एव 'यतो वा इमानि' 'आनन्दाद्ध्येव खल्विमानी' त्यादिस्थले सर्वत्र बोध्य इत्यर्थः। **अत्र तु** 'तस्माद्वा एतस्मादि'त्यत्रेत्यर्थः। ननु 'जन्माद्यस्य यत' इतिसूत्रभागेन ब्रह्मणः कारणत्वं व्यवस्थापितं तच्च नित्यशुद्धबुद्धमुक्तस्वभावत्वाद्ब्रह्मणो न सम्भवतीति पूर्वपक्षे प्राप्ते सूत्रशेषेण समाधानमाहुः—'**शास्त्रे**' त्यादिना। '**शास्त्रो**'क्तेत्यादि। तथा च ब्रह्मणो यथा लौकिकयुक्त्यगम्यत्वं वेदैकसमधिगम्यत्वं तथा ब्रह्मनिष्ठकारणत्वमपीति वेदोक्तकारणतायां विप्रतिपत्तौ ब्रह्मापि विप्रतिपन्नं स्यात्तस्माद्वेदोक्तमेवाङ्गीकार्यमिति भावः।